॥ प्रशस्तिः ॥

अयं च न्यायरत्नावल्यभिधः पञ्चसरोपेतो ग्रन्थः भाविसमीरश्रीमद्वादिराजपूज्यचरणविरचितः तत्पदमेवाधिरूढैः तेषु बद्धश्रद्धैरास्तिक-शिरोरत्नभूतैः सोदामठाधीशैः श्री श्री विश्वेन्द्रतीर्थश्रीमच्चरणैः बहूनां विदुषां बालानां चोपकाराय सकलमपि मुद्रणव्ययं स्वयमेव स्वीकृत्य महता प्रयत्नेन व्याख्यानमपि कारयित्वा मुद्रापित इति श्रीमच्चरणेषु प्रत्युपकर्तुमशक्ता वयं इतोप्यतिशयितं परोपकृतिकरणाय तेषामायुरारोग्यादिकं दत्वा तान् श्रेयसा यो जयतु देवदेवः श्रीकृष्ण इति केवलं प्रार्थयामहे ॥

॥ विज्ञापना ॥

अयि भो महाशयाः! अस्य पुनः शोधनावसरे मध्येमध्ये व्याख्यातृणामसान्निध्यादनवधानान्मतिमान्द्यात् मुद्रादोषाच्च शोधितेऽप्यस्मिन्प्राप्ता दोषा यदि पुनरवकाशो लभ्येत द्वितीयमुद्रणावसरे परिहियेरन्निति सादरं निवेदयति ।

सज्जनविधेयः,

न्यायवेदांतशिरोमणिः न्यायविद्वांश्च,

बि. अनन्तकृष्णोपाध्यायः.


काम धेनुर्यथा पूर्वं सर्वाभीष्ट फलप्रदा।
तथा कर्णे वादिराजे श्रीपादोऽभीष्ट दायनम् ॥
मुद्रा पुस्तक शंखाब्ज विद्योतित करांबुजा।
सुरलेख हयग्रीव मुखात् विद्यां भज ॥

ॐ श्रीहरये नमः । श्रीमदानन्दतीर्थगुरुभ्यो नमः । श्रीमद्वादिराजगुरुभ्यो नमः । परं देवं वासुदेवं गोपीजनमनःप्रियम् । जननीं सर्वजगतां रमां मङ्गलदेवताम् ॥ १ ॥ पवनं श्रीमदाचार्यमाचार्याणीं च भारतीम् । नमस्यामो दयालास्ते दिशन्त्वस्मासु सद्धियम् ॥ २ ॥ हयग्रीवेति यो वक्ति तस्य गङ्गेव पावनी । आस्यान्निस्सरते वाणीत्येवं यो वक्ति नो गुरुः ॥ ३ ॥ ग्रन्थादौ तां गुरोर्वाणीं स्मरन्तो वयमंजसा । तं देवं तं गुरुं वापि विनान्यं कं भजामहे ॥ ४ ॥ गुरुभिः संगृहीता या रत्नसङ्ग्रहपेटिका । तन्निर्गतान्बहीरत्नप्रकाशानाचिनोम्यहम् ॥ ५ ॥ ॐ श्रीरस्तु । सकलापेक्षितसुखप्रदपरदेवतासर्वोत्तमत्वज्ञानपरिपन्थि जीवब्रह्मैक्यं निराचिकीर्षुः श्रीन्यायरत्नावल्याख्यं ग्रन्थरत्नमारभमाणो भगवान् भाविसमीर श्रीमद्वादिराजपूज्यचरणः 'शन्नो मित्र' इत्यादि श्रुति सूचितं परदेवतानतिरूपं मङ्गलं शिष्यशिक्षायै ग्रन्थादौ निबध्नाति ॥ **श्रीलक्ष्मेति** ॥ श्रीः लक्ष्मीः लक्ष्म लक्षणभूता यस्य तादृशं वक्षो यस्य तस्मै । 'वक्षसि लक्षणभूता लक्ष्मीरिति' तत्वप्रदीपोक्तेः । रूक्षनखशिक्षितरक्षस इति । अत्र नृसिंहस्य पुरुषश्रेष्ठस्य हिरण्यकशिपुर्वीर्येऽतीव हीनः षण्ढतुल्य इति सूचनाय नपुंसकरक्षःपदप्रयोगः । अत एव नखशिक्षितेति । अत एव लोकेप्यस्ति व्यवहारः । अस्य महावीरस्य रोम्णः नखाग्रस्य वा चालनेयमल्पो न समर्थ इति । स्वस्य पक्षा ब्रह्मादयः । अथवा स्वः स्वीयो वायुः । 'स्वं त्रिष्वात्मीय' इत्यमरोक्तेः । तस्य पक्षः सिद्धान्तः । तस्य रक्षणे दीक्षा दृढनिश्चयो यस्य तस्मै । नृहर्यक्षाय । नरसिंहाय । 'हर्यक्षः केसरी हरि'रित्यमरः । अत्र विशेषणद्वयेन इष्टानिष्टप्राप्तिपरिहारसामर्थ्यस्य स्वपक्षस्थापनपरपक्षनिराकरणसामर्थ्यस्य च सूचनेन वन्द्यता समर्थिता । आद्यविशेषणेन सकल वाङ्मनसदेवताया रमाया अप्यप्रधानतया वन्दनमसूचि । अतः 'क्लेशोऽधिकतरस्तेषा'मित्यनेन न विरोधः । अत्र

ग्रन्थकृतैव ऐक्याधिकारिणां पौण्ड्रकादीनां रक्षसां उत्तरत्र दर्शयिष्यमाणत्वात्तेषामभावे निरधिकारिकमैक्यं स्वयमेव गतमिति तादृशरक्षोनिरसन-समर्थस्य नरसिंहस्यैव नमनमकारि । अत एवान्यत्रोक्तं ग्रन्थकृता 'एवं च भवद्द्वैतभिक्षूराक्षसमंदिरे । भैक्षार्थमागमत्तेषां नाशेचानशनोपत-दिति' ॥ १ ॥ यच्छास्त्रमुपजीव्यग्रन्थः कृतस्तमाचार्यं नमति । **त्रिधामेति** । त्रिधामावैकुण्ठादिधामत्रयवान् । सुधीश्रियं शोभनमतिरूपां

श्रीमद्वादिराजगुरुभ्यो नमः । श्री वेदव्यासाय नमः ।

श्रीलक्ष्मवक्षसे रक्षनखशिक्षितरक्षसे । स्वपक्षरक्षादीक्षाय नृहर्यक्षाय ते नमः ॥ ॥ १ ॥
त्रिधामा यस्य हृत्सीम्नि कृतधामा निरन्तरम् । सुधीश्रियं दिशतु मे समध्वक्षीरसागरः ॥ २ ॥
एष सर्वेश्वर इति सर्वस्यैष वशीति च । सर्वस्येशान इत्यादौ महिमा श्रूयते हरेः ॥ ३ ॥
एष नित्यो ब्राह्मणस्य महिमेत्याह काचन । सत्यः सो अस्य महिमेत्यस्तौषीत्काचन श्रुतिः ॥ ४ ॥
स्वाभाविकी ज्ञानबलक्रियाचेत्यपराजगौ । तान्नित्यसत्यमहिमा नित्यं ज्ञानबलक्रियः ॥ ५ ॥
भगवान्निगमोद्धर्ता धर्तामन्दरभूभृतः । भुवो भर्ता दुष्टदैत्यहर्ता सिद्धो भवत्प्रभुः ॥ ॥ ६ ॥

संपदं । तादृशश्रिय उत्पत्तिकारणत्वभगवन्मन्दिरत्वाभ्यां श्रीमदाचार्यस्य क्षीरसागरत्वरूपणम् ॥ २ ॥ स्वसिद्धान्तस्य स्वपरपक्षसाधन-निरकरणरूपदलद्वययुतत्वेन तत्रादौ भगवान्ग्रन्थकारः भेदाभेदावेव मुख्यतः स्वपरपक्षत्वेन संगृह्य परपक्षमभेदं पञ्चभिरपि सरैर्निराचिकीर्षुः

ऐक्यनिरासहेतुव्यक्तिद्वयसत्ताफलकविरुद्धधर्मावभिधास्यन् जैवधर्माणां प्रत्यक्षसिद्धत्वेनानतियत्नसाध्यत्वादैशान्यधर्मान्प्रमाणैः संगृह्णाति । **एष सर्वेश्वर** इत्यादिना ॥ अनेन प्रतीकधारणेन तत्रतत्रत्यबृहदारण्यकवाक्यानि संगृहीतानि । तत्र प्रथमा श्रुतिः छान्दोग्यगा । इत्यादावित्यनेन एष सर्वाधिपतिरितिवाक्यं । सर्वस्येशानइत्यस्य सर्वस्येशा ब्रह्मादयः तेषामनश्रेष्टक इत्यर्थः । वशयतीति वशी । नियामक इत्यर्थः । 'सत्यः सो अस्य महिमेति' वाक्यं ऋग्वेदगतम् । 'स्वाभाविकी ज्ञानबलक्रियाचेति' श्वेताश्वतरोपनिषद्गतम् । तन्नित्यसत्यमहिमेति कण्ठतः नित्यत्वाद्युक्तया स्वाभाविकत्वोक्तया वा लब्धस्य सत्यत्वस्य कथनम् । नित्यत्वोक्तया त्रिकालसत्वलाभेन त्रिकालनास्तिताबोधरूपबाधाभावा

स्वकार्याय तमेवेशं येऽर्थयन्ते क्षणे क्षणे । अनादृशबलज्ञाना ब्रह्मेशानादयः सुराः ॥ ७ ॥
तस्यानुवर्तिनश्चेति सिद्धमार्मोद्भिवेकिनाम् । मात्रापरोऽसि त्वं विष्णो महित्वं नाश्नुवन्ति ते ॥ ८ ॥

द्वा महिम्नि सत्यत्वकथनम् । भगवान्प्रभूर्नित्यसत्यमहिमा । नित्यं ज्ञानबलक्रियः सिद्धोऽभवदिति योजना । निगमोद्भर्तेत्यादिकंतूद्देश्यविशेषणम् । इदञ्च मत्स्याद्यवतारदशकस्यापीदृशमहिमप्रदर्शनार्थम् । विशेषण त्रयेण क्रमान्मत्स्यकूर्मवराहाणां चतुर्थेन च संक्षेपतः अवतारसप्तकस्याऽपि सूचनात् । किञ्चोदाहृतश्रुतिभिः सामान्यत उक्तस्य महिम्न उद्देश्यगतविशेषणैर्विशिष्यैवमेव निरूपणेऽस्ति किञ्चिन्निमित्तं यद्ब्रह्मणः शक्त्यादिसर्वधर्मशून्यत्वे वेदापहारिदैत्योपद्रवनिर्हरणसमर्थस्यान्यस्याभावात्केनाऽप्यनुद्भूतावेदवाणी कस्याऽपि साधिका बाधिका वा नस्यादिति पदेपदेभीता श्रुतिः स्वात्मानं गोपायन्ती दुष्टदैत्यहन्तृत्वस्योद्धर्तृत्वादि विविधशक्त्यपरपर्यायं महिमानमाह । धर्ता

मन्दरभूभृत इति तूत्तरश्लोके उपयोक्ष्यते ॥ ६ ॥ **क्षणे क्षणे** इति । अनेन दैत्यपीडिता देवाः प्रथमतस्तं प्रार्थयन्ते । तदुपदेशेन यतनेऽपि मन्थरोद्धरणाशक्तौ पुनः प्रार्थना उत्धृतस्यापि पुनः पातेन नयनाशक्तौ पुनरर्थना । नीतस्याऽपि जले मज्जने पुनरभ्यर्थना । अमृतोद्भवेऽपि तदप्राप्तौ पुनरपि प्रार्थनेत्येकस्मिन्नेव कार्ये बहुवारप्रार्थनमसूचि । इदमेव धर्ता मन्दरभूभृत इत्यनेन प्रस्तुतम् । 'परो मात्रया तन्वावृधाननते-

इति श्रुतिश्रुतं विष्णुमहाप्रतिमपौरुषम् । नास्ति नारायणसमं न भूतं न भविष्यति ॥ ९ ॥
स्मृतिरेषा च कृष्णस्य समं कालत्रयेऽपि च । निषेधति ततस्तेन कस्यैक्यं स्याद्विचारय ॥ १० ॥
महिमा श्रीपतेः सर्वः स्वभावोऽभूच्छ्रुतेर्बलात् । अन्यस्य तदभावोपि श्रुतिस्मृतिबलादभूत् ॥ ११ ॥
प्रकृत्यैव च यो नीचो यः प्रकृत्या सदोत्तमः । तयोरैक्यं नैव शक्यं वक्तुं कल्पशतैरपि ॥ १२ ॥
अतत्त्वावेदकं सर्वं भेदवाक्यमितीरिते । वक्तव्यमद्वितीयत्ववाचा भेदनिषेधने ॥ ॥ १३ ॥
निषिध्यमानभेदस्य स्यात्कथंचिदतत्त्वता । अतत्वावेदकंचस्याद्भेदवाक्यं तदैव हि ॥ ॥ १४ ॥
न चैतद्युज्यते शब्दसामर्थ्यस्य विचारणे । आत्मा जडं न जीवो नेत्याकारा नेति नेति वाक् ॥ १५ ॥

महित्वमन्वश्रुवन्तीति' ऋग्वेदगतमन्त्रमर्थतोऽनुवदति । **मात्रा परइति** ॥ ८ ॥ 'नास्ति नारायणसममिति' भारतगतं वाक्यम् । अन्यस्य चतुर्मुखादि चेतनस्य । तदभावोऽपि तादृशमहिमाभावोऽपि ॥ ११ ॥ भेदवाक्यानामतत्त्वावेदकत्व शङ्कामपाकरोति । **अतत्वा**

वेदकमिति ॥ एकमेवाद्वितीयमिति श्रुत्या भेदनिषेधे निषिध्यमानभेदबोधकं वाक्यमतत्त्ववेदकं स्यात् । न चैवमुज्यते । एतच्छ्रुतिगतशब्द-शक्तिविचारणेऽस्यार्थस्याऽप्रतीतेः । अन्यार्थस्यैव प्रतीतेरित्याह ।-**वक्तव्यमित्यादिना विचारण इत्यन्तेन** । 'स एष नेति नेत्यात्मागृह्यो न हि गृह्यत' इति बृहदारण्यके । जीवो न जडं नेति ब्रह्मणि जीवजडभेदः प्रतीयते । नञः अत्यन्ताभावाऽन्योन्याभावरूपार्थद्वयसत्त्वेऽपि

प्रथमांतपदोक्तेन ब्रह्मणा सह सर्वथा । नञर्थभूतभेदस्य सामानाधिकरण्यवाक् ॥ ॥ १६ ॥
घटः पटोनेति वाक्ये यथा सर्वैः प्रतीयते । घटः पटनिषेधात्मा तथैवात्रापि धीर्भवेत् ॥ १७ ॥
जगदात्मनि नेत्युक्ते त्वत्यंताभाववाग्भवेत् । आत्मा जगन्नेति वाक्तुभेदवाक् नात्र संशयः ॥ १८ ॥
त्वया च वाक्यपूर्त्यर्थमध्याहार्यं मयैव न । योग्यं तु प्रतियोग्यत्र मृग्यते द्विःप्रयोगतः ॥ १९ ॥
सप्तम्यन्तपदेनोक्ते भूतले नास्ति गौरिति । निषेधे तु नञर्थस्याधारस्तद्भूतलं भवेत् ॥ २० ॥

सप्तम्यंतानुयोगिवाचकपदस्थलएवात्यंताभावबोधकत्वमनुयोगिनः प्रथमान्तपदबोध्यत्वे नञा भेद एव बोध्यते । प्रकृते च प्रथमान्तानुयोगि-वाचकपदसमानाधिकरणेन नञा भेद एव बोध्यत इति सदृष्टान्तमाह—॥ **आत्मेत्यादिना विलक्षणइत्यन्तेन** । प्रतियोग्यनुयोगिवाचकपद-समभिव्याहृत नञ एव वाक्यपूर्त्यर्थबोधकत्वेन प्रकृते च प्रतियोगि वाक्यपूर्त्यर्थमध्याहार्यम् । नञः द्विप्रयोगतः प्रतियोग्यपि द्वयं स्यात् । तच्च जीवो 'जडश्चेति भावः ॥ २१ ॥ एवं विलक्षणोक्तेः भिन्नार्थत्वावश्यकत्वे न द्वितीयमद्वितीयमिति ब्रह्माख्यधर्मिस्वरूपभेदबोधकमिदं

वाक्यं द्वितीयनिषेधकमपि भेदं ननिषेधति । तस्याद्वितीयब्रह्मरूपत्वादतश्चमुख्यतत्ववेदकमेवेदं नातत्त्ववेदकमित्याह । **अत** इति । धर्मिरूपभेदबोधकत्वादित्यर्थः ॥ २३ ॥ नद्वितीयमद्वितीयमिति तत्पुरुषे परस्यानिष्टमुद्भाव्य नविद्यते द्वितीयं यस्येति बहुव्रीहावपि तदुद्भावयति । **द्वितीयमिति** । अत्र च कल्पे यस्येति षष्ठ्या नञर्थद्वितीयाभाव एव ब्रह्मसम्बन्धित्वेन भासते अनुयोगिवाचकपदस्य प्रथमान्तत्वाभावे नञर्थस्या-

नैवतद्रूपता तस्येत्याहुरशब्दार्थवेदिनः । विलक्षणोक्तेरर्थोऽपिस्यादेवेत्थं विलक्षणः ॥ २१ ॥
अतस्तवाद्वितीयत्ववाग्द्वितीयं निषेधतु । अद्वितीयतयाभातं भेदं न ब्रह्मणिक्षिपेत् ॥ २२ ॥
तद्ब्रह्म तत्वरूपं मे ब्रह्मभेदं वदद्वचः । अतत्त्ववेदकं नाभूत्किन्त्वभूत्तत्ववेदकम् ॥ २३ ॥
द्वितीयं यस्य नेत्युक्त्या नञर्थेब्रह्मणा सह । षष्ठ्यर्थभूतसम्बन्धो भासते न त्वभिन्नता ॥ २४ ॥
अतस्तवाद्वैतमेव द्वितीयमभवद्बलात् । उपस्थितपरित्यागे कारणाभावतः श्रुतिः ॥ २५ ॥
द्वितीयमिदमेवादौ निषेधेदिति मे मतिः । निषिध्यमानद्वैतस्य बोधिकावागियं तव ॥ २६ ॥

भेदभानायोगात् । एवञ्च नञर्थभूतमद्वैतमेवास्मिन्वाक्ये द्वितीयतया प्रकृतमिति तस्यैव निषेधो युक्तः । प्रकृतपरित्यागे कारणाभावात् । तथाच द्वितीयाभावरूपब्रह्मान्यद्वितीयबोधिकेयं वागतत्त्ववेदिकास्यादेव । अयञ्च शब्दशक्तिलभ्य एवार्थ इति भावः ॥ २६ ॥ अद्वितीयश्रुतेरर्थान्तरमपि प्रदर्श्य परमपहसति । **नीलमुत्पलमित्यादिना** । नीलमुत्पलमित्यत्र नीलाभेदउत्पले भासते इति सर्वाविवादम् । एवं सर्व

खल्विदं ब्रह्मेति वाक्येऽपि सर्वाऽभेदो ब्रह्मधर्मतया भासते । नत्वभेदेऽपि ब्रह्मैक्यम् । यत एकता ब्रह्मधर्मतया श्रुता । अतस्सा निर्धर्मके ब्रह्मणि नास्तीति सैवैकता ऐक्यम् । अभेद इति यावत् । द्वितीयाऽभवत् । ताश्चाऽद्वितीयश्रुतिर्निषेधति ॥ एवञ्चाभेदबोधकवाक्यानि निषिद्धयमानार्थबोधकत्वादतत्वावेदकान्यासन् । यदा ऐक्यापरपर्यायस्याऽभेदस्याऽतत्त्वता मिथ्यात्वं; तदा तद्वादिनाञ्चमिथ्यावादित्वं भेद-

अतत्त्वावेदिकैवासीच्छब्दशक्तिविचारणे । नीलमुत्पलमित्युक्ते नीलाभिन्नं यथोत्पलम् ॥ २७ ॥
ईयते नत्वभेदस्याऽप्यभेदस्तेन बोध्यते । किन्त्वभेदाधारतैवं सर्वं ब्रह्मेति वाच्यपि ॥ २८ ॥
सर्वाभिन्नब्रह्मबुद्धिर्भवेन्नत्वेकरूपता । अतस्तत्राऽप्येकता न ब्रह्मधर्मतया श्रुता ॥ ॥ २९ ॥
द्वितीयैवाभवत्तांच निषेधत्यद्वितीयवाक् । अतत्वावेदिका सर्वा वाक्चैवमभवत्तव ॥ ३० ॥
अतो मिथ्यावादिता च भवतामेव शोभते । एवंच भेदवाक्यानि भेदतत्त्वप्रमापनात ॥ ३१ ॥
विद्वच्श्लाघ्यानि सत्संसद्योग्यान्यासन्नसंशयः । तत्तत्त्ववादिनामेव युक्ताऽभूत्तत्ववेदिता ॥ ३२ ॥

वाक्यानां अबाधितवस्तुबोधकत्वेन विद्वत्सभाश्लाघ्यत्वं तादृशभेदवादिनामस्माकं तत्ववेदित्वं च युक्तमिति भावः ॥ ३२ ॥ एवमतत्ववेदक-मपि वेदवाक्यं व्यावहारिकमानमिति यत्परो वक्ति तद्विचारणे प्राप्तां श्रुतीनामप्रतिनीचतां प्रकटीकरोति—**अनादीत्यादिना** । योगीन्द्रेऽपि सर्वार्थेषु भ्रांतिरनुवर्तत इत्युक्तम् । तत्कथमित्यतः सार्वज्ञादित्युक्तम् । तेषां सर्वज्ञत्वात्सर्वस्य मिथ्यात्वादितिभावः । विचारणे तु ईदृशव्याव-

हारिकमानात् प्रातिभासिकमानमेव श्रेष्ठमित्याह—**प्रातिभासिकेति** । न हि शुक्तिरजतादिकं सर्वं सर्वदा सर्वो भ्राम्यति । यश्च भ्राम्यति सोऽपि दोषे सत्येवेति कदाचित्कस्यचिदेव भ्रामकं तत्प्रातिभासिकं वञ्चकमेवासीत् । महावञ्चकता तस्य सर्वथा नोचिता । अत्रात्यन्तनीच-

अनादिकालमारभ्य सर्गे सर्गे दिने दिने । शतशः पण्डितमुखाच्छ्रवणे मननेऽपि च ॥ ३३ ॥
या भ्रांतिर्न निवर्तेत यावन्मोक्षं पुनःपुनः । सर्वार्थेषु च सार्वज्ञाद्योगीन्द्रेऽप्यनुवर्तते ॥ ३४ ॥
व्यावहारिकमानानि दद्युर्भ्रान्तिं किलेदृशीम् । एवं च सर्वजगतामनिवर्त्यमहाभ्रमम् ॥ ३५ ॥
कुर्वतां वेदशास्त्राणां महावंचकता भवेत् । प्रातिभासिकमानं तु किंचित्किंचित्कचिक्कचित् ॥ ३६ ॥
कदाचिद्भ्रामयेत्तस्य दोषे सत्येव नान्यथा । तत्पामराणामेवैतदपकारि न योगिनाम् ॥ ३७ ॥
महावंचकता तस्य ततो नात्यन्त(नीच)तोचिता । भेदभेदिपदार्थानां साधकस्य स्थलेस्थले ॥ ३८ ॥
चोदनारूपतः सर्वयागानां बोधकस्य च । वेदादेरुक्तविधया दीर्घभ्रान्तिकरस्य तु ॥ ३९ ॥

तेतिपाठे सुगमोर्थः अत्यन्ततोचितेतिपाठस्तु अत्यन्ततेतिभवितृप्रधाननिर्देशमङ्गीकृत्य योज्यः अयमेवार्थः स्वरसः । पूर्वपाठे महावञ्चकता न अत्यन्तनीचता च नेति नञ्यावृत्त्यायोऽयम् । अत्र तु महावञ्चकताऽत्यन्तं नोचितेति सकृदन्वयेन नञ्यावृत्त्यभावात् । न केवलं वेदशास्त्रदेर्महा-वञ्चकता व्यावहारिकमानत्ववाचा । अत्यन्तनीचताऽपि प्राप्ता । यतो व्यावहारिकमानं दीर्घभ्रान्तिकरं अतः सद्योभ्रान्तिकरान्नीचादप्यति-

नीचमाख्यात् ॥ **अतोपीति** ॥ महावच्चकत्वस्य नीचादप्यतिनीचत्वस्य च प्राप्तेरित्यर्थः । एतत् वेदशास्त्राणां व्यावहारिकमानत्वं ॥ ४० ॥ ननु तर्हि भवन्मते व्यावहारिकता नास्त्येव किमित्यत आह—**व्यवहारस्येति** । अस्माकं तु लोकसिद्धयैव व्यावहारिकता । सैव चेद्भवतो मता तर्हि कामं तामङ्गीकुरु न चैवमङ्गीक्रियते भवता । यतो हि व्यावहारिकस्य बाधितार्थत्वमङ्गीक्रियते अतो बाधस्य दूरत्वमात्रेण ना

व्यावहारिकमानत्ववाचाऽप्यत्यंतनीचता । आगता न गुणश्रैष्ठ्यमतोऽप्येतदसङ्गतम् ॥ ४० ॥
व्यवहारस्य निर्वाहकरी या तु दशाखिलैः । सत्यस्यैवोच्यते सैव दशेयं चेद्भवेदपि ॥ ४१ ॥
बाधितार्थत्वसाम्ये तु बाधदूरत्वमात्रतः । नास्या विशेषः कोऽपि स्यात्किंतु स्यादुक्तदूषणम् ॥ ४२ ॥
रजतार्थी भ्रमे जाते तदैव तदपेक्षया । तत्र गत्वा बाधकं च तत्काले प्रतिपद्यते ॥ ४३ ॥
तदनर्थी भ्रमे जातेऽप्युपेक्ष्य स्वगृहं गतः । बाधं तु नैव जानीते को विशेषस्तयोर्वद ॥ ४४ ॥
अनिवर्त्य महाभ्रान्तिजनकोन्मादरोगवान् । सर्वोपकारिवेदादेर्हीनादपि च हीनतां ॥ ४५ ॥

प्रमाणाद्विशेष इति भावः ॥ ४२ ॥ इममेवार्थं दृष्टान्तेन द्रढयति ॥ **रजतार्थीति** ॥ ४४ ॥ परमुपहसति **अनिवर्त्येति** वैदिकच्छद्मी-वैदिक इति कपटवान् । मातरमेव हन्ति—स्वोपकारिवेदाप्रामाण्यकथनं स्वमातृहननतुल्यमिति भावः ॥ ४६ ॥ वासुदेवसहस्रनामपर्यालोचनयाऽपि जीवेशयोस्तारतम्यं साधयति **किंचेति** । किलेति ब्रह्मरुद्राद्युत्कृष्टचेतन इति नाम्नः प्रसिद्धिं द्योतयति । यदित्यस्य तदित्य-

नेनान्वयः ॥ ४९ ॥ रामायणगतकाकासुरकथयाऽपि विष्णोः सर्वोत्तमत्वं साधयति **ब्रह्मेत्यादिना**। नचानेन रामस्य सर्वोत्तमत्वसिद्धावपि असङ्गतिरेव रामस्याप्रकृतत्वादिति वाच्यम् । विष्णोः सर्वरूपाणामभेदात् । अवतारदशकमहिम्नोऽपि पूर्वं प्रस्तुतत्वकथनाच्च ॥ ५३ ॥

योब्रूते वैदिकच्छद्मी हन्ति मातरमेव सः । विश्वापकारकरणं तस्य लीलेति मे मतिः ॥ ४६ ॥
किं च कृष्णः किल ब्रह्मरुद्राद्युत्कृष्टचेतनः । अपकृष्टाश्चेतनाश्च ब्रह्माद्यास्तत एव यत् ॥ ४७ ॥
सिद्धास्तज्जीवपरयोर्विरुद्धाऽभूच्चिदेव हि । चिन्मात्रौपाधिकं नीचोच्चत्वं चिन्नाश एव हि ॥ ४८ ॥
नश्येन्नापरथा तस्मात् नित्या जीवेशयोर्भिदा। विष्णोः सर्वोत्तमत्वं च चित्स्वभावनिबन्धनम् ॥ ४९ ॥
निराबाधं च नित्यं च कथं नाभूद्विचार्यतां । ब्रह्मेशाद्यानतैषीको रामः किल महाबलः ॥ ५० ॥
तृणास्त्रेण रिपुं जिग्ये वयं च तदनुव्रताः । जयेमहि तृणेनैव सदभि प्रतिवादिनः ॥ ५१ ॥
यद्धस्तस्पर्शमात्रेण तृणं च ब्रह्मपूर्वकैः । नतं बभूव तं देवं को वा देवोऽतिवर्तते ॥ ५२ ॥
एवं च रामदेवस्य जीवात्यन्तविभिन्नतां । देवेशत्वं च संसत्सु को वा तेन न साधयेत् ॥ ५३ ॥

पूर्वमस्पष्टतयोक्तमिदानीं स्पष्टयति—**पश्येति** । नामबलम् ब्रह्मरुद्राद्युत्कृष्टचेतन इति नाम्नो बलम् । वासुदेवसहस्रनाम्नांरुद्रकृतत्वात्तस्य-लिङ्गानुशासनत्वं बोध्यम्॥ ५४ ॥ अभेदज्ञानस्य मिथ्याज्ञानत्वं दासोऽहमिति ज्ञानस्य तत्त्वज्ञानत्वं च भागवतस्थ पौंड्रकवासुदेवकथया स्पष्टयति

त्वं वासुदेव इत्यादिना तदेव तदित्यन्तेन ॥ ६६ ॥ 'परासिनापरं च्छिन्द्याच्छस्त्रशिक्षाविचक्षणः' । इतिन्यायात्पराभ्युपगतप्रतिकर्मव्यवस्थया व्यावहारिकतां निरस्य प्रपञ्चपारमार्थ्यं समर्थयंते प्रतिकर्मव्यवस्थामेव निराचिकीर्षुः किमपि कौतुकमारभते ॥ **प्रतिकर्मेत्यादिना** ॥

पश्य नामबलं विष्णोस्तद्धि लिङ्गानुशासनम् । यदीदमवजानासि कुप्येत्तर्हि शिवस्तव ॥ ५४ ॥
त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः । इति प्रस्तोभितोबालैर्मेने स्वात्मानमच्युतम् ॥ ५५ ॥
कदाचित्पौंड्रकोनाम काशिराजः प्रतापवान् । वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् ॥ ५६ ॥
कत्थनं तदुपाकर्ण्य पौण्ड्रकस्याल्पमेधसः । उच्चकैरुग्रसेनाद्याः सभ्याः प्रजहसुस्तदा ॥ ५७ ॥
इति भागवते स्पष्टं सोऽहंभावोह्यनेकधा । यतोविनिन्दितस्तस्मात्को वा तं भावयेद्बुधः ॥ ५८ ॥
अच्युतोऽहमनन्तोऽहं गोविन्दोऽहं सनातनः । इति मायावादिनां या भावना नित्यकर्मणि ॥ ५९ ॥
अहमेवाच्युतोऽस्मीति वासुदेवोऽहमित्यपि । या भावना पौण्ड्रकस्य को विशेषोऽनयोर्वद ॥ ६० ॥
वंचनं किल तज्ज्ञानं बालानां भाषितं किल । दैत्यः किलाधिकारीच्च यः कृत्रिमचतुर्भुजः ॥ ६१ ॥

सा कृतिः प्रतिकर्मव्यवस्थारूपा प्रक्रिया । प्रतिज्ञातं साधयन्नेव दूषणाय परोक्तमनुवदति **यदित्यादिना** । अत्रेयं परप्रक्रिया' घटपटादीनां सर्वेषामारोपितत्वेन तत्तदधिष्ठानभूतं ब्रह्मचैतन्यमेव तत्तदर्थानां भ्रमः । अधिष्ठानचैतन्यस्यावृतत्वेऽपि इन्द्रियसम्प्रयोगे तद्वागन्तःकरणं

बहिर्निर्गत्य घटादिविषयाकारेण परिणमते । सेयं वृत्तिरित्युच्यते । तयाऽऽवरकाज्ञाननाशेऽभिव्यक्तमधिष्ठानचैतन्यं घटादिविषयान् प्रकाशयति । ज्ञातृजीवचैतन्यं तु परिणतायामन्तःकरणवृत्तौ प्रतिबिंबितं सदभिव्यक्ताधिष्ठानचैतन्येनैकीभूय ज्ञातो घटइत्यादि व्यवहारभाग्भवतीति' । अत्र यद्यपि परेषां बहवो मतभेदाः सन्ति तथाऽपि सामान्यत एव परमतं संगृह्य यथामति मूलंयोजयामः । एवं परः स्वकल्पने 'तमेव

रथस्थहेमगरुडारूढो यश्च पथिव्रजेत् । अज्ञोऽल्पमेधाः स किल कत्थनं किल तद्वचः ॥ ६२ ॥
सभ्यानामपहास्यं चेत्याह निन्दां पदे पदे । यदि तत्त्वज्ञानमिदं तर्हि निन्दां शुकोऽसकृत् ॥ ६३ ॥
कुतश्चकारयोगीन्द्रो महासंसदि योगिनाम् । ज्ञानिनोऽस्य शिरः कस्माच्छुतदेवगृहातिथिः ॥ ६४ ॥
चिच्छेद भगवान्कृष्णः कुपितो दूतवार्तया । शुकस्य सूत्रकारस्य राज्ञो राजसभासदाम् ॥ ६५ ॥
कृष्णस्य चाप्रियं ज्ञानं मिथ्याज्ञानं न संशयः । दासोहमिति यज्ज्ञानं तत्त्वज्ञानं तदेव तत् ॥ ६६ ॥
प्रतिकर्मव्यवस्थाया मायिनां हृदयंगमा । व्यावहारिकतापक्षं प्रतिक्षिप्य तयैव तु ॥ ६७ ॥

भान्त'मिति श्रुतिर्मूलमित्याह । प्रकाशरूपं ब्रह्मचैतन्यमनुसृत्य सर्वं भातीति तदर्थात् । एवं सर्वत्र भ्रमस्याधिष्ठानचैतन्यरूपत्वेऽपि प्रातिभासिकशुक्त्यादिभ्रमेषु विशेषः कल्पितः यच्छुक्तिरूप्यज्ञानं साक्षिरूपं; शुक्तिरूप्यस्य प्रातिभासिकतयाऽऽन्तरत्वात् । न तु शुक्त्यवच्छिन्नाधिष्ठानचैतन्यरूपमिति । अत्र च सर्वभ्रमस्याऽधिष्ठानब्रह्मचैतन्यरूपत्वं, शुक्तिरूप्यभ्रमस्य तु ज्ञातृसाक्षिरूपत्वमिति द्वैविध्यंकिन्निमित्तम् । सर्वत्राऽप्यैकरूप्य-

मेवास्तु । तमेव भान्तमिति श्रुतेः सर्वसाधारण्यात्सङ्कोचे कारणाभावादिति प्रष्टुराशयः । ननु कथमधिष्ठानचैतन्यस्य शुक्तिरूप्यादिज्ञानरूपत्वम् । तस्याविद्यावृतत्वात् । अतः श्रुतेः सङ्कोचः कार्यइत्यत आह । **अधिष्ठानस्य चेति ॥ नहि दूषणमिति ॥** अस्त्यविद्याया अंशद्वयं परमते । आवरणशक्तिर्विक्षेपशक्तिश्चेति । तत्राद्या विषयप्रकाशं प्रतिबध्नाति । द्वितीया तु तांस्तानारोपितानर्थान्भ्रमांश्च सत इति ।

प्रपंचपारमार्थ्यं च तयैव प्रतिपाद्य हि । अन्ते तामेव या हन्ति सा कृतिः कैर्नमान्यते ॥ ६८ ॥
यत्तत्तद्वस्तुविभ्रांतावधिष्ठानं तदेव यः । तत्तद्भ्रम इति प्राह स प्रष्टव्यः सभान्तरे ॥ ६९ ॥
एवं चेच्छुक्तिरूप्ये च शुक्त्यवच्छिन्न चित्क्रिया । अधिष्ठानचिदेवैव भ्रमेऽप्यस्तु द्वयी गतिः ॥ ७० ॥
कस्मात्तं भांतमित्यस्याः सङ्कोचश्च श्रुतेः कुतः । अधिष्ठानस्य चाविद्यावरणं न हि दूषणम् ॥ ७१ ॥
विक्षेपशक्तितोभ्रान्तार्थोल्लेखोऽपि न दूषणम् । यद्येवमेव सर्वत्राप्यस्त्वित्यङ्गीकृतं त्वया ॥ ७२ ॥
तांस्तान्भ्रमांस्तु जीवेषु केनोपायेन नेष्यसि । उपाध्युपहितैरंशैस्तैरस्यैक्यास्यसंभवात् ॥ ७३ ॥

अज्ञानं भ्रमतद्विषयोभयात्मना परिणमत इति परैरङ्गीकारात् । अतोऽधिष्ठानचैन्यस्याऽवृतत्वेन शुक्तिप्रकाशाभावेऽपि अविद्यागतविक्षेपशक्त्या शुक्तिरूप्यादिभ्रमाङ्गीकारे नैव दूषणमिति भावः । यदि परो वैयात्यात्सर्वत्राऽप्यधिष्ठानचैतन्यस्य भ्रमरूपत्वमङ्गीकुर्यात्तदाप्याह । **यद्येवमेवेति ॥ ७३ ॥** अत्र च कल्पे सर्वमपि ज्ञानमधिष्ठानब्रह्मचैतन्यरूपमासोत् । ज्ञातो घट इत्यादिव्यवहारस्तु घटादिगन्धानभिज्ञस्य जीवचैतन्य-

ख्येति किं केन सङ्गतम्? न चाभिव्यक्ताधिष्ठानचैतन्यस्य वृत्तिप्रतिफलितचैतन्येनैक्याद्घटादिज्ञानं जीवसम्बन्ध्येवेति वाच्यम् । यतो वृत्तिविषयरूपोभयोपाध्युपहितयोरनयोश्चैतन्ययोर्विशिष्टत्वेनैक्यायोगात् । यदि घटाद्याकारवृत्तिरूपज्ञानेनैव जीवो भ्रमीत्युच्यते तर्हि सर्वत्र वृत्तिरेव तत्तद्भ्रमोऽस्तु किमश्रुतादृष्टेदृशभ्रमकल्पनया फलम्। 'तमेव भान्तमिति' श्रुतिस्तु 'यदादित्य गतं तेज' इति स्मृत्या सूपपादेति ।

यद्घटोपहितोंशोऽसौ वृत्तिग्रस्तोऽपरस्तव । यदि वृत्त्या भ्रमी सोऽपि तर्हि सर्वत्र विभ्रमः ॥ ७४ ॥
(सैवा) सर्वोऽस्तु किमपूर्वैतद्भ्रमकल्पनया फलम् । भान्तं तमनुभातीति श्रुतिः सूर्यं प्रशंसतु ॥ ७५ ॥
न चायमपि पक्षस्ते शोभतेऽक्षार्थसङ्गमात् । भवन्ती घटधीर्यस्माद्घटसत्तामपेक्षते ॥ ७६ ॥
श्रुतियुक्ती समुल्लंघ्य भ्रान्तिः सा(न्तिसा)क्ष्येव तत्र चेत् । घटेऽपि तद्वदेवास्तु द्वेधा साध्यं न किंचन ॥ ७७ ॥
नचैतदपि युक्तं ते दृश्येवारोपवादिनः । दृश्यानां घटपूर्वाणां यस्साक्ष्यंतर्बहिर्हिते ॥ ७८ ॥
यदि रूप्यभ्रमादौ च दृष्टं पक्षं त्यजन्निह । अधिष्ठानचितं तत्तद्भ्रान्तिं वदसि तच्चन ॥ ७९ ॥

अन्यथा ब्रह्मणो ज्ञानरूपत्वेनैकत्वेन च भान्तमनु इति शतृप्रत्ययान् शब्दयोरयोगात् । गच्छन्तमनुगच्छतीत्यादौ क्रियाद्वययोग एवानुशब्द-प्रयोगात्प्रकृते प्रकाशद्वयाभावादित्यपि ज्ञेयम् ॥ ७५ ॥ वृत्तेरपीन्द्रियसन्निकर्षजन्यत्वेन सन्निकर्षस्य सम्बन्धिघटादिसत्तासापेक्षत्वेन भ्रमात्प्रागेव विद्यमानानामर्थानां मिथ्यात्वायोगात् । वृत्तिः घटादिभ्रम इत्यपि पक्षो न तव श्रेयस्कर इत्याह । **न चेति** ॥ ७६ ॥

तमेव भान्तमिति सर्वसाधारणीं श्रुतिं, चिदन्यत्व साधिकां रूप्यादिभ्रमस्येन्द्रियजन्यत्वयुक्तिञ्च तिरस्कृत्य यदि परो रूप्यादि भ्रमः साक्षिरूप एवेति ब्रूयात्तदाप्याह ॥ **श्रुतीति** ॥ घटादिभ्रमेऽपि अधिष्ठानचैतन्यरूपतां परित्यज्य साक्षिरूपत्वमेव स्वीकुरु । द्वैविध्यकल्पने प्रयोजनाभावादिति भावः । तत्र शुक्तिरूप्यादिस्थले । भ्रान्तिसाक्षी शुक्तिरूप्यादिभ्रान्तिरूपः साक्षीत्यर्थः ॥ सविसर्गपाठे तु भ्रमः साक्षिरूप इति सुगम एवार्थः ॥ ७७ ॥ द्वैविध्यप्राप्तिभिया घटादौ सर्वत्रापि भ्रमस्य साक्षिरूपत्वं परेण तु नाऽभ्युपगन्तुं शक्यमित्याह ॥ ॥ **नचेति** ॥ घटादीनां बहिष्ठत्वेन साक्षिणस्त्वांतरत्वेन तयोरधिष्ठानाध्यस्तभावानुपपत्तेः ॥ त्वया दृशि दृश्यानामध्यासवर्णनात् ॥ ७८ ॥

अधिष्ठानस्यावरकाज्ञानमध्यस्तवस्तुषु । उपादानं तव मते तन्नाशेकारणक्षयात् ॥ ८० ॥
वस्तुनाशोऽप्यवश्यंस्यात्तद्घटो नेति धीर्भवेत् । घटोऽस्तीति भ्रमस्त्रीया द्वेधा सा विधवाऽप्यभूत् ॥ ८१ ॥

एतद्भियैव घटादिभ्रमस्य रूप्यादिभ्रमवत्साक्षिरूपत्वं न किंत्वधिष्ठानचैतन्यरूपत्वमुच्यत इत्यतस्तच्च नेत्याह— **यदीति** ॥ ७९ ॥ नेत्यत्र हेतुमाह—**अधिष्ठानस्येति** ॥ उपादेयस्योपादानसत्तानियतत्वेनोपादाननाशे तन्नाशावश्यं भावात् । घटाकारवृत्या घटोपादानाज्ञाननाशे घटस्यापि नाशापत्या तत इह घटो नास्तीति धीः स्यात् ॥ घटोऽस्तीति भ्रमस्तु निर्निमित्तः । तथाच घटादिज्ञानस्य वृत्तिरूपत्वे उक्तरीत्या घटादीनां पूर्वमेव सत्त्वेन विद्यमानार्थविषयिणी वृत्तिर्न भ्रमः तज्ज्ञानस्य चैतन्यरूपत्वे तदाप्युक्तरीत्या घटादीनां नाशेन अस्तीति धीर्नोपपद्यते इति वृत्तिरूपत्वे चिद्रूपत्वे च घटोऽस्तीत्यादि धीर्निर्निमित्ततया भ्रमरूपा नासीत् । अतो द्वेधाऽपि विधवैव उपपादकशून्यैव ।

धीरिति स्त्रीलिंगनिर्देशादेवमुक्तमिति ध्येयम् ॥ ८१ ॥ तव पूर्वेषां मतरक्षा तस्य शिक्षणमेवेति दर्शयितुमाह **यदीति** ॥ ८२ ॥ यदा चैतन्यावरकमज्ञानं निवर्तते तदा ह्यधिष्ठानचैतन्यं घटारोपरूपं भवति किल तव मते । अत्र च कल्पे अज्ञाननाशे तदुपादानककार्यनाशात् नास्तीति धीः स्यात्; न त्वस्तीत्येकं दूषणमभिहितमेव । दूषणान्तरमुच्यत इत्यर्थः । तदेवाह । **दोषरूप इति** ॥ आवरणविक्षेपाख्यशक्तिद्वययुताया अविद्याया नीचशक्तिद्वययुतत्वेन पिशाचोतुल्याया भ्रमविरोधित्व रूपविद्यागुणो नोचितः । किन्तु भ्रमकारणत्वरूपदुर्गुण

यद्येवमपि पूर्वेषां मतं रक्षितुमिच्छसि । तथाऽपि तस्य शिक्षैव भवेत्पश्याम्य कौशलम् ॥ ८२ ॥
घटाधिष्ठानचैतन्यं घटारोपस्तदा किल । निवर्तेत यदाऽज्ञानं चैतन्यावरकं स्वतः ॥ ८३ ॥
अज्ञाननाशपक्षेऽस्मिन्कार्यनाशो भवेदिति । प्रागुक्तदोषे सत्येव चान्यो दोषोऽपि कीर्त्यते ॥ ८४ ॥
दोषरूपे तवाज्ञाने भ्रमकारणतोचिता । न तु भ्रमविरोधित्वरूपदिव्यगुणात्मता ॥ ८५ ॥

एवोचित इति भावः । परमते अज्ञानं दोषरूपं दोषस्य भ्रमकारणत्वं प्रसिद्धमेव । तद्वतावरणविक्षेपरूपशक्तिद्वयविचारणेऽपि तद्भ्रमस्यैवानुकूलम् । अपि च सृष्ट्यादौ विश्वभ्रमोऽप्यज्ञानादेवेति परो वक्ति । एवञ्च चैतन्यरूपघटादिभ्रमस्याज्ञानविरोधित्वमयुक्तम् । अस्ति च विरोधित्वं परमते । वृत्त्याऽज्ञाननाशे सत्येव घटादिभ्रमाङ्गीकारात् । अन्यत्रापीदमुक्तं ग्रन्थकृता । 'पश्चात्तु तन्निरोधायकिमज्ञानं तपोऽचरत्' इति । तन्निरोधाय । भ्रमनिरोधाय ॥ ८६ ॥ अपहसति । **तस्मादिति** ॥ प्रतिवादिनां पुरतः स्थातुमशक्या या स्वप्रक्रियारूपावस्था; तया

चलचित्तस्त्वद्गुरुः स्वमतमेव विस्मृतवानिति ॥ ८७ ॥ एवं दोषान्तरकथनं सत्त्वादेव; न तु पूर्वदोषस्य वारणार्हत्वादित्याह । **प्रमाणेति** । प्रमाणभूता या अधिष्ठानचित् । वैकल्यादर्थानुल्लेखित्वात् । तत्र हेतुर्दोषेणावृतत्वत इति । जडपदार्थस्य चिताऽप्रहणे आवृतत्वमेव निमित्तं; न तु दोषान्तरमिति त्वत्पूर्वेषामपि सम्मतम् । अतउपादानमेवावरणमिति आवरणनाशे तदुपादेयकार्यनाशो ध्रुव एव । आवरणमुपा-

किंचावरणविक्षेपशक्तिद्वययुतैव या । अविद्याख्यपिशाची सा कथं विद्यागुणं भजेत् ॥ ८६ ॥
तस्मात्स्वप्रतिकर्माख्यदुःस्थावस्थानवस्थधीः । अज्ञानोपादानमतं विसस्मार गुरुस्तव ॥ ८७ ॥
प्रमाणाधिष्ठानचितो वैकल्यादावृतत्वतः । अज्ञानाख्येन दोषेण जडाग्रहणमिष्यते ॥ ८८ ॥
न तु दोषान्तरं तत्रेत्याहुस्त्वत्पूर्वसूरयः । अधिष्ठानावरकता जडोपादानताऽपि च ॥ ८९ ॥
एकस्यैव यतस्तस्मात्कार्येनाशो भवेद्ध्रुवम् । अतो दोषान्तरस्याऽपि सम्भवादेव कीर्तनम् ॥ ९० ॥
अज्ञानस्य निवृत्तिश्च वृत्त्या प्रत्यक्षरूपया । सा निर्दोषार्थसंयोगसापेक्षेति च ते मतम् ॥ ९१ ॥

दानाज्ञानञ्च यदि भिन्नं स्यात्तर्ह्यावरणनाशेऽप्युपादाननाशाभावान्नोक्तदोषः । तव मते चोभयमेकमेवेति नोक्तपरिहारसम्भावनापीति भावः ॥ ९० ॥ इदानीमारोपतः पूर्वमेव विद्यमानं घटादिकं ब्रह्मवदबाध्यमेवेति वक्तुं आरोपात्पूर्वमपि सत्त्वं सदृष्टान्तमुपपादयति । **अज्ञानस्येत्यादिना** । घटाद्यारोपरूपे चैतन्ये हि घटादीनामध्यासः दृश्येव दृश्याध्यासाङ्गीकारात् । आरोपश्च वृत्त्याऽज्ञाननाशे-

सति । वृत्तिश्च सन्निकर्षे सति । स चार्थे सत्येव । अन्यथा शुक्तिरूप्यं कुतो नाक्षसन्निकृष्टम् । तत्प्रत्यक्षं वा कुतोऽसन्निकृष्टार्थविषयकमिति सर्वसम्मतिः । अत आरोपात्पूर्वमेव सद्भूटादिकमनारोपितमत एवाबाध्यं ब्रह्मवदिति भावः ॥ ९५ ॥ उक्तमर्थं विशदयति **व्यावहारिकते त्यादिना**— इदानीमेव बाधोपेतया भ्रान्त्या प्रतीयमाना सत्ता प्रातिभासिकी । दीर्घभ्रान्त्या प्रतीयमाना तु व्यावहारिकी । भ्रान्तेः

असन्निकृष्टप्रत्यक्षं रजतादि भ्रमेपरं । अन्यत्रार्थेन संयुक्तमिन्द्रियं करणं त्विति ॥ ९२ ॥
भित्तिव्यवहितार्थस्याज्ञानात्सर्वस्य सम्मतम् । अर्थे सत्येव संयोगो दृष्टो नापरथा क्वचित् ॥ ९३ ॥
कस्माद्वा नाक्षसंयोगि शुक्तिरूप्यं विचारय । एवं चारोपतः पूर्वं विद्यमानं घटादिकम् ॥ ९४ ॥
अनारोपितमेवासीत्तवापि च ममापि च । अभूदनारोपितत्वादबाध्यं च तदात्मवत् ॥ ९५ ॥
व्यावहारिकता तस्मात्कस्य वास्याद्विचारय । इदानीं बाधितभ्रान्त्या या सत्तोल्लिखिता भवेत् ॥ ९६ ॥
प्रातिभासिकसत्ता सा दीर्घभ्रान्त्यैव ते मते । या सत्तोल्लिख्यते सा हि व्यावहारिकतोच्यते ॥ ९७ ॥

पूर्वं विद्यमाना घटादिसत्ता तु कथं व्यावहारिकी । किं तु ब्रह्मसत्तोपमैव । अत एव त्रिकालज्ञेन भगवता व्यासेनापि स्वत एव भयवतः परतो भयं किं वक्तव्यमिति कैमुत्यसिद्धोर्थः 'द्रोग्धुर्वै परतो भयं' इत्सूचि ॥ यतः स्वाभ्युपगतया प्रतिकर्मव्यवस्थयैव स्वानिष्टं परेष्टं च प्रसक्तमिति— स्वत एव भयं चेत् इतरैस्त्वच्छास्त्रदूषणे कृते उत्तरासमर्थस्य तव परेभ्यः भयमस्तीति किं वक्तव्य-

मिति ॥ १०० ॥ चैतन्यमिति ॥ द्वेधा सा विधवाप्यभूत् इत्यत्र कृतविवरणमिदं पद्यम् ॥ १०२ ॥ यदि घटाद्यधिष्ठानचैतन्य एव घटादिभानं नाम घटादिज्ञानं यदि बाह्याधिष्ठानचैतन्यरूपमित्यर्थः ॥ तदा हृद्गतजीवचैतन्ये व्यवहारः किं निमित्तः । यदि बाह्यान्तरचितो-

आरोपात्प्राक्तु या सत्ता ब्रह्मसत्तोपमैव सा । प्रतिकर्मव्यवस्था या भवद्भिरुररीकृता ॥ ९८ ॥
चित्रं मैवाभवत्पश्य प्रत्यर्थिमतसाधिका । अतः सभायां हास्यं ते मतमासीन्न संशयः ॥ ९९ ॥
व्यासोऽपि भगवानाह द्रोग्धुर्वैपरतो भयम् । विश्वस्मै हुङ्यतः पश्य स्वत एव भयं तव ॥ १०० ॥
कैमुत्यात्तद्भयं च स्यात् व्यासेन च निरूपितम् । चैतन्यं न घटारोपः प्रागर्थं यदपेक्षते ॥ १०१ ॥
वृत्तिस्तु न घटारोपः प्राक्कुयत्साप्यपेक्षते । अतो द्वेधाऽपि नैवाभूदारोपाद्यं मते तव ॥ १०२ ॥
व्यावहारिकतावादस्तस्मादेशांतरं गतः । घटाधिष्ठानचैतन्ये घटोल्लेखो भवेद्यदि ॥ १०३ ॥
हृदिस्थ जीवचैतन्ये व्यवहारस्तदा कुतः । ऐक्याच्चेत्सर्वजीवानां सदा स्याद्व्यवहर्तृता ॥ १०४ ॥
अथान्तःकरणे चक्षुःसहायेन बहिर्गते । केदारान्तस्थजलवदर्थाकारविवेकवान् ॥ १०५ ॥

रैक्यादिति ब्रूषे तदा सर्वचितामैक्यात्कुतो न सर्वत्र तद्व्यवहार इति भावः ॥ १०४ ॥ यज्जीवचैतन्यं चक्षुरादिद्वारा बहिर्निर्गत्य घटाद्याकारेण परिणतस्वांतःकरणवृत्तौ प्रतिफलितं सदभिव्यक्तघटाधिष्ठानचैतन्येनैकतामनुसन्धत्ते । तस्य तद्घटव्यवहारो न सर्वस्येति पराशय-

त्यक्तुमशक्तो ग्रन्थकृत्पुनरपि दूषयितुमनुवदति । **अस्यांचेति** ॥ चेत्सत्याऽपिचेत्यर्थः ॥ एवं वदता दर्पणाभावे तत्स्थप्रतिमुखाभाववत्तस्या-वृत्तेर्नाशे प्रतिबिंबताऽपि नष्टेत्यवश्यं वाच्यम् ।. तथा चैकीभूतस्य प्रतिफलितचिद्रूपस्य घटज्ञानस्यैवाभावे नष्टस्य तस्य जीवहृदि आगमनं कथं तेन च व्यवहारः कथमित्यर्थः ॥ ११२ ॥ वस्तुतस्तु चितोरैक्यमेव नोपपद्यत इत्याह— **किंचेति** अविद्यानाशेऽपीत्यनेनाभिव्यक्तत्वं कथं-चित्स्यादित्यङ्गीकरोति ॥ उपाधिद्वययुतयोर्भेदस्तवापि सम्मत इत्याह— **उपाधीति** ॥ **यदीति** ॥ एतद्दोषपरिहाराय वृत्तिप्रतिफलिता

अस्यांच त्रिक्षणस्थायिवृत्तौ चित्प्रतिबिम्बता । तस्या नाशक्षणे नष्टा पुनरायात्कथं हृदि ॥ ११२ ॥
किंचाऽविद्याविनाशेऽपि कथमेकत्वमेतयोः । यतोवृत्तिघटाख्योपाधिद्वयोपहितौ हि तौ ॥ ११३ ॥
उपाधिभेदे सति तु भेदोऽवश्यं तवैव हि । यदिवृत्तिगताचिच्च घटं पश्येत्स्वशक्तितः ॥ ११४ ॥
तर्ह्यारोपातिरिक्तोऽपि सम्बन्धोऽभूत्तयोर्बलात् । एवं चाबद्धशकलमालाभिः किं प्रयोजनम् ॥ ११५ ॥

ज्ञातृचिदेव स्वशक्तितो घटादिकं विषयीकरोति । नतु घटाधिष्ठानचैतन्ये घटादिविषयकत्वमुक्त्वा तेन वृत्तिप्रतिफलितचितोऽभेदं ब्रूम इति भावः ॥ ११४ ॥ अत्र पूर्वदोषाभावाद्दोषांतरमाह—**तर्हीति** ॥ अधिष्ठानचैतन्ये घटादीनामारोपः पराभ्युपगतः ॥ न तु वृत्तिप्रतिफलितचै-तन्ये । अतो वृत्तिप्रतिफलितचैतन्यघटयोरध्यासाध्यस्तभावरूपसंबन्धाभावेनातिरिक्त एव कश्चित्सम्बन्धोऽभ्युपेय इति भावः । न चेष्टापत्तिः । परेण हि आध्यासिकसम्बन्धातिरिक्तदृग्दृश्यसम्बन्धानुपपत्त्या अधिष्ठानचैतन्यस्य घटादिज्ञानरूपताभ्युपगता ॥ अतिरिक्तसम्बन्धस्याभ्युपगमे आव-

श्यकी वृत्तिरेव घटादिधीः स्यात् ॥ फलानुसारेण कस्यचिद्योग्यसंबन्धस्य कल्पयितुं शक्यत्वात् ॥ तथा चैकैकस्य घटाद्यर्थस्यैकैकं ब्रह्मखण्ड-रूपमधिष्ठानचैतन्यमितिकिमर्थमप्रामाणिक्यः ब्रह्मशकलपरम्पराः कल्प्यंत इत्यापातादिति । अत्रानन्तघटाधिष्ठानचैतन्यरूपा एकामाला तादृशवृत्ति-प्रतिफलितचैतन्यरूपापरा । अन्तःकरणावच्छिन्नचैतन्यरूपाऽन्या । इति मालाभिरित्युक्तम् ॥ ११६ ॥ ज्ञातृचैतन्यस्यैव वृत्तौ प्रतिफलनं निरा करोति । **अस्वच्छेत्यादिना—स्यात्प्रतिबिंम्बनमित्यंतेन** । अयमाशयः । देहांतरितचैतन्यस्य घटस्य च सन्निहितत्वेन तदाकारेण परिण-

आवश्यकी वृत्तिरेव किं न स्यात्तत्तदर्थधीः । तयोः फलबलादेव सम्बन्धोऽप्यस्तु कश्चन ॥ ११६ ॥
दृष्टकार्यानुसारेण कस्य कस्य न कल्पना । अस्वच्छदेहान्तरितचैतन्यं घटसन्निधौ ॥ ११७ ॥
बहिः परिणमद्वृत्तौ कथं स्यात्प्रतिबिम्बितम् । हस्तेनान्तरितादर्शे यन्मुखप्रतिबिम्बनम् ॥ ११८ ॥
नेक्षते क्वापि कस्यापि तद्देहान्तरितोऽपि न । न चेद्देहान्तरं श्लिष्यद्देहान्तः संस्थितैव चित् ॥ ११९ ॥

मद्वृत्तौ ज्ञातृचैतन्यं प्रतिफलतीति परो वक्ति । नैतद्युक्तम् । यतो हस्तेनान्तरितेऽपि दर्पणे मुखस्य प्रतिफलनं कोऽपि कदाऽपि कस्यापि न पश्यति । अतो नास्ति तत् । तद्वदस्वच्छदेहान्तरितचैतन्यस्य घटाद्याकारवृत्तौ प्रतिफलनं नोपपद्यत इति । न चेदेवं देहान्तरमालिंगता देहान्तरेणान्तरिताऽपि चिदपरोक्षवृत्तौ प्रतिफलितासती घटादिवदेवालिंगितदेहादिगतं तज्जीवदृष्टं सुखादिकमनुभवतु । मुखप्रतिमुखयोरिद-मन्यदिदमन्यदिति भिन्नतया सर्वानुभवसिद्धयोरबद्धमैक्यं वदतः पूर्वोक्तादन्यगतसुखानुसंधानरूपादबद्धान्तरादपि का भीः? तस्माज्जडस्य

विकारवतो मुखस्यैव यदा न प्रतिमुखादभेदः तदा किं वक्तव्यम्? निर्विकारायाश्चितो वृत्तिप्रतिफलिताभेदो नास्तीति । तथा च जीवचैतन्यवृत्तिप्रतिफलितचैतन्ययोर्भिन्नयोरेव बिम्बप्रतिबिंबनमिति कैमुत्यसिद्धम् । एवं च घटवार्तानभिज्ञस्य ज्ञातृचैतन्यस्य घटादिव्यवहारो नोपपद्यत इत्युक्तदूषणं दुरुद्धरमिति हृदयम् ॥ १२१ ॥ परमतेऽयं घट इत्याकारो भ्रमश्च नोपपद्यत इत्याह— **किंचेति** । घटाद्यधिष्ठानचैतन्यं यदि घटादिकं स्वस्मिन्नध्यस्य तत्तद्भ्रमरूपं स्यात्तदाऽऽत्मनि देहान्तःकरणादिकमध्यस्य गौरोऽहं कर्ताऽहं मयि कर्तृत्वमित्यादि रूपेण जाय-

तस्यापरोक्षवृत्तौ च फलिता तद्वदेव हि । तदृष्टमर्थं जानातु किमबद्धांतरे भयम् ॥ १२० ॥
यतोऽन्यदर्पणेऽप्यन्यवक्त्रप्रतिकृतिर्भवेत् । ततो भिन्नचितोः कैमुत्येन स्यात्प्रतिबिम्बनम् ॥ १२१ ॥
किंचाधिष्ठानचैतन्यमन्योन्यात्मकतां घटे । अध्यस्य तं घटं पश्येन्नोचेत्कुप्येदुरुस्तव ॥ १२२ ॥
गौरोऽहमितिवत्तस्माद्घटोऽहमिति धीर्भवेत् । देहान्तस्थितजीवोऽपि घटोऽहमिति पश्यतु ॥ १२३ ॥

मानभ्रान्तिवद्घटोऽहं मयि घटत्वमिति वा भ्रांतिः स्यान्नत्वयं घट इति । तादृशचैतन्याभेदं स्वस्मिन् मत्वा व्यवहरन् जीवोऽपि तथाविधज्ञानवत्त्वेनाहं घट इति व्यवहरेत् । अन्यथाऽन्योन्यस्मिन्योन्यात्मकतामन्योन्यधर्माश्चाध्यस्येत्यादि वदंस्त्वद्ग्राष्यकारः कुप्येदिति भावः ॥ १२३ ॥ इदानीं जगतः सत्यत्वं पररीत्यैव साधयितुमज्ञानोपादानकत्वारोपितत्वे परस्परविरुद्धे यथा स्यातां परप्रक्रियामनुवदन्नेव तथा दर्शयति ॥ **अज्ञानेत्यादिना** । वृत्त्याऽज्ञाननाशे सति अधिष्ठानचैतन्यानि तत्तदार्थभ्रमरूपाणि स्युः । सति चावरकेऽज्ञाने क्रमप्यर्थं विषयीकर्तुं चैतन्यानि

न शक्तानि । तच्चाज्ञानमनादित एव तानि चैतन्यान्यावृत्य तिष्ठतीति परेषां मतं । तस्य चावरकाज्ञानस्य विक्षेपाख्याः स्वाभाविक्यो विरुद्धाकार-जगत्परिणामहेतुभूताः शक्तयः पुराऽनादित एव सन्ति चैतन्यस्यातदाकारपरिणामात्मकोऽयं विवर्तस्तादृशशक्तिबलाद्भवति । तच्चाधिष्ठान-चैतन्यमज्ञानेनावृतत्वात्तानर्थान्नोल्लिखति । वैकल्येन जडाग्रहणात् ॥ तदुक्तं विवरणे 'प्रमाणवैकल्यादेव तदग्रहणोपपत्तेरिति' । व्याख्यातं च

घटं जानाम्यहमिति कस्माद्व्यवहरत्यसौ । अज्ञानापगमे तत्तदधिष्ठानचितोखिलाः ॥ १२४ ॥
तत्तदर्थभ्रमाश्च स्युरज्ञानावरणे च ताः । नार्थानुल्लिखितुं शक्तास्तच्चानादित एव ताः ॥ १२५ ॥
आवृत्य तिष्ठतीत्याहुस्तेषामित्थमभून्मतम् । चैतन्यावरकाज्ञानविक्षेपाख्याः स्वभावतः ॥ १२६ ॥
विरुद्धाकारतो वर्तमानस्य जगतः पुरा । विवर्तो ह्यतदाकारपरिणामात्मकोऽभवत् ॥ १२७ ॥
तच्चाधिष्ठानचैतन्यमज्ञानावरणात्तदा । तानर्थान्नोल्लिखेदेव वैकल्येन जडाग्रहम् ॥ १२८ ॥
यस्माद्ग्रन्थकृदेवाह प्रतिकर्मव्यवस्थितौ । विषयाणां विवेकाय तन्नाशोऽद्याप्यपेक्षते ॥ १२९ ॥

तत्वदीपने— 'प्रमाणस्याधिष्ठानचैतन्यस्य वैकल्यादविद्यावरणनिमित्तवैकल्यादेव तेषां घटादिजडपदार्थानामग्रहणोपपत्तेर्न पृथग्जडेषु भावरूपमज्ञानमपेक्षित'मिति ॥ १२८ ॥ कस्मिन्प्रकरणे परेणेदमभिहितमित्यत आह— **यस्मादिति** । तथाचावरणाज्ञाननाशो विषयोल्लेखाय-चिताऽपेक्ष्यते । सति चावरणे सा चित्तत्तद्भ्रमरूपा नैव भवेत् । चिति विद्यमानमावरणं जगदुपादानमिति परस्य सम्मतम् ॥ तथा च भ्रमात्पूर्व-

मेव विद्यमानस्याज्ञानोपादानकस्य जगतः अभ्रमसिद्धत्वं वाच्यमेव । ततश्चाज्ञानतः जगतः सृष्टिदशायामावरणस्यैवोपादानरूपाज्ञानस्य सत्वेन जगद्भ्रमोऽपि [illegible] न भवेदिति विचारय । न च भ्रमात्पूर्वं जगतः सत्वमेव नेति कस्याऽभ्रमसिद्धत्वमिति वाच्यम् । [illegible] ग्रहणमिति त्वयैव प्रलपितत्वात् । एवंचाज्ञानोपादानमतशोधने आरोपितमतं गतम् । आरोप-

तस्मादविद्यावरणं सति सन्निह तद्भ्रमः । तच्चावरणमज्ञानमुपादानतयाचिति ॥ १३० ॥
एवं चाज्ञानसिद्धत्वं सत्वं जगतोऽपि च । तदैव सर्वथा वाच्यं ततः सृष्टौ न तद्भ्रमः ॥ १३१ ॥
भ्रमस्यापादकत्वेन न सत्वमिति विचारय । अज्ञानोपादानमतादारोपितमतं गतम् ॥ १३२ ॥
आरोपितोपादानं चाज्ञानोपादानमतं भवेत् । वृत्त्याऽज्ञाननिवृत्तौ हि चित्यारोपो भवेत्तव ॥ १३३ ॥
घटादिकार्यं न पटादौ सर्वत्र परिदृश्यते । तदुपादानतां तस्य कोवदेत्कोविदः सुधीः ॥ १३४ ॥
तस्मादविद्याकार्यत्वात्सत्वाभासं मृषा जगत् । आरोपितत्वादपि च नासीज्जगदिदं मृषा ॥ १३५ ॥

शोधने चोपादानस्य [illegible] घटाकारवृत्त्याऽज्ञाननिवृत्तावेव घटादिभ्रमं परोक्षति । यन्नाश एव यत्कार्यं भवति तत्तदुपादानकमिति कोवा [illegible] ॥ १३४ ॥ निगमयति तस्मादिति । कुत इत्यत आह एकमिति । अविद्याकार्यत्वसंधानदशायामारोपि[illegible] । इतरप्रत्यववत इति मिथ्यात्वसाधकहेतोरसिद्धिरिति भावः । दृढमूलत्वादेव तयोः

शिखामातपोऽपि न तपेत् ॥ एवं प्रत्यक्षागमसिद्धसत्त्वत्ववतो जगतोऽपि ज्ञानेनाऽपि बाधोनस्यादित्यर्थान्तरन्यासः । परमते ज्ञानमज्ञानस्यैव विरोधीति व्याप्त्यभ्युपगमेन ज्ञानमपि जगतो न विरोधीति तत्त्वम् । अपहसति । **दुर्घटत्वमिति** । त्वद्विद्यायाश्च त्वत्प्रक्रियाया अपीत्यर्थः ॥ १३७ ॥ तुष्यत्विति न्यायेनाविद्याकार्यत्वाभ्युपगमेऽपि न मिथ्यात्वं सिद्धयतीत्याह । **अविद्येति** । चण्डालीयशिशुरित्यति

एकं संधित्मतस्तस्मादपरं च्यवते तव । ज्ञानातपोऽपि न तपेद्दृढमूलतरोः शिखाम् ॥ १३६ ॥
दुर्घटत्वमविद्यायाः केवलं भूषणं न ते । पूर्वोत्तरविरुद्धायास्त्वद्विद्यायाश्च भूषणम् ॥ १३७ ॥
अविद्याकार्यमप्येतद्भवेदाविद्यकं परम् । मृषात्वं तस्य केन स्यात्किं चाण्डाली शिशुर्मृषा ॥ १३८ ॥
नचेदज्ञानसम्बन्धा_ब्रह्मापिस्यान्मृषा तव । आरोपाभावतो ब्रह्म सच्चेत्तेनैवसज्जगत् ॥ १३९ ॥
अविद्या ज्ञाननाश्याचेन्नाश्यनाशकताभिधः । विरोधोऽपि तयोर्भूयान्मिथ्यात्वं केन वा भवेत् ॥ १४० ॥
प्रकाशनाश्यतमसा किं मृषात्वमपेक्ष्यते । यत्प्राक्सतो नाश्यतैव दृष्टा घटपटादिके ॥ १४१ ॥

नीचकार्यत्वसाम्यादुक्तम् । अज्ञानसम्बन्धमात्रेण मिथ्यात्वोक्तौ ब्रह्मापि तत एव तथा स्यादित्याह । **नचेदिति** ॥ आरोपाभावाद्ब्रह्म सत्सच्चेज्जगदपि तत एव तथेति समः समाधिः ॥ १३९ ॥ अज्ञानस्य मिथ्यात्वेन तत्कार्यस्य जगतोऽपि मिथ्यात्वं परेण वक्तव्यम् । तत्राज्ञानमिथ्यात्वमेव न सिद्धयतीत्याह । **अविद्येति** ॥ मिथ्यात्वप्रयोजकस्याज्ञानकार्यत्वस्यानाद्यज्ञानेऽभावेन ज्ञाननाश्यत्वादेव तस्य मिथ्यात्वमिति

वक्तव्यम् । तच्च न युक्तम् । अनेन नाश्यनाशकभावरूपविरोधसिद्धावपि मिथ्यात्वं कुतः । नहि तमः प्रकाशनाश्यतापि मिथ्यात्वमपेक्षते । प्रत्युत तत्रेदं विपरीतमित्याह । यदिति । पूर्वोक्तरीत्याऽऽरोपात्पूर्वमेव विद्यमानं जगत्केनाऽपि मिथ्येति वक्तुं न शक्यम् । नचेद्ब्रह्मापि तथा स्यात् ॥ १४३ ॥ अनन्तान्यबद्धानि सन्ति चेदनूद्यन्तामित्यत आह । अनुवादोऽपीति ॥ १४४ ॥ मुख्यप्रकृतमुपसंहरति । सोऽहमिति ।

तस्मान्नाश्यस्य सत्त्वेव युक्तास्यानृतत्वसत्यता । यदारोपं विनैवास्ति न तस्योपायकोटिभिः ॥ १४२ ॥
नास्तिता शक्यते वक्तुं नोचेत्स्याद्ब्रह्मनास्तिता । तस्मादबद्धमालाया नान्तोऽस्ति भवतो मते ॥ १४३ ॥
अनुवादोऽप्यबद्धानां दोषायेत्युपरम्यते । स्पष्टत्वाद्ग्रन्थविस्तारभयाच्चोपरमाम्यहम् ॥ १४४ ॥
सोऽहंभावस्यैव निन्दा यतो भागवते कृता । ततोऽपि भेदः शङ्कां ते हुङ्कारेणैव वारयेत् ॥ १४५ ॥
दृग्दृश्ययोगायोगेन यद्यध्यासो निगद्यते । तर्ह्यध्यासमते योगाभावेऽपि ज्ञेयतास्ति किम् ॥ १४६ ॥
उताध्यासाध्यस्तभाव एव योगो विवक्षितः । आद्ये रूप्यभ्रमेज्ञेयं रज्जुसर्पादिकं भवेत् ॥ १४७ ॥

इयं कथा ग्रन्थकृता पूर्वमेव विवृता । शङ्काम् भेदस्याविद्यमानत्वादिशङ्काम् ॥ १४५ ॥ जगदारोपवादिमते किं ज्ञानज्ञेययोः सम्बन्ध-एव नास्ति; उताध्यासिक एव सम्बन्ध इति विकल्प्य क्रमेण दूषयितुं पृच्छति । दृगिति । सम्बन्धाभावेऽपि ज्ञेयतेति प्रथमकल्पं निगद्य । आद्य इति । सम्बन्धस्य प्रयोजकस्यानभ्युगमे रूप्यभ्रमे रज्जुसर्पादिकं घटज्ञाने पटादिकं विषयः स्यादिति भावः । शङ्कते ।

यदिति । घटाधिष्ठानचैतन्याज्ञानकार्यस्य घटस्य ज्ञानं तदधिष्ठानचैतन्यमेव पटस्य तु तदज्ञानकार्यत्वाभावान्न तद्विषयतेति भावः । परिहरति । **तर्हीति** । शुक्त्यज्ञानकार्यस्य रूप्यस्य शुक्तिविषयत्वं स्यात् । तथाचातिव्याप्त्यानेदं विषयलक्षणमिति भावः । अव्याप्तिमप्याह । **अज्ञानमिति** । अज्ञानस्य ब्रह्मणश्चाज्ञानकार्यत्वाभावात्क्रमेण स्वज्ञानचरमज्ञानयोर्विषयत्वं न स्यादित्यव्याप्तिरिति भावः । उक्तमनूद्य स्थलान्तरेऽप्यतिव्याप्तिमाह । **यदित्यादिना** । तदज्ञानकार्यस्य तज्ज्ञेयत्वे स्यादपि तदज्ञानकार्यस्य ज्ञानं तदेव । अतिव्याप्तत्वाच्च न तथा संभवतीति

घटदृश्येव दृश्यः स्यात्पटादिरपिते मते । यदज्ञानस्ययत्कार्यं तस्य ज्ञानं तदेव चेत् ॥ १४८ ॥
तर्हि शुक्तेरपि ज्ञेयं शुक्तिरूप्यं भवेत्तव । अज्ञानं वा कथं ज्ञेयं स्वज्ञानस्य भवेद्वद ॥ १४९ ॥
कथं च चरमज्ञाने ज्ञेयत्वं ब्रह्मणो भवेत । यदज्ञानस्य यत्कार्यं तस्य ज्ञेयं तदेव चेत् ॥ १५० ॥
यदज्ञानस्य यत्कार्यं तस्य ज्ञानं च तद्भवेत् । भूलग्नमृत्तिकाकार्ये घटेभूज्ञेयता भवेत् ॥ १५१ ॥

भावः । अधिष्ठानचैतन्याज्ञानकार्यस्य घटस्य ज्ञानं तदधिष्ठानचैतन्यमित्यभ्युपगमादेवमनूदितम् । एवमनूदितं दूषयति । **भूलग्नेति** । परमते घटस्य द्वे उपादाने । एकमधिष्ठानचैतन्यमपरं भूसंबद्धमृत्तिकादि । इदमेव क्रमेण विवर्तोपादानं परिणाम्युपादानमिति च गीयते । तत्राद्यमुपादेयादधिकसत्ताकम् । द्वितीयं तत्समसत्ताकमिति भेदः । उपादानाज्ञानकार्यत्वं चोपादेयस्य घटादेरंगीकृतं परेण । तथा च मृत्तिकाऽज्ञानकार्यस्य घटस्य मृत्तिकाज्ञेयता स्यादिति भावः । तथैव वक्तव्ये भूज्ञेयतास्यादित्युक्तिरत्नबद्धतास्फोरणाय । तद्घटनाय भूलग्नेति

मृत्तिकाविशेषणम् । सम्बद्ध्या तयोरनतिभिन्नत्वादिति भावः ॥ १५१ ॥ भुवो ज्ञानत्वाभावान्नतज्ज्ञेयत्वं घटस्यापादयितुं शक्यत इति शङ्कते **ज्ञानत्वाभावत इति** । समाधत्ते — **तर्हीति** ॥ ज्ञानस्वभावादेव विषयस्य ज्ञेयताऽस्तु किमनेनाप्रामाणिकाज्ञानकार्यत्वाद्युपवर्णनेनेति भावः ॥ १५२ ॥ एवमज्ञानमपि स्वस्वभावादेव विषयस्याज्ञेयतां कुर्यान्न तु निराकुर्यात् । तस्मिन्काले स्वसत्ताकाले ॥ १५३ ॥ **तन्मत-**

ज्ञानत्वाभावतो नो चेत्तर्हि ज्ञानस्वभावतः । ज्ञेयता च भवेत्काचित्किमनेन प्रयोजनम् ॥ १५२ ॥
अज्ञानस्य स्वभावोऽपि कार्येऽप्यज्ञेयतामपि । तस्मिन्काले क्षिपेदेव न तु तत्र विनिक्षिपेत् ॥ १५३ ॥
वृत्तिस्त्वज्ञानमुच्छिद्य घटादौ ज्ञेयतामपि । बलात्सम्पादयेत्तस्माज्ज्ञानतामपि साऽर्हति ॥ १५४ ॥
मुखमस्तीति किं ब्रूषे दशहस्तां हरीतकीम् । अज्ञानक्षेपणाशक्ते स्वार्थस्योल्लेखनाक्षमे ॥ १५५ ॥
ज्ञानता यदि चैतन्ये घटादौ च कुतो न सा । अज्ञाननाशे त्वन्येन कृते सति तदेव च ॥ १५६ ॥
यदि ज्ञानं भवेत्तर्हि यदज्ञानस्य नाशकम् । तदेव ज्ञानतामर्हेन्ज्ञेयोऽसौ तर्ह्यमुं लिखेत् ॥ १५७ ॥

रीत्यैवाज्ञाननाशकस्यैव ज्ञानत्वौचित्यात् तादृशी वृत्तिरेव ज्ञानतार्हा सा च स्वसामर्थ्यादेव विषयस्य ज्ञेयतां सम्पादयेदित्याह **वृत्तिरिति** ॥ ॥ १५४ ॥ 'मुखमस्तीति वक्तव्य'मित्याभाणकविषयत्वं परस्याह— **मुखमिति** ॥ यथा हरीतक्या दशहस्तपरिमितत्वमत्यद्बद्धम् । तथाऽज्ञाननाशविषयोल्लेखनयोरसमर्थस्य चैतन्यस्य ज्ञानताऽपि । एवमपि तस्य ज्ञानत्वे आग्रहे घटादेरपि ज्ञानता किं नस्यादिति भावः । अधिष्ठान-

चैतन्यं वृत्त्याऽज्ञाननाशे कृते ज्ञानं भवेच्चेत्तर्हि अज्ञाननाशकतयाऽऽवश्यकी वृत्तिरेव ज्ञानतामर्हेदित्याह— **अज्ञानेति** । अज्ञाननाशे परमुखनिरीक्षकस्य चैतन्यस्य विषयोल्लेखित्वे ज्ञेयोऽसौ घटादिरेव विषयोल्लेखी स्यान्न्यायसाम्यादित्याह— **ज्ञेयोऽसाविति** ॥ परमुखनिरीक्षकस्य प्रकाशता नास्तीत्यत्र सम्प्रतिपन्नं दृष्टांतमाह— **दीपशक्त्येति** । त्वन्मतरीत्या घटस्यापि दीपतास्यादिति भावः ॥ अज्ञाननाशकस्यैव ज्ञानत्वं त्वत्पूर्वेषामपि सम्मतमित्याह— **त्वदिति** ॥ १५८ ॥ उक्तमुपसंहरति **ज्ञानेति** । ज्ञेयत्वज्ञानत्वयोरज्ञानशक्त्यधीनत्वं 'यदज्ञा-

दीपशक्त्या तमोघ्नस्य किं घटस्यापि दीपता । त्वत्प्रांचोऽपि यतः प्राहुर्ज्ञानमज्ञाननाशकम् ॥ १५८ ॥
ज्ञानस्वभावादेवेत्थं ज्ञानं ज्ञेयं निरुच्यताम् । अज्ञानशक्त्या ज्ञेयत्वज्ञानत्वोक्तिस्त्वसङ्गता ॥ १५९ ॥
अतिप्रसङ्गभङ्गाय निर्वाहं चेच्चिकीर्षसि । मायालुस्त्वै तवाप्यावश्यकवृत्तौ म चिंत्यताम् ॥ १६० ॥
गृहोपगतशुद्धोदपानायैव मतिं कुरु । दूरेमरीचिकातोयपानायाशा त्वियं वृथा ॥ १६१ ॥

नस्य यत्कार्य'मित्याद्युक्तरीत्या परोक्तमसङ्गतमिति भावः ॥ १५९ ॥ अन्यज्ञानेऽन्यस्य विषयतापरिहाराय यदिकश्चिन्निर्वाह आकीर्षितस्तर्हि मायाख्याज्ञाननिवर्तकतयावश्यकवृत्तावेव म चिंत्यतामित्याह— **अतिप्रसङ्गेति** । अन्यज्ञानेऽन्यस्य विषयत्वमतिप्रसङ्गः । निर्वाहः कश्चित्सम्बन्धविशेषः । गृहोपगतशुद्धोदपानसदृशो वृत्तेर्ज्ञानत्वाङ्गीकारः । चैतन्यस्य ज्ञानत्वाशा मरीचिकातोयपानाशायिता ॥ १६१ ॥ स्वयं विषयतां निर्वक्ति— **यदिति** ॥ यत्सन्निकृष्ट करणजन्या या धीः स तस्य विषय इति भावः । अस्याव्याप्तिं निराह— **विशेष्यमिति** ।

इदं रूप्यमिति ज्ञानेऽपि विशेष्य इदमर्थ एव विषय इति न रूप्येऽव्याप्तिरिति भावः। रूप्योल्लेखस्तर्हि कथमित्यत आह— **रूप्येति**। रूप्यत्व-प्रकारकधीयोग्यत्वरूपं प्रधानरूप्यसादृश्यं तदुल्लेखहेतुरिति भावः। न च यादृशतादृशेऽपि विषये रूप्ये यदक्षेत्यादिलक्षणाभावादव्याप्तिरेवेति शंक्यम्। मुख्यविषयस्यैव लक्षणकथनात्। रूप्यस्य चामुख्यविषयत्वादिति। तादृशप्रधानसादृश्यस्य स्वरूपसत एव रूप्यत्वप्रकारकधीसम्पा-दकत्वमिति नियमेन भ्रमात्पूर्वं तज्ज्ञानासम्भवेऽपि न दोष इति भावः॥ १६४॥ अत्र सम्प्रतिपन्नं दृष्टान्तमप्याह— **प्रागिति**।

यदक्षयोगजा या धीस्तस्या ज्ञेयं तदुच्यताम्। विशेष्यमेव सर्वं च मुख्यं ज्ञेयं विदुर्बुधाः॥ १६२॥
रूप्यत्वेनापि यच्छुक्तिं ज्ञात्वा तत्र प्रवर्तते। रूप्योल्लेखस्तु रूप्यत्वाकारधीयोग्यताभिधात्॥ १६३॥
प्रधानरूप्यसादृश्यादित्याहुः पूर्वसूरयः। तच्च स्वरूपसत्तत्तद्भ्रमेषु नियतत्वतः॥ १६४॥
तादृशाकारघटकं प्राग्धीस्तस्य तु नेष्यते। प्रागज्ञातादेव यथा तत्तदिन्द्रिययोगतः॥ १६५॥

यथा तत्तदर्थेन्द्रियसंयोगस्य पूर्वमज्ञातस्यैव प्रमायां तत्तदर्थोल्लेखहेतुता। तथा भ्रमेऽपि पूर्वमज्ञातस्य प्रधानसादृश्यस्याध्यस्तोल्लेखहेतुतेति भावः। विषयस्य लक्षणांतरमपि दृष्टाभावेऽपि कार्यानुसारेण ऊह्यमिति स्वयं दर्शयति— **यदिति**। तथा च यदिच्छाजनकं यज्ज्ञानं स तस्य विषय इति वा विषयविषयिभावः स्वरूपसम्बन्धविशेष इति वा स्यात्। न तु सम्बन्धो नास्तीति दृष्टकार्यापलापो युक्त इति भावः॥ १६६॥ प्रथमं विकल्पितकल्पद्वयेऽध्यस्ताध्यासभाव एव सम्बन्ध इति द्वितीयपक्षं निराह—

द्वितीय इति । अध्यासशब्देन मिथ्याज्ञानमध्यस्तशब्देन तज्ज्ञेयं परस्य विवक्षितम् । एवञ्च पर्यायशब्दान्तरेणाऽपि ज्ञानज्ञेयभाव-इत्येवोक्तं स्यात् । एकस्य ज्ञानता परस्य ज्ञेयता कथमिति प्रश्नस्तु नोत्तरित इति भावः ॥ १६९ ॥ ज्ञानज्ञेयभावमात्रस्य वृत्तिज्ञानतद्विषय-

तत्तदर्थोल्लेखिनी स्यात्प्रमा तद्वत् भ्रमोऽप्ययम् । यदिच्छादिकरी या धीस्तस्याज्ञेयं तदेव वा ॥ १६६ ॥
यद्वा स्वरूपसंबन्धविशेषः सम्भविष्यति । दृष्टालाभे त्वदृष्टं च कार्यं तत्कलयेत्किल ॥ १६७ ॥
द्वितीयेऽध्यासशब्देन मिथ्याज्ञानमुदीर्यते । तस्य ज्ञानस्य यत्ज्ञेयं तदध्यस्तं विदुर्बुधाः ॥ १६८ ॥
एतावताऽपि ज्ञानत्वं ज्ञेयत्वं चाभवत्परम् । केन वा ज्ञानतैकस्य ज्ञेयतान्यस्य केन वा ॥ १६९ ॥
इति प्रश्नस्य पक्षेऽस्मिन्नपि किं स्यात्तवोत्तरम् । ज्ञानज्ञेयत्वमात्रं तु वृत्तिज्ञाने तु वर्तते ॥ १७० ॥
यदि कश्चित्फलबलात्सम्बन्धस्तत्र कल्प्यते । सर्वस्य सम्मतायां मे वृत्तावेवास्तु कल्पना ॥ १७१ ॥
न चेच्चरमवृत्तौ ते ब्रह्म ज्ञेयं कथं भवेत । चक्षुषा घटविज्ञानं ममाभूदिति लौकिकाः ॥ १७२ ॥
वदन्ति घटचैतन्ये घटधीत्वप्रथैव न । अधिष्ठानोल्लेखशून्या भ्रान्तिः क्वाऽपि न दृश्यते ॥ १७३ ॥

योरपि सत्वात् । यदिज्ञानज्ञेयभावघटकः फलबलात्कश्चित्सम्बन्धः कल्प्यते तर्हि सर्वसम्मतवृत्तावेव स कल्प्यताम् । अन्यथा चरमवृत्तौ ब्रह्मणो ज्ञेयत्वं तवाऽपि सम्मतं कथं भवेदिति भावः ॥ १७१ ॥ वृत्तेरेव ज्ञानत्वमनुभूयत इत्याह । **चक्षुषेति** ॥ अनेन व्यवहारेण चक्षु

रादिजन्यवृत्तेरेव घटादिज्ञानत्वं लोकानुभवसिद्धमिति भावः । अधिष्ठानचैतन्यस्य घटादिभ्रमरूपतानोपपद्यते इत्याह । **अधिष्ठानेति** । इदं रूप्यमित्येव प्रतीतिर्लोकानां नत्वधिष्ठानोल्लेखशून्या । अतोऽधिष्ठानस्य ब्रह्मणोऽपि सर्वभ्रमविषयता स्यात् । न चैतद्युज्यते । सर्वप्रमाणातीतं ब्रह्म स्वप्रकाशत्वाभ्युपगमेन स्वस्याऽप्यवेद्यं कथं विश्वभ्रमविषयः । नहि गृहेपि द्रष्टुमशक्यो राजा वणिग्वीथ्यां दृश्यते ॥ १७३ ॥

स्वावेद्यब्रह्मचैतन्यं कथं विश्वभ्रमो वद । तद्दृष्टशिशुरक्षार्थं यत्नः सर्वस्य शोभते ॥ १७४ ॥
पिचण्डिलवधूगर्भशिशोरर्थे यतेन कः । अतोऽपि भेदरत्नस्य नास्ति तस्करतो भयम् ॥ १७५ ॥
सरस्वत्यास्तटे राजन्ऋषयः सत्रमासत । वितर्कः समभूत्तेषां त्रिष्वधीशेषु कोमहान् ॥ १७६ ॥
तच्छ्रुत्वा मुनयः सर्वे विस्मिताश्छिन्नसंशयाः । भूयांसं श्रद्दधुर्विष्णुं यतःशान्तिर्यतोऽभयम् ॥ १७७ ॥
इति स्मृतेः सर्वजावराशितोऽत्यन्तभिन्नता । सिद्धात्रयाणां देवानां तेषांच समतैकता ॥ १७८ ॥
नास्त्येव किन्तु तेष्वेको महानस्ति सको भवेत् । इति प्रश्नकृतां वाक्यकौशलादैक्यवादिनाम् ॥ १७९ ॥

अत्राऽर्थान्तरं न्यस्यति **तदिति** । पिचण्डिलवधूगर्भस्थशिश्वर्थयत्नतुल्यं चैतन्यस्य ज्ञानत्वसम्पादनप्रयतनम् । दृष्टशिशुरक्षायत्नतुल्यं वृत्तेर्ज्ञानत्वे यतनमिति भावः ॥ १७४ ॥ भागवतदशमस्कंधकथयाऽपि विष्णोः सर्वोत्तमत्वं साधयति । **सरस्वत्या इति । प्रश्नकृतां वाक्यकौशलादिति ।** त्रिष्वधीशेषु कोमहानिति प्रश्नवाक्यम् । अत्र मिथोभिन्नानां मध्ये श्रेष्ठः क इत्येव प्रश्नः । अतः समत्वैकत्वयोः कथना-

वकाश एव नेति गर्भस्रावान्मतं गतमित्युक्तम् ॥ १७९ ॥ तत्राऽपि सन्देह इति श्रेष्ठत्वविषय एव प्रश्न इत्यत्राऽपीत्यर्थः । तर्हीति ।

समत्ववादिनाञ्चैव गर्भस्रावान्मतं गतम् । यदि तत्राऽपि सन्देहस्तर्हि तन्निश्चयोद्यमम् ॥ १८० ॥
कुर्युस्तमुल्लङ्घ्ययेयं महत्वस्यैव चोदना । साऽनङ्गीकारनिहतं करोत्येव मतद्वयम् ॥ १८१ ॥
त्रयाणाञ्च मिथोऽत्यन्तभेदमेकस्य चोचताम् । योग्यस्यर्षिमतत्वञ्च प्रश्नोऽयं साधयत्यहो ॥ १८२ ॥
त्रयाणां निकटं गत्वा तत्तत्सामर्थ्यशोधने । गरीयसी यस्य शक्तिः स एवोचो भविष्यति ॥ १८३ ॥
इति मत्वा भृगुं शक्तिं प्रत्यक्षेणैव वीक्षितुम् । सम्प्रेष्य निश्चयस्यान्ते चक्रुः किल महर्षयः ॥ १८४ ॥
स्वसामर्थ्यपरीक्षायै योऽभ्यागात्तन्मनीषिनम् । अज्ञात्वा कुपितौ देवौ ब्रह्मशङ्करनामकौ ॥ १८५ ॥
सार्वज्ञ्याख्यब्रह्मधर्मवैधुर्यान्नीचतोचितौ । सर्वज्ञाग्रेसरो विष्णुः सर्वदा सर्वहृद्गतम् ॥ १८६ ॥
पश्यन्नसह्यमप्यंहः सेहेऽस्य द्रोहिणो मुनेः । अतः स सर्वजीवोचो रुद्राच्च ब्रह्मणोऽपि च ॥ १८७ ॥
महानिति विनिश्चित्य तमेव शरणं गताः । इत्याहोत्तरवाक्यं च तस्मान्मैत्रेयवागपि ॥ १८८ ॥
विरोधाऽऽख्यभिदामेव त्रयाणां प्रतिषेधति । विस्मर्ता निश्चितस्यास्य तत्वस्य स कथं मुनिः ॥ १८९ ॥

यद्यन्यविषयक एव प्रश्नः स्यात्तर्ह्यन्यविषयकनिश्चयायैवोद्यमं कुर्युः । श्रैष्ठ्यस्यैव या चोदना सा मतद्वयमनङ्गीकारपराहतं करोतीति भावः ।

उत्तरवाक्यमिति ॥ 'पुरुषस्य पदाम्भोजसेवया तद्गतिं गताः' ॥ इत्युत्तरवाक्यं शरणं गता इत्याहेत्यर्थः । **मैत्रेयवागिति** ॥ 'त्रयाणामेकभावाना'मित्यादिरूपेत्यर्थः । **विरोधाऽख्यभिदामेवेति** । न तु स्वरूपभेदं निषेधति । पूर्वोक्तर्षिनिश्चयविरोधात् । न हि त्वद्बुद्धि-श्रितस्य विस्मरणशीलो भगवान्मैत्रेयो मुनिरिति भावः ॥ १९० ॥ एकमेवाद्वितीयमित्यादिश्रुतिबलात्तद्विरुद्धस्य मुनिमार्गस्य परित्याग

यस्त्विमं मुनिराद्धान्तं मिथ्यावादं वदेद्बुधः । व्यावहारिकतावाप्या स प्रष्टव्यः सभान्तरे ॥ १९० ॥
मुनिमार्गमिमं कस्मात्त्यजसीति विवेकिभिः । यद्यैक्यश्रुतिसामर्थ्यात्तद्विरुद्धं जिहीर्षसि ॥ १९१ ॥
तर्हि श्रुतीनां द्रष्टारो वसिष्ठाद्या महर्षयः । नवश्रुतिमिमां केऽपि नाविदन्निति मे मतिः ॥ १९२ ॥
वेदव्यासोऽपि वेदार्थं किं न वेत्ति स सूत्रकृत् । सञ्जग्राह कथामेतां यश्च भागवते प्रभुः ॥ १९३ ॥
वेदश्च वेदव्यासश्च वेदद्रष्टार एव च । यं भावं न क्वचित्प्रोचुस्तं भवान्कथमूचिवान् ॥ १९४ ॥
न हि ते वंचकाः शिष्टाः येन तत्त्वमिदं तव । न ब्रूयुर्नापि वेत्तारः तत्त्वस्यास्य महर्षयः ॥ १९५ ॥

इत्यत आह— **यदीति** ॥ **नवश्रुतिमिति** । श्रुतेरनादित्वेऽपि त्वदभ्युपगतार्थकत्वेन मुनिभिरदृष्टत्वान्नवेत्युक्तम् । यदर्थनिर्णयाय सूत्रं चकार तद्वेदार्थं स भगवान्व्यासोऽपि नवेत्ति किल । यदि विद्यात्कथं तद्विरुद्धां कथां भागवते संगृह्णीयादिति भावः तथा च महर्षिभि-रदृष्टमिमं श्रुतेराशयं कथं भवानप्यूचिवान् । न हि तेभ्योऽपि श्लाघनीयप्रज्ञोभवान् ॥ ज्ञात्वाऽपि विरुद्धकथने वंचकता स्यात् । न हि

महर्षयस्तादृशा इत्याह— **नहीति** ॥ अपि च भवदीयमिदं तत्त्वमृषयोऽपि नैव जानन्ति । यदि विद्युस्तर्हि ऋषिश्रेष्ठः शुकः कृष्ण-श्रैष्ठ्यविरोधप्रसक्तिर्यत्रयत्र तत्रतत्र तदुत्तरं दित्सुर्भागवतदशमस्कन्धेविप्राणां वाक्यतया 'तद्याच्ञा जनमोहिनी'ति कथं ब्रूयादिति भावः ॥ १९५ ॥ यद्यैक्यं श्रुतिप्रतिपाद्यं स्यात्स्यादपि तदा त्वदुक्तं सर्वम् । तदेव नेत्याह— **किं चेति** ॥ 'असंगोह्ययं पुरुषः' 'यतो वाचो निवर्तन्ते' इति श्रुतेः त्वद्ब्रह्म सर्वसङ्गशून्यं वाग्गोचरं च । तादृशब्रह्मचिन्मात्रमैक्यमपि अतिसङ्गि वाग्गोचरं वा कथं स्यात् । तथा च

कृष्णश्रैष्ठ्यविरोधासौ तद्याच्ञा जनमोहिनी । इत्युत्तरं च तत्रैव किन्नाह भगवान्शुकः ॥ १९६ ॥
किं चासङ्गश्रुतेः सत्वाद्यतो वाच इति श्रुतेः । सत्वाच्च ब्रह्मचिन्मात्रमैक्यं न श्रुतिसङ्गवत् ॥ १९७ ॥
तवाखण्डार्थवादस्य सत्वाचैक्यश्रुतिर्नहि । अतः कस्य विरोधेन श्रुतेरर्थं जिहीर्षसि ॥ १९८ ॥
भेदश्रुतिसहायेयं स्मृतिरैक्यमवैदिकम् । बहिष्कृत्य महर्षीणां मतमेव प्रमापयेत् ॥ १९९ ॥

तस्याः विरोधेन कस्य परित्याग इति विचारय । अपि च तवाखण्डार्थवादित्वेन स्वरूपमात्रपराणि पदान्यैक्यं न बोधयन्त्येव । अतोप्यैक्य श्रुतिर्नास्ति एवं च विरोधाभावेन भेदश्रुतिसहकृतेयं भागवती स्मृतिरैक्यमश्रौतं धिक्कृत्य ऋषिमतं प्रमाप्येदेवेति भावः ॥ १९८ ॥ तुष्यत्विति न्यायेनैक्यश्रुतिविरोधमभ्युपेत्याप्युत्तरमाह— **किं चेत्यादिना** ॥ भवन्नपि श्रुतिविरोधो व्यावहारिको वा पारमार्थिको वा । आद्ये व्यावहारिकभेदसत्वेऽपि यथा पारमार्थिकमैक्यं त्वं ब्रूषे तथा व्यावहारिकविरोधे सत्यपि भेदश्रुतिः स्वार्थं परमार्थतो वदेदेव तथा

स्मृतेश्च तादृशाद्विरोधाद्भीर्नास्ति । सत्यश्च विरोधस्त्वन्मते नास्त्येव । द्वितीयकल्पे तु परमार्थतो विरुद्धैक्यश्रुतिरपि स्वार्थं न साधयेदिति तदाऽपि न स्मृतेर्भीतिरिति भावः ॥ २०२ ॥ उक्तदोषपरिहारायासङ्गश्रुतेरर्थान्तरं परः शङ्कते **यदीति**। सङ्गविशेषस्य । कर्मफलसम्बन्धस्य ।

किं च श्रुतिविरोधस्ते यदिस्याद्व्यावहारिकः । तदा स्मृतेर्नभीतिः स्यात् स्वार्थे च परमार्थतः ॥ २०० ॥
वदेदेव श्रुतिः सत्यो विरोधो न हि ते मते । व्यावहारिकभेदो मे यथा ते न भयङ्करः ॥ २०१ ॥
तथा स्मृतेश्च न भयं विरोधाद्व्यावहारिकात् । यद्ययं परमार्थः स्यात् तर्ह्यैक्यश्रुतिमेव सः ॥ २०२ ॥
विरुणद्धि तदाऽप्यैक्यस्यैवाभावात्स्मृतेर्न भीः । यदिसङ्गविशेषस्य निषेधीसाश्रुतिर्भवेत् ॥ २०३ ॥
तदा भेदविशेषस्य निषेधीस्यात्तवश्रुतिः । किं चैक्यभेदागमयोः परस्परविरोधतः ॥ २०४ ॥
व्यासङ्गे सति वागेषा कस्मात्स्वार्थं न साधयेत् । परमार्थैक्ययोगेन विरोधो बलवान्यदि ॥ २०५ ॥
अतादृग्भेदयोगेन दुर्बलोऽपि कथं न सः । प्रतियोगिनि सामर्थ्यं प्राबल्ये कारणं यदि ॥ २०६ ॥
तर्हि भेदोऽपि सत्योऽस्तु तद्बलेन बलीयसा । भेदस्मृतेर्विरोधेन तवैक्यस्याऽनुयोगिनः ॥ २०७ ॥

भेदविशेषस्य । स्वगतगुणक्रियादिभेदस्य ॥ २०३ ॥ ऐक्यभेदागमयोः परस्परविरोधेन स्वार्थप्रतिपादनविलम्बेऽविरुद्धेयं स्मृतिः स्वार्थं भेदं साधयेदित्याह— **किं चेति** ॥ २०४ ॥ विरोधस्य व्यावहारिकत्वेऽपि परमार्थैक्यप्रतियोगिकत्वेन बलवत्त्वात्स्मृतेस्तद्भीर्नेत्युक्तमनूद्य दू-

मित्यत आह । **परमार्थेति** । तुल्यतयाऽपरमार्थभेदसम्बन्धित्वेन सविरोधः दुर्बलोऽपि किं नस्यादिति भावः । परन्यायेन परं दूषयति । **प्रतियोगिनीति** । प्रतियोग्यैक्यस्य सामर्थ्याद्यदि विरोधः प्रबलः स्यात्तर्हि सत्यभेदसामर्थ्यात्प्रबलतद्विरोधानुयोग्यैक्यमसत्स्यात् । तथा च श्रुतिसहिता विचाराख्यशिष्टाचारोपोद्बलिता स्मृतिर्व्यावहारिकत्वं प्रतिक्षिप्य स्वार्थं साधयेत् । उभयोः सत्यत्वायोगे 'सत्यं भिदा सत्यं

व्यर्थो भवेत्सत्यतैव भेदश्रुतिसहायिनी । विशिष्टा च विचाराख्यशिष्टाचारसमेधिता ॥ २०८ ॥
स्मृतिः साधयति स्वार्थं व्यावहारिकतां क्षिपेत् । उभयोः सत्यताऽयोगे भेद एवास्तु सन्मम ॥ २०९ ॥
सत्यं भिदेति शपथं कुर्वती श्रुतिरस्तिहि । ऐक्यस्य सत्यतावाणी तवाऽपि न ममाऽपि न ॥ २१० ॥
यदि सत्यब्रह्मरूपमैक्यं सत्यं भवेत्तव । तर्ह्याऽऽर्थिकार्थसत्ता सा चोदनार्थः कथं वद ॥ २११ ॥
मुख्यार्थभेदसत्ताऽग्रे तिष्ठेत्केन मुखेन सा । बहुव्रीहौ च तद्योग एवस्यान्न तदेकता ॥ २१२ ॥
किञ्च श्रुतेरबाध्योऽर्थः सत्यः स्यान्न तु बाधितः । यथाश्रुतैक्यवाक्यार्थं प्रत्यक्षादिविरोधतः ॥ २१३ ॥

भिदे'ति श्रुत्युक्तो भेदः सत्योऽस्तु । 'ऐक्यं सत्य'मित्याद्याकाराश्रुतिस्तु उभयमतेऽपि नास्ति । न च ब्रह्मणः सत्यत्वे 'सत्यं ज्ञान'मित्यादिनाऽवगते तदभिन्नस्यैक्यस्य सत्यत्वमर्थात्प्राप्तमिति वाच्यम् । यश्चार्थादर्थो न स चोदनार्थ इति न्यायेनाऽऽर्थिकस्य श्रुत्यर्थत्वाभावात् । श्रुत्यर्थभेदसत्वपुरत इदं न तिष्ठेदिति भावः ॥ २११ ॥ 'एकमेवा द्वितीय'मित्यत्राऽद्वितीयपदस्य बहुव्रीह्याश्रयणे नैतच्छ्रुतेरैक्यसिद्धिरित्याह । **बहुव्री**

हाविति । 'द्वितीयं यस्यनेत्युक्तया नञर्थे ब्रह्मणा सह । षष्ठ्यर्थभूतसम्बन्धो भासते न त्वभिन्नते'त्यत्र कृतविवरणमिदम् ॥ अबाधितस्यैव अस्त्यर्थस्य सत्यत्वेन प्रत्यक्षादिबाधितमैक्यं कथं सत्यमुच्यत इत्याह । किंचेत्यादिना । तर्ह्यैक्यश्रुतेः कागतिरित्यत आह । मुख्यवृत्तेरिति ।

त्वमेव बाधितं ब्रूषे कथं तस्याद्य सत्यता । मुख्यवृत्तेरलाभेवाग्ज्ञातिवाक्यान्तराश्रिताम् ॥ २१४ ॥
अमुख्यवृत्तिमाश्रित्य ज्ञातिभिः सह मोदते । न गोत्रकलहं कुर्यान्न च सर्वं जगत्क्षिपेत् ॥ २१५ ॥
व्यावहारिकशब्दोऽयं स्वकपोलेन कल्पितः । अपौरुषेयवेदोक्तौ महापुरुषनिर्मिते ॥ २१६ ॥
पुराणे च कथं योज्यः स्वमताग्रहतः परम् । अनर्घ्यरत्नमालायां कः काचमपि योजयेत् ॥ २१७ ॥
यद्गोत्रेष्वज्ञ जातोऽसि तान्गोत्रस्य प्रवर्तकान् । ऋषीन्वृथावजानंस्त्वं कुलघ्नो नात्र संशयः ॥ २१८ ॥
इत्थं सारस्वता विप्राः नृणां संशयनुत्तये । पुरुषस्य पदाम्भोजसेवया तद्गतिं गताः ॥ २१९ ॥
फलश्लोकममुं पश्य नृणां संशयनाशिनी । महापुरुषसेवेयं किल तद्गतिदायिनी ॥ २२० ॥
इति स्तुताध्यायकथां कथं तां व्यावहारिकीम् । वदेत्कः पण्डितो विद्वत्सभामध्ये दुराग्रहात् ॥ २२१ ॥

तथा चामुख्यामपि वृत्तिमाश्रित्य स्वज्ञातिकलहो यथा नस्यात्तथाऽर्थो वक्तव्य इत्यर्थः । व्यावहारिकशब्दन्त्वपौरुषेयवेदे तदादृतपुराणादौ च रत्नमालायां काचमिव त्वां विना कोऽपि न योजयेदिति भावः । ऋषिमतदूषणं कुलघ्नस्यैव शोभत इत्याह— यद्गोत्रेष्विति ॥ २२० ॥ किं

चेति ॥ च=अपिच ॥ अनया निगूढोक्त्या किमिति योजना । निगूढोक्तिर्व्यावहारिकतोक्तिः । तदेव विशदयति **अतत्वेति** । **दोषद्वयं** वेदस्याप्रामाण्यं तव पापं च । सतां वञ्चनं तृतीयमधिकमित्यर्थः । विरुद्धयोः श्रुत्योर्मध्ये यद्येकस्याः मानता नेति ब्रूषे **तर्हि**

किं चानया निगूढोक्त्या स्पष्टं कस्मान्न कथ्यते । अतत्वावेदकत्वं हि व्यावहारिकता मता ॥ २२२ ॥
एवं चेदैक्यवाक्यस्य विरोधाच्छ्रुतयोऽखिलाः । कर्मकाण्डस्थिताश्चैव ब्रह्मकाण्डस्थिताश्रयाः ॥ २२३ ॥
नित्यनैमित्तिकं कर्म बोधयन्त्यः स्थले स्थले । भेदादिकं साधयन्त्यः सन्ति सन्तोषदाः सताम् ॥ २२४ ॥
अतत्वावेदकाः सर्वास्ता इत्येव सभान्तरे । कुतो वा नोच्यते वेदस्याप्रामाण्यं यदिस्फुटम् ॥ २२५ ॥
वक्तुं भीतोऽसि तर्हि स्याच्छद्मना वेदनिन्दनात् । दोषद्वयं तथैवाज्ञ वंचनं चाधिकं सताम् ॥ २२६ ॥
श्रुत्योर्मिथो विरोधे च यद्येका मानतां त्यजेत् । तर्हि बह्वीः कुतो हंसि तव श्रुतिरकल्पका ॥ २२७ ॥
अहेंदमानतां नोचेत्स्वानुकूलं वचः श्रुतौ । मानयन्नितरान्वेदराशीन्सर्वानमानयन् ॥ २२८ ॥
कुतो न युज्यते बौद्धः केन वा युज्यते भवान् । अतः शङ्कापिशाचीयं नानेया बुधसंसदि ॥ २२९ ॥

सावकाशतया अकल्पका स्वार्थप्रतिपादनाक्षमा त्वदैक्यश्रुतिरेवाप्रमाणं भूयात् । कुतो वा स्वानुकूलमेकं वाक्यमुपादाय सर्ववेदान्हंसि । न चेद्बौद्धस्य तव च को विशेष इत्याह— **श्रुत्योरिति** । तथा च व्यावहारिकत्वशङ्का नकार्येति भावः । सिद्धमर्थमाह ।

तस्मादिति ॥ २३० ॥ जीवपरयोरैक्ये बाधकान्तरमाह । **यदीति** । स्वकृतपाप्मना जीवस्य दुःखित्वे तदभिन्नत्वादीश्वरोऽपि दुःखीत्यादिति भावः । 'प्रेरणाय सदा हृदी'त्युक्तिस्त्वौपाधिकभेदस्याऽप्यभावप्रतिपादनाय । न चेद्यादृशतादृशभेदसत्त्वान्न परो दुःखभोक्तेति **माधी** वक्तुमुत्सहेताऽपीति भावः । ननु पापादिकं जड एव न जीव इति नेयमापत्तिरित्यत आह । **जीवस्यैवेति** । अन्तःकरणादिजडस्य

तस्मात्सर्वज्ञमुनिभिर्निर्णीतोच्चत्वधर्मवान् । निर्णीतनीचभावेभ्यो जीवेऽभ्योऽभूद्धरिः पृथक् ॥ २३० ॥
यद्यैक्यं जीवपरयोस्तर्हि जीवः स्वपाप्मना । नरके पच्यमानः सन्यदुःखमनुभोक्ष्यति ॥ २३१ ॥
तस्य कर्तुश्च भोक्तुश्च प्रेरणाय सदा हृदि । निवसन् भगवांश्च स्यात्तेन दुःखेन दुःखवान् ॥ २३२ ॥
जीवस्यैवोचितं पापं जडस्य तु न पातकम् । प्रायश्चित्तं नराणां वा शराणां वा विचारय ॥ २३३ ॥
देहांतःकरणादेश्च न पापाश्रयता तव । सुप्तौ सर्वलये पापाधाराभावप्रसङ्गतः ॥ २३४ ॥
तस्यापि च लये सुप्तेर्लयः स्यान्निर्निमित्तकः । सर्वोत्पत्तेर्निमित्तं यत्कर्मप्राहुर्विचक्षणाः ॥ २३५ ॥

पापाद्याश्रयत्वे सुप्तौ तस्याभावाभ्युगमात्पापाद्यभावप्रसङ्गः । नचेष्टापत्तिः । सुप्तौ पापादिकर्मणोलये सुप्तिलय एव निर्निमित्तः स्यात् । कर्मणः सर्वोत्पत्तिकारणत्वात्तथा च तव दीर्घनिद्रा च स्यात् । अपिचाज्ञानं तव मते प्रतिबिम्बपक्षपाति । अतश्चतज्जन्यं दुःखादिपातकं जीव एव विशेत् । धर्माधर्मौ चेतनस्य जडस्य वेति बाला अपि जानते त्वं तेभ्योऽपि हीनोऽभवः ॥ २३६ ॥ बुद्धेर्जडस्य पापाश्रयता **नोपपद्यत**

त्युपपादयति । क्षणभंगुरेति । एषाधीः कालान्तरे नास्ति । यतः क्षणभङ्गुरा । फलञ्च कालान्तरे । तथा चेदानीन्तनी बुद्धिःकर्त्री । **अपरा** बुद्धिः कालान्तरे भोक्त्रीति कृतहान्यादिकं प्रसज्येत । कृतहान्यादिप्राप्तिमांश्च कोऽपि नेति भावः । बुद्धेर्धर्माद्याश्रयत्वे दूषणांतरमाह ।

प्रतिबिम्बे पक्षपाति तवाज्ञानंच पातकम् । तज्जं दुःखाख्यसंसारं जीव एव विशेद्ध्रुवम् ॥ २३६ ॥
धर्माधर्मौ कस्य गुणाविति बालान्विचारय । क्षणभंगुरधीरेषानास्ति कालान्तरे फलम् ॥ २३७ ॥
कर्त्रीदानीन्तना बुद्धिर्भोक्त्रीकालान्तरेऽपरा । एकः पापानि कुरुते फलं भुङ्क्तेपरः किल ॥ २३८ ॥
कृतहान्यकृतप्राप्ती को वा प्राप्तो वदेद्बुधः । तस्मात्कर्ता च जीवोऽयं भोक्ता चाऽयं यतः स्थिरः ॥ २३९ ॥
किञ्च बुद्धेरेव गुणौ धर्माधर्मौ मतौ यदि । तर्हि कारणनाशेन तयोर्नाशो भवेद्ध्रुवम् ॥ २४० ॥
अतो बुद्ध्यन्तरोत्पत्तिः स्वर्गादेः प्राप्तिरेव च । निर्निमित्ता भवेत्तस्माज्जीवस्यैव हि तौ गुणौ ॥ २४१ ॥
एवं च पापिनोऽन्यस्य यतः पापफलं भवेत् । अतो जीवस्यैव युक्ता नारकासुखभोक्तृता ॥ २४२ ॥
देहाधिकरणं यस्य करणं चक्षुरादिकम् । मनोन्तःकरणं बुद्धिर्धीरूपा सैव विक्रिया ॥ २४३ ॥

किञ्चेति । बुद्धिरूपकारणनाशादेव तद्गतधर्मादीनां नाशाद्बुद्ध्यन्तरोत्पत्तिः स्वर्गादिप्राप्तिश्च निमित्ताभावेन नस्यात् । अतो जीवस्यैव ताविति जडान्यस्य पापिनः जीवस्यैव पापफलं चेति भावः ॥ २४१ ॥ दुःखभोक्तृत्वं जीवस्यैवेति कथयितुं प्रक्रियां विवेचयति । **देहेत्या-**

दिना देहाधिकरणं देहवृत्ति जीवस्य चक्षुरादिकं बाह्यकरणमन्तःकरणं मनःधीरूपा या बुद्धिः सा मनसो विकार एव। दुष्टगन्धादिविषयाणां घ्राणादीन्द्रियसंयोगाद्या धीः सा बुद्धिर्यातनारूपा। एवं विचारणे सर्वमपि जडं दुःखकारणमेव दुःखानुभवस्तु जीवस्वरूप एवेति त्वन्मतम्। तथा च करणजन्यो बाह्यार्थानुभवो बुद्धिर्जडम्। आन्तरार्थानुभवः सुखसाक्षात्कारापरपर्यायश्चेतनरूप एव। अन्यथा तवापसिद्धान्तः

दुष्टगन्धरमादीनां घ्राणादीन्द्रियसङ्गमात्। या धीः सा यातनारूपा बुद्धिर्दुःखकरी परम् ॥ २४४ ॥
दुःखानुभवरूपस्तु सर्वत्रात्मेति ते मतम्। बुद्धिस्तु बाह्यकरणैः बाह्यार्थानुभवः किल ॥ २४५ ॥
तस्मान्नारकदुःखौघसाक्षात्काराख्यभोगवान्। जीव एव भवेन्नोचेत्सिद्धान्तस्यान्तकृद्भवान् ॥ २४६ ॥
यस्यस्मरणमात्रेण नरकाच्च तरेन्नरः। तस्य दिक्पालपालस्य नैवस्यान्नारकी व्यथा ॥ २४७ ॥
पतितःस्खलितो मग्नः सन्दष्टस्तप्त आहतः। हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ॥ २४८ ॥
इत्यादिस्मृतिभिः कृष्णनामकीर्तनमात्रकृत्। भक्तोऽपि यातनां नार्हेत्किं पुनः स महाप्रभुः ॥ २४९ ॥

स्यादिति भावः। भागवतषष्ठस्कन्धगतवाक्यतो भगवत्पापफलाभोक्तृत्वं कैमुत्येन साधयति **पतितइति**। तथा च यन्नामस्मरणादि कमपि पापहरं स पापशून्यइतिकिं वक्तव्यमिति भावः॥ २४९॥ कीर्तनादिति अस्य जीवस्य। 'न कर्मणा लिप्यते पापकेन' 'न कर्मणा वर्धते नो कनीयानि'ति श्रुतिभ्यां नीचोच्चभावरूपपापफलभोगाभावस्योक्तेः। लोके कारयितुरपि पापादिकमस्ति। हरेस्तु कारयितृत्वेऽपि तन्नास्तीति साध-

इति ऋग्वेदगतं वाक्यं गृह्णति । देहान्वितः । देहवत्त्वेन ॥ ६६ ॥ संक्षिप्य श्रुतेरर्थमाह । द्युसंबन्धीति ॥ द्युपृथिवीकारणमूर्ध-पादवन्तं जनानां आक्रते सम्यग्ज्ञानाय जातं व्यक्तं अतिथिमत्वन्नं कवित्वादिगुणकमग्निनामकमीश्वरं देवाः आसंन आस्यमिव आजनयन्ता-कुर्वन्निति समग्रश्रुत्यर्थः । पात्रं पातारं । अरतिः पादः । अत्र मूर्धाऽरतिपदाभ्यां शिरःपादमात्रप्रतीतावपि सर्वावयवसिद्धिमनेनाह । यदिति ॥

द्युसम्बन्धी च यो मूर्धा पादो यो भूस्थितो महान् । स एवाग्निः कविः सम्राडित्यर्थो यच्छ्रुतेरभूत् ॥ ६७ ॥
अतो देहात्मको वेदः कथं नाभूदिचारय । यन्मूर्धो ग्रहणं चक्रे पादस्य च ततः श्रुतिः ॥ ६८ ॥
प्रत्याहारस्य रीत्यैव सर्वदेहात्मकं जगौ । मध्यस्थाकाशभागस्था या जंघा ये च जानुनी ॥ ६९ ॥
यावूरू या कटिः कुक्षिर्गन्मध्यं यदुरस्तथा । ग्रीवा च वदनं चैव स एवाग्निरिति स्फुटम् ॥ ७० ॥
अर्थः समाख्यया सिद्धयेत्तं देहं का रुणद्धि वाक् । अतः श्रुत्यर्थकथकास्त एवेति मतिर्मम ॥ ७१ ॥
येषां शब्दार्थकुशलो गुरुः स्याद्भारतीपतिः । सहि वेदव्यासशिष्यस्तत्पोष्यश्रुतिभाष्यकृत् ॥ ७२ ॥
यदिचाद्वैतवाक्यानि सर्वाद्वैतं वदन्ति ते । तदा मिथ्यात्ववाक्यानि बहिरासन्मतात्तव ॥ ७३ ॥

प्रत्याहारस्येति ॥ प्रत्याहार इति मध्यबोधकस्य इदंतस्यादिवर्णस्य संज्ञा वैयाकरणानां 'आदिरंत्येन सहेते'ति पाणिनिसूत्रात् । १ । १ । ७१ । ॥ ६८ ॥ उक्तार्थसाधनायार्थतः समाख्याश्रुतिं गृह्णाति । मध्येति ॥ अनेन पुरुषसूक्तं प्रत्याहारलभ्यार्थे प्रमाणयति । तत्समाख्याबलादियमपि श्रुति-

राद्यंतावयवोपादानव्याजेनाभिन्नसर्वावयवमाहेत्यर्थः ॥ ७३ ॥ परस्योभयतः पाशारज्जुमाह । **यदिचेति** ॥ सर्वैक्ये मिथ्यापदार्थस्याभावात् । सर्वमिथ्यात्वे च सता तदैक्यायोगादिति भावः । तदुपपादयति । **सत्येति** ॥ सत् । अबाधितं । वाक्यद्वये ऐक्यमिथ्यात्वप्रतिपादकवाक्यद्वये । गोद्वयं वाक्यरूपं । प्रदुष्यति । अर्थाभावे मरिष्यति । मिथ्यात्ववाचि मिथ्यात्वप्रतिपादकवाक्ये । चैतन्यातिरिक्तस्य जडस्यैव मिथ्यात्वं तदर्थः । चेतन-

यदि मिथ्यात्ववाक्यानि सर्वमिथ्यात्वसूचिरे[?]। तदात्वद्वैतवाक्यानि बहिरासन्मतात्तव ॥ ७४ ॥
सत्यमिथ्यार्थयोरैक्यं स त्वयापि न कथ्यते । वाक्यद्वयेन यद्यर्थसङ्कोचः क्रियते त्वया ॥ ७५ ॥
स्वार्थाख्यतृणसङ्कोचे गोद्वयं च प्रदुष्यति । मिथ्यात्ववाचि चैतन्यात्सङ्कोचः किल ते मतः ॥ ७६ ॥
अद्वैतवाक्ये च जडात्सङ्कोचोऽभिमतस्तव । किमिदं पदसत्वात्स्यात्किं वा स्वमतभत्वतः ॥ ७७ ॥
नाद्यस्तादृक्पदाभावान्नान्त्यो निर्हेतुकत्वतः । प्रमाणानां हि सत्वेन मतसत्वं भवेद्भुवि ॥ ७८ ॥
तदभावे तु भुजयोः सत्वं कुत्रोपयुज्यते । उक्तार्थवाचकपदाभावान्नेदमभूत्तव ॥ ७९ ॥

स्यैवैक्यमितरत्र विवक्षितमिति सङ्कोचप्रकारः । वाक्यद्वयंचै'कमेवाद्वितीयं' 'नेहनानास्ति किंचने'त्यादिकं । तादृक्पदं एकैकत्र जडचेतनमात्रबोधकं । प्रमाणभावाभावाभ्यामर्थसदसत्वे न तु भुजबलादिति भावः । प्रमाणसत्वादेव मयापीत्थं कथ्यत इत्यत आह । **उक्तेति** ॥ उदाहृतवाक्यं विवक्षित-बोधकपदाभावान्न मानं अन्यच्च न दृश्यत इत्यर्थः । सङ्कोचकरणावश्यकत्वेपि शिष्टसंमत एव सङ्कोचः कार्यः न त्वदभिलषित इत्याह । **किंचे-**

त्यादिना । तमेव सङ्कोचं दर्शयति । **यदिति** ॥ चराचरात्सङ्कोच इत्यन्वयः । तथाच नेहनानेत्यस्य भिन्नगुणक्रियावयवादिकं नास्तीत्येवार्थः । न तु चराचरं नास्तीति । एवमेकमेवेत्यस्यापि गुणाद्यैक्यमेवार्थः स्यात । न तु जीवजडाभेद इति भावः । भिन्नगुणादिकं वदन्तः गोतमादयश्च दृष्याः सन्त्विति । **गोघ्नमिति** ॥ मायिनः श्रुत्यर्थघातिनः श्रुतिघ्नत्वात् । स्वार्थघातिनः स्वघातित्वं प्रसिद्धमिति भावः ॥ ८३ ॥ रीत्यन्त-

अन्यत्तु मानं नैवास्ति यत्त्वदुक्तार्थसाधकम् । किं च स्वमतरक्षायै सङ्कोचो यद्युदीर्यते ॥ ८० ॥
बहुशिष्टमतं त्रातुं सङ्कोचोऽन्योप्युदीर्यताम् । यत्ते मिथ्यात्ववाक्स्थां सङ्कोचोऽस्तु चराचरात् ॥ ८१ ॥
श्रुत्या दृष्यो गोतमोऽस्तु भास्करो वा प्रभाकरः । ऐक्यवाक्ये जडाज्जीवात्सङ्कोचोऽस्तु हरेर्गुणाः ॥ ८२ ॥
अवताराश्चावयवाः प्रतिपाद्या भवन्तु च । गौरियं गोपमन्वेति न तु गोघ्नं पदे पदे ॥ ८३ ॥
विश्वं मिथ्या यदि तदा भेदः सत्योऽभवन्मम । सत्यमिथ्यार्थयोर्भेदो यत्त्वयापि मते मतः ॥ ८४ ॥
भेदो मिथ्या तदैव स्याद्भेदिनोरेकता यदि । अन्योन्याभाव एवायं भेदस्तादात्म्यमस्य च ॥ ८५ ॥
प्रतियोगि त्रिकालेषु निषेधश्च भवन्मते । मिथ्यात्वं यो ह्यभावस्य निषेधो भावएव सः ॥ ८६ ॥

रेणाप्युभयतः पाशारज्जुमाह । **विश्वमिति** ॥ कुत इत्यत आह । **सत्येति** ॥ मतः सम्मतः । तदेवोपपादयति । **भेदइति** ॥ भेदो नामान्योन्याभावः । अस्य च तादात्म्यं प्रतियोगि । मिथ्यात्वं च त्वन्मते त्रिकालनिषेधः । तथाचाभावस्य निषेधः भाव एवेति भेदमिथ्यात्वं नाम भेदि-

नोरक्तैवेति । भेदिनोर्मिथ्यासत्ययोरेकता च नाभ्युपगतेति भावः । **भेदः सत्यमिति** ॥ सत्यमिति 'विश्वं सत्य'मिति श्रौतपदानुवादः । विधेयप्रा न्यनिर्देशो वा । तेन विशेष्यपदभिन्नलिंगकत्वोपपत्तिः ॥ ८७ ॥ द्विधा जगतः सत्यत्वे मिथ्यात्वे च । **सदद्वैतं** सतोऽद्वितीयत्वं **सन्त्यजन्** मायी । **अधिकमिति** ॥ उभयथाप्युक्तिरीत्या भेदसत्यत्वप्राप्त्याऽपसिद्धान्त इति भावः ॥ ८८ ॥ प्रकारांतरेण भेदसत्यतां

विश्वं सत्यं यदि तदा भेदः सत्यं भवेन्मम । विश्वांतःपातिभेदस्य यत्सत्ता च बलादभूत् ॥ ८७ ॥
सदद्वैतं जगन्मिथ्यात्वमतं सन्त्यजन्द्विधा । अपसिद्धान्तदोषेण दोषी स्यादिति चाधिकं ॥ ८८ ॥
किं चैक्यं ब्रह्मजडयोस्तवापि न ममापि न । अतः प्रागुक्तयुक्त्या तद्भेदः सत्योऽभवन्न किम् ॥ ८९ ॥
मिथ्यात्वं यदि सत्यं स्यात्सदद्वैतमतं गतम् । अभावद्वैतवादेपि सदद्वैतमतच्युतेः ॥ ९० ॥
मिथ्यात्वं यदि मिथ्या स्यात्सदद्वैतमतं गतम् । ब्रह्मवज्जगतोप्यस्य सत्यत्वावश्यकत्वतः ॥ ९१ ॥
वाक्यार्थो यदि चिन्मात्रं सर्वे वादा बहिर्गताः । वाक्यार्थो यद्यचिन्मात्रं खंडिता तर्ह्यखंडता ॥ ९२ ॥

साधयति । **किंचेति** ॥ प्रागुक्तयुक्त्या जडाजडयोः सत्यमिथ्याभूतयोरैक्यायोगादित्युक्तयुक्त्या । परस्य पाशाऽज्जुपरम्परामाह । **मिथ्यात्वमिति** ॥ द्वितीयस्याभावस्याङ्गीकारेपि सतोऽद्वितीयत्वं गतमिति भावः ॥ ९० ॥ कुत इत्यत आह । **ब्रह्मवदिति** ॥ तथा च जगत्सत्यं मिथ्याभूतमिथ्यात्वकत्वाद्ब्रह्मवदिति प्राप्तेरिति भावः । **बहिर्गता इति** ॥ चिन्मात्रातिरिक्तस्य वाक्यार्थोध्यत्वेनैक्यं मिथ्यात्वं निर्गुणत्वं

वा न सिद्ध्यतीति तदा सर्वे वादा बहिर्गता इत्यर्थः । **खण्डितेति** ॥ चिदतिरिक्तस्यापि वाक्यबोध्यत्वादिति भावः ॥ ९२ ॥ **बहिर्गतमिति** ॥ उभयथापि कालचिद्भावाभावरूपस्य गुणस्य प्राप्तेरिति भावः । **बहिरासीदिति** ॥ ब्रह्मणोऽवाच्यपदवाच्यत्वे वाच्यत्वस्यैव प्राप्त्याऽवाच्यत्वं गतं । तत्पदावाच्यत्वेऽवाच्यत्वबोधकाभावादेवावाच्यत्वं नेति भावः । परन्यायेनैव वाच्यत्वं साधयति । **मुख्यार्थेति** ॥ त्वया सर्वपदानां

अस्ति चेन्निर्गुणत्वं ते निर्गुणत्वं बहिर्गतम् । नास्ति चेन्निर्गुणत्वं ते निर्गुणत्वं बहिर्गतम् ॥ ९३ ॥
अवाच्यपदवाच्यत्वे बहिरासीदवाच्यता । तत्पदेनाप्यवाच्यत्वे बहिरासीदवाच्यता ॥ ९४ ॥
मुख्यार्थबाधे स्यादन्या वृत्तिर्गौण्यादिरूपिणी । मुख्यार्थाबाच्यताबाधे यद्वाच्यत्वदृढीकृतिः ॥ ९५ ॥
वाचा दृष्टार्थबाधे स्याल्लक्षणाया बहिष्कृतिः । वाचा दृष्टेरबाधे स्याल्लक्षणाया बहिष्कृतिः ॥ ९६ ॥
जगत्कर्तुरपेक्षायां क्रिया स्याच्चिति सङ्गता । तत्कर्तृनिरपेक्षायां क्रिया स्याच्चिति सङ्गता ॥ ९७ ॥

ब्रह्मणि लक्षणाभ्युपगमात्पदस्यापि लक्षणैव वाच्या । लक्षणायाश्च मुख्यार्थबाधमूलकत्वात् । मुख्यार्थश्चावाच्यपदस्यावाच्यत्वं । तस्य बाधे वाच्यत्वमेव दृढीकृतमिति भावः । तत्त्वमादिपदानां लक्षणा परेणाभ्युपगम्यते । तत्र शब्दस्य प्रत्यक्षबाधकत्वमस्ति न वा । आद्ये प्रत्यक्षस्य बाधितत्वेनाप्रमाणतया विरोध्यभावेन मुख्यार्थयोर्विशिष्टयोरैक्यसंभवाल्लक्षणानावश्यकता । द्वितीये प्रबलप्रत्यक्षस्य भेदग्राहकस्य जागरूकतया ऐक्ययोगेन लक्षणानावश्यकतेति भावः । **जगदिति** ॥ जगतः कर्तुरपेक्षायां कुलालवल्लोके कर्तरि क्रियादर्शनेन कर्तृभूतायां

यति । **लोक इति** । कुतोनेत्यत आह— **यदिति** । यदि हरिः रागद्वेषाभ्यां कारयेत्तर्हि लिप्येत न चैवं । किंतु पूर्वपापं निमित्तीकृत्य । **चौर्य** निमित्तीकृत्य शूलदातृराजवत् । तथा चोरमप्सुमज्जयतो राज्ञो दुःखं नास्तीति भावः ॥ २५३ ॥ राजदृष्टान्तादेशकालान्तरयोः प्राप्ताशुभ-

क्व कृष्णः कीर्तनादेव नरकक्लेशनाशनः । क्व जीवः कीर्तनादस्य नरकक्लेशभाजनः ॥ २५० ॥
न कर्मणा लिप्यतेऽसौ पापकेनेति हि श्रुतिः । न कर्मणा वर्धते नो कनीयानिति चापरा ॥ २५१ ॥
लोके कारयितारश्च लिप्यंते पातकैः किल । हरेः कारयितुश्चांऽहो नाभूत्पश्यास्य कौशलम् ॥ २५२ ॥
यत्पूर्वपापमना पापं कारयेन्नतु वैरतः । तत्पापलेपवान्नासौ चोरशूलप्रदातृवत् ॥ २५३ ॥
अप्सुमज्जयतश्चोरं न पापं नापि चासुखम् । तथा हरेः कारयितुः कुतः स्यादशुभागमः ॥ २५४ ॥
यस्मिन्काले यत्र देशे यो राजा तस्य केवलम् । तत्कालपापिनां शिक्षा श्लाघ्या न तु ततोऽन्यदा ॥ २५५ ॥
हरेस्तु सर्वदेशेषु सर्वलोकेषु च प्रभोः । पूर्वाघफलदत्वं च यच्छ्लाघ्यं प्राह सूत्रकृत् ॥ २५६ ॥
राजाधिराजस्तेनासौ कीर्त्यते सर्ववैदिकैः । पराऽस्य शक्तिरित्यस्तौत्तथा तमपरा श्रुतिः ॥ २५७ ॥

शङ्कामपाकरोति । **यस्मिन्निति** । तथा च सदा सर्वत्राधिपतेरीशस्य न खण्डाधिपतिराजवदशुभाशङ्केति भावः । पूर्वपापानुसारेण फलदत्वं यस्माच्छ्लाघ्यमत एव च भगवान्व्यासः 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयती'ति सूत्रयामास । दोषाधायकत्वे नासूत्रयदेव ।

ईदृशी शक्तिः परस्येत्यत्र श्रुतिमाह **परेति** ॥ अनेन 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबल क्रियाचे'ति श्रुतिं गृह्णाति । पापफलस्य कस्यचिद्भोगात् कस्यचित्स्वस्मरणात्कस्यचित् स्वापरोक्षज्ञानाच्च परः पराकरोतीति सर्वप्रमाणसम्मतम् । एवं च पापफलानि फलेन तमो भास्वानिव बलेन च नाशयन्हरिः पापलेपवान्कथं स्यात् । न हि स्वयं पङ्कमग्नः परानुद्धरेदिति भावः ॥ २६० ॥ स्वपापनिर्हरणमास्तां तावत् ईश्वरस्याऽसाध्यं नास्तीत्याह— **कृतेनेति** । 'नास्त्यकृतः कृतेने'ति श्रुतेः कर्मासाध्यत्वे मोक्षस्य मास्तु कर्मान्यथैव तं

नरकादौ दुःखफलं भोजयित्वैव पातकम् । प्रायः स नाशयेन्नृणां क्वचिच्च स्मरणादिना ॥ २५८ ॥
अपरोक्षज्ञानतश्च बलाद्भोगं विनैव च । पापानि नाशयेद्विष्णुरिति सर्वस्य सम्मतम् ॥ २५९ ॥
एवं च सर्वपापानि फलेन च बलेन च । अज्ञानिनां ज्ञानिनां च यतो नाशयति प्रभुः ॥ २६० ॥
अतो न कौशलेनैव पापालेपो रमापतेः । किंत्वन्धतमसं भास्वानिव हन्ति स्वतेजसा ॥ २६१ ॥

साधयामीति निश्चित्य विनैव कर्म यो दद्यात्तस्य स्वपापनिर्हरणमन्यद्वा किमप्यसाध्यं नास्तीति । अयमाशयः । सामान्यतः सकलमपि फलं कर्मसाध्यम् । यस्तु मोक्षः कर्मणाऽपि न साध्यते तं मोक्षं यः स्वज्ञानमात्रेण सम्पादयति तस्येश्वरस्य कर्मासाध्यमप्यसाध्यं नेति भावः । ईश्वरः स्वसामर्थ्येन सकलमपि साधयितुं शक्तोऽपि श्रुतिप्रामाण्यरक्षायै स्वकौशलमपि क्वचिदाश्रयतीत्याह— **श्रुतीति** । 'सर्वस्येशान' इति श्रुत्वा सर्वशक्तोऽपीश्वरः तृणाद्युद्धरणे स्वकौशलेन किंचिच्छक्तिमेव योजयति । न सर्वशक्तिम् । तथात्वेऽपेक्षावत्त्वरूपदोषप्राप्त्या

निरवद्यत्वश्रुतिव्याकोपापत्तेरिति भावः । अस्य जगतः सृष्टिस्थितिसंहारादिकर्तापि 'न कर्मणा वर्धत' इति श्रुत्वा न बध्यते । तथा च सकलसंहारकर्तुरपि यस्य पातकं न, तस्येतरपातकं नेति किमुवक्तव्यमिति भावः । **वेदवागिति** । 'पुण्येन पुण्यं लोकं नयति । पापेन पाप'मिति षट्प्रश्नोपनिषदित्यर्थः । तत् तस्मात् । पापजन्यं नरकदुःखं पापिनो जीवस्यैव । न तु तच्छून्यस्य हरेरित्यर्थः । उक्तं संगृह्णाति—

कृतेनयोऽकृतो नास्ति तं मोक्षं ज्ञानमात्रतः । विनैव कर्म योदद्यात्तस्यासाध्यं किमस्ति तत् ॥ २६२ ॥
श्रुतिप्रामाण्यरक्षायै क्वचित्कौशलमाश्रयेत् । किं चिच्छक्तिं यतः सर्वस्येशान इति च श्रुतिः ॥ २६३ ॥
कर्तास्य जन्मादिषु यो न बध्यत इति श्रुतेः । संहृत्य निखिलं यस्य न लेपः क्वास्य पातकम् ॥ २६४ ॥
पापेन पापलोकं स नयतीति च वेदवाक् । तत्पापजा नारकार्तिरपापस्य कथं भवेत ॥ २६५ ॥
एकोपाधिगतावेव यज्जीवपरमाविमौ । विलक्षणस्वभावौ तत्तयोरैक्यकथावृथा ॥ २६६ ॥
बिंबस्य प्रतिबिम्बैक्यमपि युक्तिसहं न ते । प्रत्यक्परागभावरूपविरोधस्य स्फुटत्वतः ॥ २६७ ॥

एकेति । विलक्षणस्वभावत्वं स्वाभाविकमेव । नत्वौपाधिकमिति दर्शनाय देहाऽख्यैकोपाधिगतत्वकथनम् । एवं जीवपरयोः स्वरूपत एव विरूपयोर्नैक्यमिति प्रसाध्य यद्बिंबप्रतिबिंबभावेनैक्यं परोक्तं तदपि निराह— **बिंबस्येति** । तदैक्यं न युक्तिसहमिति प्रतिज्ञा ॥ २६६ ॥ हेतुमाह— **प्रत्यगिति** । प्रत्यक्परागभावरूपहेतोर्व्याप्तिं परन्यायेनोपपादयति— **अस्मदर्थ इत्यादिना** ॥ प्रत्यक्परागभावमात्रेणेत्यनेन

साध्ये धर्मान्तरस्यापेक्षा हेतोर्नास्तीत्याह । तथा च बिम्बप्रतिबिम्बौ नैकौ । प्रत्यक्परागभावरूपविरुद्धधर्मत्वादात्मजडवत् । अत्र हेतोरप्रयोजकत्वशङ्का तु परभाष्याप्रामाण्यरूपानिष्टप्रदर्शनेन परिहरणीया । तथा च बिम्बप्रतिबिम्बयोरैक्याङ्गीकारेऽत्रैव व्यभिचरितं प्रत्यक्परागभावरूपहेतुं स्वग्रन्थस्यादावेव विषयविषयिभेदसाधनाय कथं वदेत्स्वद्भाष्यकार इति भावः ॥ २७१ ॥ बिम्बप्रतिबिम्बयोरैक्ये दोषांतर-

अस्मदर्थो ह्यात्मतत्त्वं प्रत्य पं च तत्किल । युष्मदर्थस्तु विषयः परागूपः स चाखिलः ॥ २६८ ॥
तयोः प्रत्यक्परागभावमात्रेणैव विरुद्धयोः । नेतरेतरभावोऽस्तीत्याह भाष्यकृदेवते ॥ २६९ ॥
अतः प्रत्यक्परागभावान्न बिम्बप्रतिबिम्बयोः । ऐक्यं स्यादात्मजडयोरिवेति प्रतिवादिना ॥ २७० ॥
साधिते सति न युक्तिं प्रत्याख्याति कथं भवान् । विपक्षे तव दूष्यं स्याद्भाष्यमित्यस्तिबाधकम् ॥ २७१ ॥
नह्यनैकान्तिकं हेतुमादावेव वदेत्सुधीः । कथं मृदुमुखं कांस्यदर्पणस्यान्तरं विशेत् ॥ २७२ ॥
न चेन्मुखेऽपि दाहस्यात्तप्ताम्बु प्रतिबिम्बिते । कथं स्थूलगजस्य स्यात्सूक्ष्मोपाधौ प्रवेशनम् ॥ २७३ ॥

माह— **कथमिति** । मृदुमुखमित्यनेन छेदभेदादिकं विनांतः प्रवेशोऽसम्भावित इति सूचयति । एवमप्यन्तः प्रवेशाङ्गीकारेऽनिष्टमाह— **नचेदिति** । स्थलान्तरेऽपि प्रवेशासंभवं दर्शयति— **कथमिति** । असम्भावितमपि यद्यङ्गीकरोषि तर्हि दर्पणे गजान्तःप्रवेशेन भागातिशयप्राप्त्या बालहस्तादर्पणस्याधःपातोऽपि स्यादिति भावः ॥ २७३ ॥ अन्तःप्रवेशे बिम्बस्य दोषांतरमाह— **प्रविष्टस्येति** । यदीदमेव

मुखं जले प्रविशेदधो मुखं सदेव प्रतीयेत । न तूर्ध्वमुखं न चेज्जले स्नातुस्तवापि मुखं विपरिवर्तितं सत्प्रतीयेत । दोषान्तरमाह— **दर्पणमिति** । फलितमाह — **अत इति** । उक्तं सर्वमपि दूषणमनुकूलतर्करूपमिति भावः । परप्रक्रियामनूद्यनिराह — **निबिडेत्यादिना** । निर्गतं चक्षुर्निबिडावयवद्रव्याघातेन शिलाहतशरवत्परावृत्तं सत्स्वमेव मुखं गृह्णातीति परोवक्ति । तन्नयुक्तम् । तथात्वे दर्पणात्परावृत्तं

यदिस्यात्तर्हि भारेणकरात्स पतितो भवेत् । प्रविष्टस्य तथैवस्यादाकारो नत्वतादृशः ॥ २७४ ॥
जलेस्नातुर्मुखं नोचेद्विपरीतं भवेत्तव । दर्पणं सुरभीकुर्यात्कस्तूर्यंतः प्रवेशतः ॥ २७५ ॥
अतो विसदृशत्वाच्च न बिंबप्रतिबिम्बयोः । एकता वक्तुमुचिता न्यायसंचारवेदिना ॥ २७६ ॥
निबिडावयवासङ्गात्परावृत्य मुखं स्वकम् । पश्येन्नयनमित्याह कश्चित्तच्च न युक्तिमत् ॥ २७७ ॥
तर्हि दर्पणतस्तस्मात्परावृत्तेन चक्षुषा । दर्पणोल्लेखिनी बुद्धिर्नैवोत्पाद्येति मे मतिः ॥ २७८ ॥
किन्तु कण्ठोपरिमुखमित्यवेक्ष्येत तन्मुखम् । एवं च प्रतिबिम्बस्यैवाभावोऽपि भवेत्तव ॥ २७९ ॥

चक्षुः स्वस्य मुखमेव कण्ठे मुखमिति धियं जनयेत् । पृष्ठगस्येव दर्पणस्य धीर्नस्यादिति । न केवलमेतावदेव । चक्षुषा बिम्बस्यैव ग्रहणेन प्रतिबिम्बाभावप्राप्त्या कयोरैक्यमापाद्यते । एवं परप्रतिबिम्बो जीवोप्यविद्यमानः स्यात् । अपि च चक्षुर्मृदुतरजलाहत्या परावर्तते चेत्कठिनशिलाहत्या कुतः परावृत्य स्वमुखं नेक्षते । अत इदमसङ्गतमिति समुदायार्थः ॥ २७९ ॥ अन्तः प्रवेशेदोषान्तरमाह— **अवाङ्मुखस्येति** ।

उपरागकाले स्पर्श आसीन्नवेति परीक्षायै पात्रगोळकेऽर्कदर्शनपरिपाटी प्राचामस्तिकिल । तदा गोळकाहत्या प्रतिनिवृत्तमपि चक्षुरावरणमिव सम्मुखे विद्यमानं द्रष्टुर्मस्तकमेव पश्येत् । न तु मस्तकं निर्भिद्योपगितनं सूर्यं पश्येत् । मस्तकं सूर्यस्य व्यवधायकमेवेति स्थिरीकर्तुं मध्यन्दिनगतमित्युक्तम् । तथा च मस्तकस्योर्ध्वभाग एव सर्यो न तु कचन कोणे मध्ये च मस्तकमधस्ताच्चक्षुरिति भित्तिव्यवहितपदार्थदर्शन इव मस्तकव्यवहितसूर्यदर्शने कथं चक्षुः समर्थं स्यात् यद्धस्तव्यवहितमपि सूर्यं द्रष्टुं नेष्टे चक्षुः । अत्युग्रदीधितिमिति युक्तयंतरं यत्साक्षादेवा-

अतः कयोरेकतास्याज्जीवोऽप्यस्तङ्गतो भवेत् । न परा वर्तते कस्माच्छिलातो नयनं तव ॥ २८० ॥
जलात्कुतो निवर्तेत ततोऽपीदमसङ्गतम् । अवाङ्मुखस्य ग्रस्तार्कं पश्यतः पात्रगोलके ॥ २८१ ॥
निवृत्तमपि ते चक्षुः कथं निर्भिद्य मस्तकम् । मध्यन्दिनगतं सूर्यं पश्येदत्युग्रदीधितिम् ॥ २८२ ॥
नैमित्तिकमिदं कार्यं निमित्ते सति जायते । तदभावेपुनर्नश्येत्पद्मकोशस्त्रिकामवत् ॥ २८३ ॥

दित्यं दृष्ट्वाऽत्युग्रदीधितित्वेनोपरागं निश्चेतुमशक्ता गोलकस्थं पश्यन्ति । इदानीमपि यदिपरावृत्तं चक्षुरम्बरस्थमेव पश्यतीति स्यात्तदा पूर्वमविद्यमाना शक्तिः कथमिदानीं परावृत्तिमात्रेण चक्षुषो जायेतातो बिंबप्रतिबिंबौ भिन्नावेवेति भावः ॥ २८२ ॥ ननु प्रतिबिम्बस्य नित्यत्वे सर्वदा दर्शनप्रसङ्गः । अनित्यत्वे कारणं वक्तव्यं । अपि च नैमित्तिकस्यास्य कथं बिम्बापसरण एव नाश इत्यादि चोद्यं सदृष्टांतं परिहरति **नैमित्तिकमित्यादिना** ॥ 'अत एव चोपमा सूर्यकादिवदि'त्याहेत्यर्थः । **अल्पोपमेति** ॥ सद्भिन्नत्वे सति किंचित्तत्सादृश्यमित्यर्थः ॥

कारणमाह— उपाधिरित्यादिना ॥ उपाधिर्दर्पणादिः ॥ मुखप्रत्यासत्तिर्निमित्तं । ऐक्ये बाधकं चाह— किमिति ॥ बिम्बप्रतिबिम्बयोरैक्ये लोकानुभवमूलकं व्यवहारमपि बाधकत्वेनाह— पश्येति ॥ ननु देवदत्तः स्वमुखं पश्यतीति ऐक्येऽपि व्यवहारोक्तीत्यत आह—

यथावा त्रपुसीसादेर्द्रवत्वं वह्निसङ्गमात । सूत्रकृच्चोपमामाह सूर्यकादिनिदर्शनात् ॥ २८४ ॥
प्रतिबिम्बस्य जीवस्य तद्बिम्बाल्पोपमा भवेत् । अस्योपाधिरुपादानं प्रत्यासत्तिर्मुखस्य च ॥ २८५ ॥
निमित्तं दृष्टकार्यस्य बलात्किं किं न कल्प्यते । किं सूर्यवत्सूर्यकोऽपि स्वभासा भासयेद्दिशः ॥ २८६ ॥
यत्सूत्रकारानुदितं तत्कोवा भाष्यकृद्वदेत् । पश्यादर्शेमुखच्छायामित्येवाहुर्हि लौकिकाः ॥ २८७ ॥
दर्पणेमुखमित्युक्तिर्न लोके नाऽप्यलौकिके । अस्ति चेत्साऽपि सादृश्यान्मुखचन्द्रादिवाक्यवत् ॥ २८८ ॥
कथं प्रतीचः शब्दोऽयं पराचः स्याद्विचारय । यथा चित्रस्य सिंहस्य सिंहसाम्येन सिंहवाक् ॥ २८९ ॥
तथा प्रतिमुखस्यापि मुखसाम्यान्मुखत्ववाक् । न हि प्रतिमुखत्वं च मुखत्वं चैकवस्तुनि ॥ २९० ॥
मुख्यं स्यात्तेन मुखवागेव तत्रौपचारिकी । मुखं प्रतिस्थितं वस्तु यतः प्रतिमुखं स्मृतम् ॥ २९१ ॥

अस्ति चेदिति ॥ गौणार्थकत्वे युक्तिमाह— कथमिति ॥ प्रत्यक्परागर्थयोर्वाचकः शब्दो नैक इति भावः ॥ २९० ॥ तत्र प्रतिमुखे । तथा च पदमहिम्नैव तयोर्भेदः सिध्यतीति भावः । भेदं न बाधयेत् किन्तु प्रतिबिंबत्वाच्छायावद्बिम्बानुगामितां तत्सादृश्यमेव बोधयेदिति । प्रतिकृतेरिति

हेतुगर्भं । प्रतिकृतित्वादेव सादृश्यं गमयतीति भावः ॥ २९६ ॥ अत्र दृष्टांतमाह— **विरुद्धेति** माणवकादेः समप्रत्ययवत्वेऽपि अग्निसिंहाद्येकैकानुपूर्वीकशब्दजन्यप्रतीतिविषयत्वेऽपि माणवकसिंहादिगता विरुद्धा प्रकृतिः स्वभावः यद्वत्तयोर्गुणक्रियादितः सादृश्यमेव बोधयति ।

अतस्तादृशशब्दोऽसावेव मुख्यत्वमर्हति । मुखशब्दो मुखे रूढः कथमन्यत्र नीयते ॥ २९२ ॥
विनोपचारं नह्यस्य तत्राप्यस्त्यनुशासनम् । मुखं प्रति स्थितत्वं च मुखस्यैव कथं भवेत् ॥ २९३ ॥
न हि स्वस्कन्धमारुह्य स्वयमेव प्रनृत्यति । अतो मुखात्पृथग्भूतं वाच्यं प्रतिमुखं बलात् ॥ २९४ ॥
भिन्नवाचकशब्दोऽयं विना गौण्या कथं वदेत् । तद्बिम्बप्रतिबिम्बत्वमपि जीवपरेशयोः ॥ २९५ ॥
वैसादृश्याद्भेदमेव साधयेन्नतु बाधयेत् । बोधयेद्वाप्रतिकृतेर्बिंबहर्यनुगामिताम् ॥ २९६ ॥
विरुद्धप्रकृतिर्यद्वत्समप्रत्ययवत्यपि । क्रोष्टुः स्रष्टा स पोष्टेशः क्रोष्टा जीवस्तथैव च ॥ २९७ ॥
सस्वतन्त्रोऽन्यतन्त्रोयं जीवः पूर्णसुखोह्यसौ । अयमल्पसुखो नित्यमुक्तोऽसौ बन्धभूरयम् ॥ २९८ ॥
स सर्वज्ञोयमल्पज्ञः सोऽभयोऽयं भयातुरः । स लक्ष्मीशो दरिद्रोऽयं स धर्ता धार्यते जगत् ॥ २९९ ॥

नत्वैक्यं । तथा हर्यनुगामितामिति पूर्वेणान्वयः । एवमियता प्रबन्धेन जीवप्रयोर्बिम्बप्रतिबिम्बभावाद्वा अन्यस्मात्कस्माच्चिद्वा नैक्यमिति सविस्तरं समर्थ्येदानीं सचमत्कारं सर्वसम्मतान्सहस्रशो विरुद्धधर्मान् तयोर्दर्शयन्नैक्यस्य शशशृङ्गतुल्यतामाह— **क्रोष्टुरित्यादिना** ॥

भवेदित्यन्तेन ॥ ३०७ ॥ यत्र क्वचनवाक्यमस्तीति नार्थः कथ्यते किंतु, सति योग्यत्वे । अन्यथाऽबलेत्येतावता मातरं स्वसारं वा गच्छेदिति

स सर्पशयनः सोऽयं वल्मीकोपान्तभूभयः । स देवो गरुडारूढः सोऽयं गारुडजीवनः ॥ ३०० ॥
स दिक्पालार्चितपदः सोऽयं दिक्पालपूजकः । स यज्ञभुगयं यज्वा स पूज्यः पूजकोह्ययम् ॥ ३०१ ॥
स देवर्षिगणत्राता सोऽयं देवर्षितर्पकः । अमर्त्योऽसावयं मर्त्यः सोऽजन्मी जन्मवानयम् ॥ ३०२ ॥
स दुष्टकुलसंहारी सोऽयं दुर्जनसेवकः । सोप्राकृतमहाकायः सोऽयं निन्द्यकलेवरः ॥ ३०३ ॥
शैलोद्धरणशीलोऽसौ शिलाभारासहोह्ययम् । स सिन्धुबन्धनक्रीडः कुल्याबन्धाक्षमोह्ययम् ॥ ३०४ ॥
स गङ्गाजनकः सोयं गङ्गास्नानपरायणः । स वेंकटपतिः सोऽयं तद्यात्राकरणव्रती ॥ ३०५ ॥
स प्रभुर्निर्गमोद्धर्ता सोऽयं तन्मन्त्रजापकः । इत्थं प्रकृत्या यौ नित्यं विरुद्धशतधर्मिणौ ॥ ३०६ ॥
तयोरैक्यं तदैव स्याच्छशशृङ्गं भवेद्यदि । रज्जुसर्पो भवेच्छुक्ती रजतं वा यदा भवेत् ॥ ३०७ ॥
गङ्गायां घोष इत्यादिशतैरप्युदिते सति । तस्यानुकूलमेवार्थं कलयेद्धि विचक्षणः ॥ ३०८ ॥
वाक्यमस्तीत्ययोग्यार्थे मतिं कः कुरुते सुधीः । अधिरोहति किं पुत्रः स्वसारं मातरं श्रुतेः ॥ ३०९ ॥

भावः ॥ ननु तत्त्वमसीत्यादिवदत्र तथाविधवाक्यमेव नास्तीत्यत आह— ॥ श्रुतेरिति ॥ अत्रापि तादृशवाक्यमस्तीति मात्रादि गमनम-

योग्यमपि भवताऽनुष्ठीयेतेति । अस्ति चैवं जातीयका श्रुतिरैतरेयब्राह्मणे सप्तमपंचिकायां तृतीयेऽध्याये 'नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः । तस्मात्तु पुत्रोमातरं स्वसारं चाधिरोहति ॥' 'एष पन्था उरुगायः सुशेवोयं पुत्रिणः आक्रमन्ते विशोकाः' इति ॥ नन्वेवं तर्हि मातृगमनादिकं प्रमितत्वाद्योग्यं स्यादिति चेत्सत्यम् । पूर्वोत्तरापरिशीलिनां भवादृशानां तत्तथैव । नास्माकं । यतोऽस्मिन् हरिश्चन्द्रोपाख्याने प्रथमतो नारदं प्रति राज्ञः प्रश्नवाक्ये एवं श्रूयते 'यन्विमं पुत्रमिच्छन्ति ये विजानन्ति येच न । किं स्वित्पुत्रेण विन्दते तन्म आचक्ष्व नारदेति, अत्र पुत्रप्राप्तिफलं ये जानन्ति ये च न जानन्ति इति ज्ञान्यज्ञानिप्रभे 'तत्सर्वे पशवोविदु'रिति पशूनामपि पुत्रप्राप्तिफलज्ञानमस्तीत्युच्यते । अत इदं वाक्यं पशुविषयकं न मनुष्याणाम् ' अत एवोत्तरत्रापि 'तं पश्यन्ति पशवो वयांसि च तस्मात्ते मात्रापि मिथुनीभवन्तीति हास्मा आख्याये'ति पश्वादीनामेव मात्राऽपि मिथुनीभावः नारदेनोत्तरतयाऽभिहित इत्यवधेयं विवेकिभिरिति सर्वमवदातम् ॥ एवं तत्वमस्यादिवाक्यस्य पूर्वोत्तरापरामर्शेनाभेदार्थकथनं वैद्यपुत्रन्यायमनुसरति । तथाहि— कश्चिद्वैद्यपुत्रः पितुरसन्निधिवेलायां राज्ञा वैद्याऽऽनयनाय प्रेषितं दूतमवलोक्य नास्ति पिता । अगमने राज्ञः कोपः स्यादस्मास्विति विचार्य स्वयमेव गत्वा राजानं व्यजिज्ञपत् । किमर्थं वयमाहूता इति । तदा स राजा रुग्णशय्याधिरूढां पुत्रीं दर्शयामास परीक्षायै । अयं वैद्यपुत्रस्तु स्वयमनभिज्ञाप्रगण्योऽपि स्वाज्ञानमाच्छादयितुकामः सर्वाण्यङ्गानि परीक्ष्य किमप्यनवगम्य राजपुत्रीमुखादेव नेत्ररोगं निश्चित्यौषधं प्रेषयिष्य इति गृहं प्रतिनिवृत्तः इतः परं किं मया कार्यमिति बहुधा विचार्य सर्वमपि गृहस्थं पुस्तकमालोड्य तत्रैकतमे विद्यमानां 'अक्षिरोगे तु सम्प्राप्ते कर्णं छित्त्वाद्रुदं दहेत्' इति कारिकामधिगम्य

प्राप्तब्रह्मानंद इव शीघ्रं कर्तरीमयःशलाकां च गृहीत्वा द्रुततरं गच्छन् पथि पित्रा सङ्गतः पृष्टश्च वृत्तं सर्वमकथयत् । तदा स पिता श्रुतवाक्यं वज्राघातमिव श्रुत्वा दीर्घं निश्वस्य 'इदं च पशुविषय'मित्युत्तरवाक्यं कुतो नाद्राक्षीः यतोह्यत्राहितं कर्तुमुद्यतोऽसीति बहुधोपालब्धवानिति ॥ कर्तृकर्मणोरैक्यस्य परेणानभ्युगमात् ॥ तन्न्यायेनैव कर्तृकर्मभावेन जीवब्रह्मणोर्भेदं साधयितुमुपक्रमते— **कर्तेत्यादिना** ॥ यदिकर्ता कर्मनस्यात् तर्हि— 'आत्मावारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' 'ब्रह्मविदाप्नोति परमि'त्यादिना कर्मतया श्रूयमाण-

कर्ता कर्म नचेद्ब्रह्म गम्यं दृश्यं मतं श्रुतम् । ध्यातं गातं द्रष्टृमन्तृश्रोतृध्यातृचितः पृथक् ॥ ३१० ॥
यद्यैक्यश्रुतिसाचिव्यादभेदः कर्तृकर्मणोः । तर्हि चेत्स्वप्रकाशत्वश्रुत्या वेद्यस्य वेत्तृता ॥ ३११ ॥
तत्र श्रुतेर्बलवती युक्तिश्चेदत्र पञ्चधा । स्पष्टं निरूपिता युक्तिः पंचबाणशरोपमा ॥ ३१२ ॥
तव श्रुतिस्त्रियं चोरः कुरुते स्वैरचारिणीम् । आत्मा वा इति वाग्ब्रह्मविदाप्नोतीति वाक्चते ॥ ३१३ ॥

गम्यादि ब्रह्मचैतन्यं कर्तृतया श्रूयमाणगन्त्रादि चैतन्यात्पृथक् स्यादिति भावः ॥ ३०८ ॥ ३०९ ॥ ऐक्यप्रतिपादकाद्वितीयश्रुतिबलाद्यदि-जीवब्रह्मणोरभेदस्तर्हि 'स्वयं भात'मित्यादि स्वप्रकाशत्वश्रुत्या वेद्यस्यैवब्रह्मणोवेत्तृतास्यात्। यदिकर्तृकर्मणोर्भेदसाधिका युक्तिः श्रुतेर्बलवतीत्यभिप्रैषि तदा कर्मब्रह्मचैतन्यस्य कर्तृजीवचैतन्यादन्यत्वदृश्यत्वमतत्वश्रुतत्वध्यातत्वेभ्यः पञ्चधा निरूपिता युक्तिस्तवैक्यश्रुतिस्त्रियं सावकाशतया स्वत एव चञ्चलां स्वैरिणीमिवार्थांतरपरायणां कुर्यादिति भावः ॥ ३१३ ॥ कर्तृकर्मणोर्मध्ये कर्मत्वं ब्रह्मण एवेत्याह— **दृश्यत इति** ॥

यत इयं दृशिर्निर्विकल्पका त्वन्मतेब्रह्मसाक्षात्कारस्य निर्विकल्पकत्वात् ॥ अतो ब्रह्मैव कर्मेति वक्तव्यम् । अत्रान्यस्याभानात्तथा च दृश्यत्वसमानाधिकरणतया श्रूयमाणं ध्येयत्वादिकमपि ब्रह्मण एवापतितं । त्वं तु ध्येयत्वादिकं ब्रह्मणि नेति प्रलपन्न सभासु शोभसे किंत्वरण्यायैव । अरण्ये शोभस इति वाच्येऽरण्यायेत्युक्तिस्त्वादृशदुर्जनानामरण्येऽपि शोभा नास्त्येव किंतु भवादृशागतिकजनसंमर्देनारण्यस्यैव शोभेति सूचयितुम् । तथा चात्मावेत्यादिश्रुतिर्दृश्यं यमात्मानं श्रोतव्यादितया जगौ । तमेवगम्यं ब्रह्मेत्वंत्वा वाङ्निर्णिनाय ॥ अनयोः श्रुत्यो-

ब्रह्मणः कर्मतामाहपंचधा या प्रपंचिता । दृश्यते ब्रह्मचिन्मात्रं निर्विकल्पकधीर्हि सा ॥ ३१४ ॥
ततः श्रोतव्यमन्तव्यध्येयत्वादि च तद्गतम् । सामानाधिकरण्याय तेनारण्याय शोभसे ॥ ३१५ ॥
दृश्यमात्मानमेवाद्या श्रोतव्यादितया जगौ । दृश्यं ब्रह्मैव गम्यं च वागन्त्या निर्णिनाय हि ॥ ३१६ ॥
यं ग्रामं शृणुयान्मत्वा ध्यात्वा मार्गे तमेव च । मध्ये पश्यन् विशत्यन्ते तेन युक्तिं युनक्ति वाक् ॥ ३१७ ॥

राद्यान्त्यभावस्तु ग्रन्थकृद्दर्शितक्रमत इति ध्येयम् । श्रवणादिविषयस्यैव गम्यत्वमित्यत्रयुक्तिमप्याह— **यमिति** ॥ एतेन ब्रह्म गम्यं दृश्यत्वात्तथा दृश्यं ध्यातत्वात् ध्येयं मतत्वात् । मतं श्रुतत्वात् ग्रामवदित्यनुमानं सूचितं । एवं च निर्विकल्पकधीत्वेनान्यस्य विषयत्वशङ्काभावान्मध्ये दृश्यतया त्वदुदितं ब्रह्म पूर्वोत्तरयोः श्रवणादि गमनयोरपि कर्मासीदिति कर्मविचारकाले उभयत्र कर्मतया ब्रह्म देहलीदीपायत इति भावः ॥ ३१८ ॥ ब्रह्मणः कर्मत्वं प्रसाध्य जीवस्य कर्तृतां साधयति । **य इति** ॥ देहांतःकरणादेर्जडस्य कर्तृत्वे कृतहान्यकृताभ्यागमप्र-

सङ्गात् जीवस्यैव सर्वत्र कर्तृत्वे वाच्ये इहापि श्रुतौ गन्तृत्वादिना कर्तृतया श्रूयमाणा जीवचित्कथं कर्मभूतब्रह्मचित्स्यात् । कर्तृकर्मणोरैक्यस्य त्वयैवानभ्युपगमात् । कर्तृत्वं चैतन्यस्यैव न जडस्येति परन्यायेन परं बोधयति— किं चेति ॥ ब्रह्माहमस्मीत्यैक्यसाक्षात्कारो

एवं च श्रुतियुक्तिभ्यां कर्मतैकस्य सम्मता । तस्यन्मतोदितं मध्ये निर्विकल्पकगोचरम् ॥ ३१८ ॥
चिन्मात्रं देहलीदीपायते कर्मविनिर्णये । यः पुण्यकर्ता तज्जन्यफलभोक्ता स एव हि ॥ ३१९ ॥
तद्धेतुयागकर्ता च यजमानो न चापरः । पूर्वदेहोऽस्य पूर्वांगं स्वर्देहोऽस्याङ्गमुत्तरम् ॥ ३२० ॥
प्राग्देहो यज्ञकर्ता चेत्कृतहानिर्भवेन्मृतौ । स्वर्देहो भोगभोक्ता चेदकृताभ्यागमो भवेत ॥ ३२१ ॥
यथा सर्वत्र कर्तृत्वं चितस्तद्वदिहापि च । कर्त्री जीवचिदेवाभूत्सा कर्म ब्रह्मचित्कथम् ॥ ३२२ ॥
किं चैक्याध्यक्षधीवेद्यं कर्म चिन्मात्रमेव ते । ब्रह्माहमस्मीति दृशिकर्तृतां चैकतोचितम् ॥ ३२३ ॥
चिन्मात्रमेव भजते निर्विकल्पकमंविद् । किमन्यः स्वप्रकाशः स्यात्तत्रिन्मात्रकर्तृता ॥ ३२४ ॥
बलादभूत्तेन चितावभूतां कर्मकर्तृते । ततः काकाक्षितामाप तव ब्रह्मनिरीक्षणम् ॥ ३२५ ॥

निर्विकल्पकसंविद्रूपः परस्याभिमतः । तत्र चैक्ययोग्यं चिन्मात्रमेव कर्तृ । निर्विकल्पकतयान्यस्याप्रसक्तेः जडत्वेनैक्यायोगाच्चान्यस्य । तथापि ईदृशं ब्रह्मनिरीक्षणं चिन्मात्रस्य कर्तृतां ब्रह्मणः कर्मतां च साधयत्काकाक्षितामाप ॥ कर्तृत्वकर्मत्वयोर्द्वयोरप्येकेनैव

निरीक्षणेन चिति सिद्धेः ॥ विवेकार्थमेतावच्चर्चितम् ॥ वस्तुतस्तु ब्रह्माहमस्मीति साक्षात्कारेऽन्यस्य स्वप्रकाशस्याभावेनान्यस्य कर्तृत्वशङ्काया एवाभावात् कर्ता कर्म च नैकमिति तव प्रक्रियोरगी उक्तप्रत्यक्षं निरस्य त्वदीयां जीवब्रह्मणोरैक्यमित्यादिकां प्रक्रियां हन्ति ॥ ३२६ ॥ एवं च ज्ञानफलीभूतगतेः कर्माऽपि चिदेव ॥ नचेत्पूर्वोक्तन्यायः कुप्येदित्याह— उक्तेति ॥ ग्रामं दृष्टान्तीकृत्योक्त इत्यर्थः । अनुभव-

यत्कर्तृचित्कर्मचिच्चनैकेयं ते मते भवेत् । तत्सर्वप्रक्रियां हन्ति तवैका प्रक्रियोरगी ॥ ३२६ ॥
एवं ज्ञानफलीभूतगत्या गम्यं तदेव हि । उक्तन्यायो न चेत्कुप्येत्तत्कर्मचिदभूत्ध्रुवम् ॥ ३२७ ॥
अत्र कर्तृ च चिन्मात्रं चितोऽन्यन्मनआदिकम् । करणं कर्णतः शृण्वन्मन्वानो मनसा तथा ॥ ३२८ ॥
ध्यायन्पश्यंश्चेतनो हि तवापि च ममापि च । दर्शनानन्तरं यद्धि ब्रह्माप्नोति फलात्मना ॥ ३२९ ॥
सा चिद्धि तेन तद्धेतुमालेयं तद्भवैव हि । न्यायः कुप्येन्नचेदुक्तो मुक्तोऽपि त्वं निपात्यसे ॥ ३३० ॥
मनोवृत्तिर्हि दृक्कर्मवीरोपःस्यान्नोचितश्चितः । निराकारा च साचित्तद्ब्रह्म कर्म बलादभूत् ॥ ३३१ ॥

तोऽपि चितः कर्तृत्वं जडस्य करणादित्वं दर्शयति— अत्रेति ॥ श्रवणदर्शनगमनादावित्यर्थः । सा चिद्धीति ॥ यद्ब्रह्म फलत्वेनाप्नोति कर्मतया श्रुता साऽपि चिदेव ॥ इति कर्तृकर्मभावस्यचित्येवानुभवेन जीवगतान्तःकरणादिपरम्परा दर्शनादिहेतुमालैव । अथवा याचित् फलीभूत-गमनकर्मतया श्रुता तादृशफलहेतुध्यानादिकारणमालापि तद्भवैव नाम तच्चित्कर्मकैवोक्तन्यायस्य जागरूकत्वादिति भावः ॥ ३२९ ॥ मुक्तोपीऽति

वक्ष्यमाणरीत्या मुक्त्युत्तरकालेऽपि ब्रह्मण: कर्मतया कर्तृकर्मणोश्चैक्यानभ्युपगमेन मुक्तोऽपित्वं निपात्यसे अध: पात्यसे नीचजीव एव नोचं ब्रह्म भवसि । ग्रन्थकृतैवं साध्यमानत्वान्निपात्यसे इत्युक्तम् । मुक्तावपि ब्रह्मण: कर्मतासाधनरीतिं दर्शयति— **मनोवृत्तिरित्यादिना** ॥ इत्थरूपा ज्ञानरूपा मनोवृत्ति:[1] सर्वारोपरूपास्यात्[2] । तथापि पारमार्थिकचित:[3] ब्रह्मण: आरोपरूपानस्यात् ब्रह्मण: अनारोपितत्वात् । ततश्चारोपितं किमपि विषयो नात्रेति भाव: ॥ तथा च चरमसाक्षात्काररूपमनोवृत्तौ कर्मीभूता चिद्ब्रह्मचिदेव नत्वारोपितं किंचित् ।

गत्या गम्यं हि ते ब्रह्म कर्मैवात्रापरा गति: । न तेऽपि तेन सर्वत्र गति: सैवोक्तवर्त्मना ॥ ३३२ ॥
मुक्तौ तत्कर्मतामर्हेत्तन्नार्हेत्कुत्र कर्मताम् । स्वरूपवेदनायां हि कर्मतां त्वं न मन्यसे ॥ ३३३ ॥
वेदनांतरवेद्यस्य कर्मता सम्मतैव तत् । एवं च कर्तृकर्मत्वमेकत्रानुचितं तव ॥ ३३४ ॥
कर्मक्षयाऽख्य मुक्तौ च नामुंचदिति मे मति: । विरुद्धधर्मवैशिष्ट्यवत्योश्चित्योश्च नैकता ॥ ३३५ ॥

निराकारायाश्चितो विषयत्वाभ्युपगमेनान्यस्य कर्मत्वशङ्कैवनेति सूचनाय निराकारेति चिद्विशेषणम् । अन्यथा वृत्तेर्निष्प्रकारकत्वभङ्गापत्ते: । तथा च साक्षात्कारस्य ब्रह्म बलात्कर्माभूत् इति तत्फलभूतगतेरपि तदेव कर्म । अपरा गतिरुक्तवर्त्मना नास्तीति सर्वत्र कर्मत्वे सैव चिद्वृतिरिति मुक्तावपि गतिकर्मीभूतं ब्रह्म कुत्र कर्मतां नार्हेदिति भाव: ॥ ३३२ ॥ ब्रह्मण: वृत्तिकर्मत्वं परस्यापि सम्मतमित्याह— **स्वरूपेति** ॥ अवेद्यत्वं स्वप्रकाशत्वमिति वदताऽपि परेण स्वरूपवेदनायामेव कर्मता नाभ्युपगम्यते । मनोवृत्तिरूपवेदनान्तरवेद्यस्य ब्रह्मण: कर्मत्वं तस्यापि

सम्मतम् । अन्यथा वेदांतश्रवणादिवैयर्थ्यापत्तेः । तथाच कर्मक्षयाख्यमुक्तावपि त्वन्मतंस्वीत्या विरुद्धः कर्मकर्तृभावोस्ति । यदविद्याध्वंसकालेऽप्यस्ति तन्नमायिकमिति ते रहस्यम् । तथाचामायिककर्तृकर्मभावरूपविरुद्धधर्मवत्योश्चित्योर्नैकतेति । ब्रह्मणो गम्यत्वरूपं श्रूयमाणं फलं तव विषवृक्षफलसममासीदिति भावः ॥ ३३६ ॥ कर्तृकर्मणोर्विरोधं परोक्तमेवानुवदति **एकेति** ॥ एकस्यां क्रियायां नैकं कारकद्वयत्वमाप्नोतीति

अविद्याध्वंसकालीनं समस्तं च न मायिकम् । इति यस्य रहस्यं हि तस्यहास्यमभून्मतम् ॥ ३३६ ॥
फलं च विषवृक्षस्य फलकल्पमभूदहो । एकक्रियायामेवैकं कारकद्वयरूपवत् ॥ ३३७ ॥
न भवेदिति या युक्तिः सा सर्वत्र समैव हि । यत्कुठारः स्व(स) स्वरूपं स्वयमेवच्छिनत्तिन ॥ ३३८ ॥
अतः क्रियाया वैजात्यान्न किंचिदपि ते फलम्।परस्मिन्समवेतायाक्रि(तंतक्रि)या तत्फलशालियत् ॥ ३३९ ॥
तत्कर्मेत्युच्यते तच्च क्रियायाः समवायिनि । स्वस्मिन्कर्तरि नैव स्यादिति युक्तिर्हि मायिनाम् ॥ ३४० ॥
अतः कर्तृत्वकर्मत्वे कथमेकत्र सङ्गते । भवेतामैक्यधीरूपस्वनिष्ठैकक्रियां प्रति ॥ ३४१ ॥

परोवक्ति । इदं च सर्वसाधारणम् ॥ यतः कुठारः स्वस्वरूपं स्वयं न च्छिनत्ति । तथाच यावा कावा क्रिया स्यात तत्र नैककारकस्य द्विरूपत्वमित्येव नियमः ॥ न तु क्रियावैजात्यं प्रयोजकमिति । प्रकृते क्रिया ज्ञप्तिरूपा न परिस्पन्दरूपेति विशेषोऽप्रयोजक इति भावः ॥ भवतु कर्तृकर्मणोर्विरोधः स किंनिमित्त इत्यतः कर्मतां निर्वक्ति— **परस्मिन्निति** ॥ परसमवेतक्रियाजन्यफल-

शालित्वं हि कर्मत्वम् । तथा चात्र कर्मलक्षणे क्रियायां कर्मभिन्नसमवेतत्वस्य प्रविष्टत्वेन न क्रियाश्रयस्य कर्तुः कर्मत्वमिति भावः ॥ तथा चैक्यसाक्षात्काररूपजीवनिष्ठैककियायां जीवब्रह्मणोः प्रतीयमाना कर्तृकर्मभावरूपद्विप्रकारता स्वयमेव तयोर्द्वित्वं भेदं च साधयेदेव ॥ तत्र श्रुतेरपि सहकारित्वे भेदं साधयतीति किमु वक्तव्यम् ॥ तथा च बलवती युक्तिस्त्वच्छ्रुतिं व्यर्थीकृत्य स्वार्थं साधयेदेव । ततस्त्वच्छ्रुते-र्व्यर्थीकृतत्वात् ऐक्यार्थरहिततया कृतत्वादित्यर्थः ॥ अस्य हेतोः साध्यं भेदो नासत्व इति ॥ ३४३ ॥ भेदस्य सत्वतां रीत्यन्तरेण

अतो ब्रह्मचितो जीवचितश्च द्विप्रकारता । तयोर्द्वितां दिशेत्सा च तद्भेदं साधयेद्ध्रुवम् ॥ ३४२ ॥
किं भेदेऽपि श्रुतेः सत्वाद्युक्तिर्बलवती मम । कथं न साधयेत्स्वार्थं व्यर्थीकृत्य भवच्छ्रुतिम् ॥ ३४३ ॥
तत एव न भेदोऽयमसत्यस्त्वच्छ्रुतेर्भिया । किं चापरोक्षज्ञानांते गन्तृगम्यत्वयुक्तितः ॥ ३४४ ॥
महामुक्तौ च यत्सत्ता तत्सत्ता केन बाध्यते । कथं कदाचिन्मुक्तस्य नित्यमुक्तस्य चैकता ॥ ३४५ ॥

साधयति **किंचेति** ॥ गन्तृगम्यत्वरूपपूर्वोक्तविरुद्धधर्मेण मुक्तावपि यस्य भेदस्य सत्ता स न बाध्यत इत्यर्थः । विरुद्धधर्मान्तरमप्याह— **कथमिति** ॥ कदाचिन्मुक्तत्वनित्यमुक्तत्वरूपौ तौ धर्मौ तौ ब्रह्मजीवौ भिन्नतः भिन्नौ कुरुतः ॥ अकर्णास्तकर्णवत् ॥ अकर्णो जात्या बधिरः । अस्तकर्णः सन्निपातादिप्रबलरोगोपहतश्रोत्रेन्द्रियः । अनयोर्यथा वा भेदः । एवं नित्यमुक्तानित्यमुक्तयोरपीति भावः ॥ ३४५ ॥ ऐक्यस्यैव दुर्बलत्वं परन्यायेन साधयति— **अपिचेति** ॥ भेदनिषेध्यमैक्यमेवासत्वार्हम् । निषेधकभेदस्य प्रबलत्वादिति

भावः ॥ ३४६ ॥ अतस्त्वन्यायेनैवैक्यस्य दुर्बलत्वात् ॥ बाणेन निषेधस्य विधिबाधकत्वरूपेण । लोकमर्यादयाप्यैक्यं दूष्यं भेदः पोष्य इत्याह— **किं चेत्यादिना** ॥ **तदनन्यस्येति** ॥ इदमपहाससूचकम् ॥ ब्रह्मानन्यत्वं जगतो वक्ति परः 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यादाविति तेनैव शब्देन निर्देशः ॥ तथा चैकस्यैव ब्रह्मणः स्वरूपेण पोष्यत्वं जगद्रूपेण दूष्यत्वमिति विरुद्धधर्मवत्वं प्राप्तं तथाऽपि नास्ति भेदः

हन्तोभौ तौ च धर्मौ तौ भिन्नोऽकर्णास्तकर्णवत्। अपि चैक्यनिषेधात्मा भेदो मे तेन तेऽध्वना॥ ३४६ ॥
निषेध्यैक्यस्यैव सत्ता न युक्ता दुर्बलं हि तत् । अतस्तवैव बाणेन प्राणत्यागोऽभवत्तव ॥ ३४७ ॥
किं च राज्ञो द्रोहकर्ता राष्ट्रस्य द्रोहकृच्च यः । स एव रूक्षः सर्वत्र शिक्ष्यो दृष्टो न चापरः ॥ ३४८ ॥
एवं च श्रौतनित्येशसर्वसर्वस्वमाचकम् । शोचकं तदनन्यस्य सर्वस्य जगतोऽपि च ॥ ३४९ ॥
तवैक्यमेव शिक्ष्यं स्यान्नतु भेदोऽखिलस्य च । रक्षकः सर्वमर्यादानिर्वाहकशिरोमणिः ॥ ३५० ॥
भगवच्छ्रौतमाहात्म्यवार्धिवर्धनचन्द्रमाः । तत्सत्यार्थो श्रुतिर्भेदश्रुतिरेव न ते श्रुतिः ॥ ३५१ ॥

किंत्वनन्यत्वमेव । अहो प्रतिपादनकौशलं । तत् लोकन्यायेनैक्यस्यैव दोषार्हत्वात् । भेदश्रुतिरेव सत्यार्था न ते श्रुतिरिति । ऐक्यस्यैव त्याज्यत्वे लोकगाथामपि प्रमाणयति— **त्यजेदिति** ॥ अनेन 'त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थ इति' वाक्यं गृह्णाति । **सर्वेति** ॥ अनेन 'सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डित इति' वाक्यं गृह्णाति ॥ अर्धं त्यक्त्वाऽप्यर्धं रक्षतीत्यर्थः ॥ **दत्वेति** ॥

'आत्मार्थे पृथिवीं त्यजेदिति' न्यायात् ॥ **तदिति** ॥ सर्वप्रमाणलोकविरुद्धत्वात् । नाभिसंहितौ नाभिप्रेतौ ॥ **केनापीति** ॥ ताटङ्कसदृशं मुख्यार्थं त्यक्त्वाऽमुख्यार्थमादायापि स्वात्मानं रक्षेदिति भावः ॥ ३५४ ॥ येन मुख्यार्थः स्वस्य दीयते ताटङ्कदातृभर्तारमिव तमेव भजते । तन्मतमेव रक्षेदिति भावः ॥ ३५६ ॥ गोसदृशी अद्वितीयश्रुतिः क्षीरसदृशं जीवादिभिन्नं ब्रह्म सूते । न पुनः कर्कटीव पुत्रप्रसववेलायां स्वात्मानं

त्यजेदेकं कुलस्यार्थ इति प्राचां वचः स्मर । सर्वनाशे समुत्पन्ने सत्यर्धं रक्षते किल ॥ ३५२ ॥
दत्वाऽपि पृथिवीं सर्वामात्मा रक्ष्योऽखिलैः किल । तत्स्वनाशजगन्नाशौ वाक्योक्तेनाभिसंहितौ ॥ ३५३ ॥
यथा चोरगृहीता स्त्री स्वशिरच्छेदकारणम् । दत्वा सुवर्णताटङ्कं कर्णपत्रधरा सती ॥ ३५४ ॥
जिजीविषेत्तथैषावाक् केनाप्यर्थेन जीवति । रत्नताटङ्कसदृशमुख्यार्थे सति भारती ॥ ३५५ ॥
अर्थदातारमेवेयं भर्तारं भजते ध्रुवम् । ब्रह्म द्वितीयं नैवेति वाक् चाश्वोनेतिवाक्यवत् ॥ ३५६ ॥
द्वितीयादतिभिन्नं तद्ब्रह्माह पदसम्पदा । तदुग्धदोग्ध्री गौरेषा प्रक्षिपन्तीव न कर्कटी ॥ ३५७ ॥

हन्तीत्याह — **तदुग्धदोग्ध्रीति** ॥ एवं मिथ्यात्वश्रुतिरपि गौरेव न कर्कटीत्याह **यदिति । मिथ्यात्वश्रुतिरिति** ॥ मिथ्यात्वबोधकत्वेन पराभिमतानेहनानेत्यादिका । अथवा यत् यस्मात् मिथ्यात्वश्रुतिः कर्कटीव स्वनाशकमर्थं न ब्रूते तत् तस्मात् एषा नेहनानेत्यादिका दुग्धसदृशगुणक्रियादिभेदाभावरूपार्थप्रसवित्री गौरेव न कर्कटीति भावः । पूर्वोक्तरीत्या स्वनाशकमर्थं नाह यतोऽतः । सत्यार्थश्रुतेः विश्वं सत्यमित्यादेः ॥ अर्थव्यत्यासाय व्यावहारि-

कसत्यत्वरूपाय ॥ ब्रह्मण्यपि व्यावहारिकत्वस्य स्मृतत्वाज्जगत्यपि तन्न भीषकमित्याह — **त्वं चेति** ॥ भागवतदशमस्कन्धगतं कृष्णं प्रति वसुदेववाक्यं चतुःसप्ततितमेऽध्याये ॥ विविधप्रकारेषु पदार्थेषु त्वं च त्वमेव सन् सद्भावं कुर्वन् सदा व्यावहारिकः हानादिव्यवहारनिर्वाहको नान्य इत्यर्थः ॥ व्यत्यासेऽपि व्यावहारिकार्थकत्वेऽपि । लोकदृष्ट्या निर्विकल्पकचरमप्रमाया बाधकत्वमेव नेत्याह— **निष्प्रकारकेति** ॥

यन्मिथ्यात्वश्रुतिश्चाह न मिथ्यात्वं स्वनाशकम् । तत्सत्यार्थश्रुतेरर्थव्यत्यासाय श्रमो वृथा ॥ ३५८ ॥
त्वं चामीषु विकारेषु सन्सदा व्यावहारिकः । इत्युक्तेर्ब्रह्मसाम्यास्या व्यत्यासेऽपि न मेऽस्ति भीः ॥ ३५९ ॥
निष्प्रकारकतानर्हरूप्याभावादिगोचरा । नेदं रजतमित्याद्या बाधिका धीर्विदां मता ॥ ३६० ॥
तन्निर्विकल्पकब्रह्मप्रमा बाधप्रमैव न । बाधाभावाच्च भेदादेः सत्यताभूदबाधिता ॥ ३६१ ॥
या चान्ते निर्विकल्पा धीः सा चोत्तरविकल्पतः । अनुमेया तवैक्ये च नासौ स्याद्भ्रमरूपवान् ॥ ३६२ ॥
अतोऽनुमापकाभावात्मैवाभूच्छशशृङ्गवत् । अध्यक्षाच्च न सा सिध्येदतीन्द्रियशरीरिणी ॥ ३६३ ॥

रूप्यादिबाधकत्वेनाभिमते नेदं रजतमित्यादिबाधकज्ञाने सप्रकारकत्वस्यैव सर्वसम्मतत्वान्निर्विकल्पकमिदं भवदीयं चरमज्ञानं बाधकमेव न । तथा च बाधकाभावाद्भेदसत्यताऽबाधितेति । चरमप्रमाया अप्रामाणिकत्वं चाह । **या चेति** ॥ निष्प्रकारकचरमप्रमायां किं प्रमाणम् । न तावत्प्रत्यक्षम् । निरसिष्यमाणत्वात् । नचागमः तथाविधस्यानुपलम्भात् । परेणाप्यनुक्तत्वेन ग्रन्थकृता नायं पक्षो दूषितः । नाप्यनुमानं । निर्विकल्पकस्यो-

त्तरभाविसप्रकारकज्ञानानुमेयत्वात् तव त्वैक्ये जाते न किमप्यवशिष्यत इत्युत्तरत्र न सविकल्पकभ्रमः । तथा च बाधकं शशशृङ्गतुल्यमासीदिति भावः ॥ ३६२ ॥ तत्र प्रत्यक्षं निराह । **अध्यक्षादिति** ॥ निर्विकल्पकत्वादिभिस्तस्यातीन्द्रियत्वाभ्युपगमात् । भगवति मायाऽभावं प्रमाणेन प्रसाध्य भेदस्यामायिकतया सत्यत्वं द्रढयति ॥ **मायेत्यादिना व्यावहारिक इत्यन्तेन** ॥ अनेन 'करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेक्षितुमीशते गुणैः । माया यथाऽयोभ्रमते यदाश्रया ग्राव्णे नमस्ते गुणकर्मसाक्षिणे' । इति पञ्चमस्कन्धगतभूवाक्यं सूचयति । य.

माया यथाऽयो भ्रमत इति भागवते शुकः । कांस्यपात्रसदृक्क्षुद्रजीवेष्वेव कृतास्पदे ॥ ३६४ ॥
यदाश्रयेति प्रागुक्तत्रिगुणाश्रयतोचिते । मायापदोदिताज्ञाने जीवानां भवकारणे ॥ ३६५ ॥
अयसः कांस्यपात्रान्तर्भ्रमतः समतोदिता । ग्राव्णे नमस्त इत्यन्ते सोऽयस्कांतशिलोपमाम् ॥ ३६६ ॥
जगतामीश्वरे प्राह तेनाज्ञानादि दूरगम् । अधोभागे विदूरस्थमायाभ्रमणकारणम् ॥ ३६७ ॥

विश्वस्थित्यादिकरोति । यस्योप्सितं सत्वादिगुणैः मोहितत्वाद्ब्रह्मादयो नेक्षितुं शक्नुवन्ति । यदाश्रया उक्तगुणाश्रया माया अज्ञानं जीवगतम् । अयस्कांतमणिना कांस्यपात्रस्थिताऽयोवद्भ्रमते । तस्मै गुणकर्मसाक्षिणे द्रष्ट्रे । न तु तद्बद्धाय । ग्राव्णे अयस्कान्तमणिसदृक्षाय मायाप्रवर्तकाय ते नमइत्यर्थः । यदाश्रयेत्यस्य यं त्वामाश्रित्य त्वन्नियततया स्थितेत्यप्यर्थः । अयोदृष्टान्तस्य मायायां दानेन तदाश्रयकांस्यपात्रसदृशः जीव एव मायाश्रय इति । ग्राव्णे नम इत्युक्तया परात्मनः अयस्कांतमणित्वरूपेण मणेरयोऽनाश्रयत्ववत् परस्य मायानाश्रयत्वं । किन्तु दूरतस्थि

तत्वं च सिद्ध्यतीत्याह । **कांस्येत्यादिना** ॥ अत्र युक्तिं स्वयमाह । **यथेति** ॥ जीवः उपाधिसंबधी प्रतिबिंबत्वात् दर्पणसंबधिप्रतिमुखवत् । ईशोवा न मायासंम्बधी बिंबत्वात् दर्पणासंबधिमुखवत् । माया जीवसंबन्धिनी नेशसंबन्धिनी वा उपाधित्वात् दर्पणवत् । इत्यनुमानं सूचितम् । अतः स्मृतिरियं युक्तियुक्ता बलवती । तत् बलवच्छ्रुतिविरोधात् । श्रुतिः 'मायिनं तु, महेश्वर'

मम स्वामिनमेवाह न तु मायामयं जगौ । यथोपाधिर्दर्पणादिप्रतिबिम्बस्पृगीक्ष्यते ॥ ३६८ ॥
मुखाख्यबिम्बाद्दरस्थस्तथाऽज्ञानं च जीवगम् । भवेत्तवापि राद्धान्ते बिंबाख्यब्रह्मणस्तु तत् ॥ ३६९ ॥
अतिदूरस्थितं च स्यादतो युक्तिमती स्मृतिः । तन्मायित्वश्रुतिः सर्वा निर्माये धनितोक्तिवत् ॥ ३७० ॥
योज्याहमिति चाध्यक्षं जैवप्रत्यक्षमेव तत् । ब्रह्माज्ञानकथाप्यज्ञ तत्स्वाज्ञानानुमापिका ॥ ३७१ ॥
निर्मायभगवद्भेदस्तन्मायाकल्पितोपि न । एवं चामायिकः सोऽयं कथं स्याद्व्यावहारिकः ॥ ३७२ ॥
युजिर्योग इतिख्यातधातूत्थफलबोधिते(तः) । सायुज्याख्यमहामोक्षेप्येकस्थानस्थयोर्द्वयोः ॥ ३७३ ॥

मित्यादिका ॥ योज्या स्वामित्वपरतया । प्रत्यक्षं जीव एवाज्ञानं साधयति नेशे । तत्राज्ञानकल्पनं स्वाज्ञानानुमापकमेव । तथा च भेदो न व्यावहारिकः अमायिकत्वात् ब्रह्मवदिति भावः ॥ ३७२ ॥ भेदस्यामायिकत्वं मुक्तिवाचकसायुज्यपदपर्यालोचनयापि सिद्ध्यतीत्याह । **युजिरिति** । धातूत्थं धातुबोध्यं । फलं योगः । तेन बोधितः ज्ञापितः । भेद इत्युत्तरत्रान्वेति । कथमनयोर्ज्ञाप्यज्ञापकभाव इत्यतः अविना-

भूतेति विशेषणम् । बोधित इति सप्तम्यंतपाठे तु सायुज्यस्य युक्तत्वाख्यविशिष्टरूपतां संपाद्य विशेषणरूपफलबोधितत्वं कथंचित्संपाद्यम् । तथा च अविद्यास्तमयकालेपि विद्यमानो भेदः न व्यावहारिक इति भावः । भागवतस्मृत्यापि भेदस्यामायिकतां साधयति । **नयत्रेति** ॥ अनेन 'न यत्र माया किमुतापरेहरेरनुव्रता यत्र सुरासुरार्चिताः' । इति द्वितीयस्कन्धगतवाक्यं सूचयति । यस्य स्थानीं हरेः पुरीं । **अनेन**

योगाविनाभूतभेदः स्यादेवेश्वरजीवयोः । योऽविद्यास्तमयेप्यस्ति स कथं व्यावहारिकः ॥ ३७४ ॥
न यत्र मायेति वाणी यस्य स्थानीममायिकाम् । ब्रूते तस्याः पतिः सोऽयं कथं मायामयः प्रभुः ॥ ३७५ ॥
अनस्तत्र श्रुताः सर्वमुक्ताश्चासन्नमायिकाः । हरेरनुव्रताः सर्वेप्यपरे च हरेः किल ॥ ३७६ ॥
प्रभुणा च मिथश्चैषां भेदो यः सोप्यमायिकः । व्यावहारिकता तस्मादस्माद्दूरं गता भवेत् ॥ ६७७ ॥
किं च प्रत्यक्षसचिवा बाध्या भेदश्रुतिः किल । बाधकं तद्विरुद्धैक्यवाक्यमित्यपि को वदेत् ॥ ३७८ ॥
शस्त्रानुबद्धो हस्तीन्द्रहस्तः शत्रोर्न मारकः । शस्त्रेण शकलीभूतः शत्रूणां मारकः किल ॥ ३७९ ॥

लोकस्यामायिकत्वे तदधिपस्यामायिकत्वं कैमुत्यसिद्धम् । एवं तत्रत्यानां मुक्तानां चामायिकत्वात्तेषां पारस्परिकः हरिणा च भेदोऽमायिक इति व्यावहारिकता सुदूरगतेति भावः ॥ ३७७ ॥ भेदश्रुतेर्बाध्यतां लोकमर्यादयापि निराकरोति । **किंचेत्यादिना** ॥ प्रत्यक्षसहितभेदश्रुतेस्तद्विरुद्धैक्यश्रुतेश्च बाध्यत्वाबाध्यत्वोक्तिः सशस्त्रहस्तीन्द्रहस्तशस्त्रशकलीभूततद्धस्तयोः क्रमेण शत्रोरमारकत्वमारकत्वोक्तिमनुकरोतीति

भावः । किलेत्यपहासः ॥ लोकानुभवमेव विशिष्य दर्शयति— **उक्तेत्यादिना** ॥ त्वं तु वाक्यार्थे प्रत्यक्षविरोधे सत्यपि तन्निर्णेतुमिच्छसि । एवं तर्हि अग्निना सिंचेदिति वाक्यं प्रत्यक्षविरुद्धं तदसिद्धं चार्थं कुतो न प्रमापयेत् । लोकानुभवविरोधमेव स्फोरयति । **कदध्वीति** ॥ एकवारं दृष्टे मार्गे पुनर्गमनवेलायामयमेव माग इति निश्चिन्वते लोकाः । त्वं तु एकवारं दृष्टस्य पुनर्गमनवेलायां भ्रान्ततामापादयसि यतः सिद्धार्थबोधकं तवाऽप्रमाणं खलु। परिचितस्थले दृष्टतृणाद्यर्थजातं पुरुषं प्रति यदि कश्चित् प्रश्नवक्ता शाकुनिकः तत्र तत्र स्थले आगमनमार्गे इदमिदं-

उक्तवाक्यार्थनिर्णीत्यै प्रत्यक्षानुसृतिर्नृणाम् । त्वं तु हन्ताक्षरोधेऽपि वाक्यार्थे निर्णिनीषसि ॥ ३८० ॥
एवं सत्यग्निना सिंचेदिति वाक्यं प्रमापकम् । कुतोमाभूदक्षरुद्धतदसिद्धार्थबोधकम् ॥ ३८१ ॥
गताध्वनि पुनर्गच्छन्मार्गं निश्चिनुतेऽखिलः । कदध्वीकुरुषे त्वं तु गताध्वनि पुनर्गतौ ॥ ३८२ ॥
स्वाक्षसिद्धतृणाद्यर्थं वदन् शाकुनिकोऽखिलैः । किं मान्यते हन्यते वा तन्सिद्धिर्भूषणं गिराम् ॥ ३८३ ॥

तृणादिकं वस्त्वस्तीति ब्रूयात्तदाऽनुभूतार्थकथनेन तेन मान्यते स शाकुनिकः । न केवलं तेन किंत्वखिलैरपि । तत् प्रत्यक्षस्य वाक्यमानना-प्रयोजकत्वात् प्रत्यक्षसिद्धिर्गिरां भूषणमिति ॥ ३८३ ॥ ननु विषमोऽयमुपन्यासः स्वाक्षसिद्धत्वं स्ववाक्यस्य दूषणं न तु पराक्षसिद्धत्वमतः शाकुनिक-वाक्यस्य परप्रत्यक्षानुसारिता न दोषायेत्याह— **स्वाक्षेति** । दूषयति **तर्हीति** ॥ **श्रुतिमिति** ॥ असदेवेदमग्रआसीदित्यादिका मेत्यर्थः । **श्लोक्यं न स्यादिति** ॥ बहुशोऽनुभवानुसारित्वात्तद्वाक्यस्येति भावः ॥ त्वयैवमुक्तेप्यात्मवाक्यस्य वैयर्थ्यं नेत्याह— **परेणेति** ॥ **तदुभ्रान्तित्वेति**

तस्यार्थद्रष्टुः पुरुषस्य । एतदीया दृष्टिर्न भ्रांतिः किंतु यथार्थेति निश्चयस्याप्तवाक्येनापि तदर्थसिद्धौ लोकानां जायमानत्वादिति भावः ॥ ॥ ३८५ ॥ परमाप्ततमस्य व्यासस्य दूष्यता नेत्यनुभावयति **भेद इति** । अक्षस्य संभावितदोषत्वेन तज्जन्यत्वादेव भेदप्रत्यक्षं भ्रांतिरिति शङ्का स्यात् ॥ अत एवाक्षसिद्धेति । जन्येत्यर्थः ॥ **अथवाऽक्षसिद्धस्य** भेदस्य भ्रांतित्वं भ्रान्तिविषयत्वं तच्छंकेत्यर्थः । श्रुत्या 'द्वासुपर्णे'-

स्वाक्षसिद्धिः स्ववाक्यस्य यदि दूषणमुच्यते । तर्हि स्वादृष्टमेवार्थं वदन्तीं मानय श्रुतिम् ॥ ३८४ ॥
सर्वज्ञव्यासवाक्यं च श्लोक्यं न स्याज्जगत्त्रये । परेण दृष्ट एवार्थे तद्भ्रांतित्ववारिका ॥ ३८५ ॥
परमाप्ततमस्योक्तिर्व्यर्थीभवति किं वद । भेदेऽक्षसिद्धभ्रांतित्वशङ्कां श्रुत्या निवारयन् ॥ ३८६ ॥
श्रुतेः श्रुत्यन्तरात्सत्वं तत्सहायेन साधयन् । कथं वा दूष्यते मन्दैः पोष्योऽखिलवादिभिः ॥ ३८७ ॥
परदृष्टार्थकथनमपि तस्मान्न दूषणम् । स्वदृष्टा च कथा त्वाप्तवाक्यत्वादतिभूषणम् ॥ ३८८ ॥
श्रवणादेव दृष्टोऽर्थो यतनार्हो न ते मते । ध्यानार्हश्च स एवार्थः सार्थो चेयं परंपरा ॥ ३८९ ॥

त्यादिकया ॥ श्रुत्यंतरात् 'य आत्मनि तिष्ठन्नात्मनोन्तरः' इत्यादितः । तत्सत्वं भेदसत्वम् । **तत्सहायेन** बहुश्रुतिसहायेन । यः व्यासः । पोष्यः मूलकर्तृत्वादिति भावः ॥ अथवा भेदस्य पोष्यत्वपरतया मूलं योज्यम् । प्रकृतमुपसंहरति— **परेति** ॥ तस्मात् वाक्यप्रमाण्यदार्ढ्यापादकत्वात् स्वदृष्टा स्वदृष्टार्थविषयिका ॥ **अतिभूषणमिति** ॥ वक्ता स्वेनार्थस्य दृष्टत्वे तद्वाक्यस्याप्तिमूलकत्वप्राप्तेरिति भावः ॥ यानान्तरावगतस्य

मानान्तरात्प्रमापनम् परेणाप्यङ्गीकारयति— **श्रवणादीति । यतनार्हेति** ॥ मननार्हेति पाठः स्वरसः । यथाश्रुतस्य साधुत्व यतन शब्दस्य मननार्थकत्वं कथञ्चिदुद्घटनीयम् ॥ नेति काकुः । सार्था श्रवणादेर्भिन्नभिन्नविषयकत्वे परस्परमर्थसाक्षात्कारे सहकारित्वानुपपत्तेः परंपराया वैयर्थ्यमेवात एकविषयत्व एव सा सफलेति ॥ **पुनरिति**॥ अभ्यासस्यासकृदुक्तिरूपत्वात्। **श्लाघ्यतम इति**॥ ऐक्ये नवकृत्वोऽभ्यस्ततया त्वया तात्पर्याभ्युपगमात् ॥ दोषाय दोषफलकम् ॥ कस्मात् । निर्निमित्तमित्यर्थः ॥ लोकसम्मतिमप्याह— ॥ **मिथ इति** । यां श्रुतिं

उक्तस्यैव पुनश्चोक्तौ योऽभ्यासः सोऽभ्युपेयते। नवकृत्वश्च योऽभ्यासः सोऽपि श्लाघ्यतमो हि ते ॥ ३९० ॥
दृष्टार्थकथनं तस्मात्कस्माद्दोषाय कथ्यते । मिथस्तयोर्हि संवादाद्विवादापगमो यतः ॥ ३९१ ॥
सर्वज्ञः सूत्रकृत्स्वोक्तसर्वार्थप्रत्ययाय याम् । प्रमाणीकुरुते कस्तामप्रमाणीकुरुते श्रुतिं ॥ ३९२ ॥
स्वदृष्टार्थेष्वसत्यत्वशङ्कापङ्कापनुत्तये । यामीशोऽपेक्षते कोवा मानवस्तामुपेक्षते ॥ ३९३ ॥

प्रमाणीकुरुत इति । 'श्रुतत्वाच्च'त्यादौ । सर्वज्ञोपीशस्वदृष्टेऽप्यर्थे लोकानामप्रामाणिकत्वाशङ्कापरिहाराय तत्र तत्र 'दर्शनात्' 'गीयते' 'अधीयते' इत्यादिवचनविन्यासविशेषेण यां श्रुतिमपेक्षते । मानवः अल्पज्ञतया दुष्टकरणतया सम्भावितभ्रान्तिप्रत्यक्षः ॥ उपेक्षते दृष्टार्थबोधकतयाऽप्रमाणीकुरुते ॥ ३९३ ॥ ऐक्ये श्रुतिस्त्वद्रीत्यापि न दृश्यत इत्याह— **किंचेति** ॥ **बृहद्घात्वर्थतया** पदलभ्यत्वात्प्रथमतः तस्योपादानम् ॥ स्वोचितैस्तत्तत्पदलभ्यैस्तथा तत्र प्रमितैः ॥ विशिष्टैक्यस्य तवमतेऽप्यभावात् शुद्धचिदैक्यप्रतिपादकं तु वाक्यं

न श्रूयत एव । न दृश्यत इति किमुवक्तव्यम् ॥ ३९५॥ यद्येकमपि वाक्यं त्वदभिमतशुद्धचिदैक्यप्रतिपादकमुपलभ्येत स्यादप्यन्यत्र तदृष्टान्तेन लक्षणाश्रयणम् । तच्च नेति ॥ नहीति । क्रियमाणापि लक्षणा प्रामाणिक एवार्थे क्रियते । न हि मुख्यार्थो नेत्येतावता किमपि शशशृङ्गादिकं लक्ष्यते । तथाऽप्रामाणिकमैक्यं लक्षणार्हं नेति भावः।अत ऐक्यबोधकवत्प्रतीयमानवाक्येष्वन्तर्यामिणि पदानां लक्षणा वाच्येति। पाणिनिनापि श्रुतिरर्थान्तरे योजितेत्याह।

किंच ब्रह्म विशिष्टं ते वृद्ध्याद्यैर्गुणसंचयैः । विष्णुब्रह्मशिवेन्द्राद्या विशिष्टाः स्वोचितैर्गुणैः ॥ ३९४ ॥
मुनयः सर्वजीवाश्च विशिष्टा एव ते मते । विशिष्टैक्यंच ते नास्ति तदेषामैक्यवाग्वृथा ॥ ३९५ ॥
तवेष्टन्तु चितोरैक्यं श्रुतौ न श्रूयते क्वचित् । अतस्तच्छाययान्यत्र लक्षणाश्रयणं च न ॥ ३९६ ॥
न हि गङ्गापदाल्लक्ष्यं नृशृङ्गं क्वापि कथ्यते । किन्तु प्रामाणिकं तीरं तथान्तर्यामिलक्षकम् ॥ ३९७ ॥
अहमादिपदं स्याद्धि नत्वप्रामाणिकं वदेत् । अतः सर्वश्रुतिभ्योऽपि बहिर्भूतमभूदिदम् ॥ ३९८ ॥
एवं चाश्रौतमैक्यं ते भेदश्रुतिरबाधिता । कथं न बाधते मन्द प्रतिद्वन्द्वविवर्जिता ॥ ३९९ ॥
किंचायोग्यार्थघटनां श्रुतौ कर्तुं हि पाणिनिः । सप्तसु प्रथमामाह तत्प्रत्याह मतं तव ॥ ४०० ॥

किंचेति । अयोग्यार्थस्यैक्यस्य घटनां तत्स्थत्वरूपां । सप्तसु प्रथमेति । यद्यपीदं महाव्याकरणस्थं न पाणिनिकृतेऽस्ति । तथापि 'छन्दसि बहुलं' 'छन्दस्युभयथापि' 'सुपांसुलुगि'त्यादिना श्रौतपदानां व्यत्यासं वदन् तत्र प्रमाणतया स्वस्यापि मूलं महाव्याकरणमेवाभिप्रैतीति भावः ॥ ४०० ॥

अहं ब्रह्मणीति।'ब्रह्माहमस्मी'त्यादेः। तस्मिंस्त्वमिति 'तत्त्वमसी'त्यादेः। सर्वं ब्रह्मणीति 'सर्वं खल्विदं ब्रह्मे'त्यादेरर्थकथनं।इत्याद्यैक्यं तत्स्थत्वरूपममुख्यैक्यं। तद्भेदः तयोर्जीवेशयोर्भेदः। तदितिभिन्नं पदं मुख्यैक्यस्याभावादिति वा तस्यार्थः। ऐक्यं न सत्यमित्यत्र मृतं बाधितमिति हेत्वन्तरं। यतो वाक्येनासिद्धिः पूर्वमुक्ता ॥ ४०१ ॥ गुणानुवादं परकर्तृकम्। गुणानुकथनं स्वकर्तृकं कुर्वन्त इत्यर्थः। तथा च हरेर्गुणानुवादः श्लोक्यः शुकादिभिः प्रशंस्यत्वात्। तेरनुष्ठीयमानत्वाच्चेति मानमुक्तं भवति ॥ ४०२ ॥ तर्हि निर्गुणत्वश्रुतेः का गतिरित्यतः सोपपत्तिकमर्थान्तरमाह।

अहं ब्रह्मणि तस्मिंस्त्वं सर्वं ब्रह्मणि वर्तते। इत्याद्यैक्यं वदेदैक्यवाक्यं मुख्यार्थबाधतः ॥ ४०१ ॥
तद्भेदः सत्यतामर्हेन्नैक्यं युक्तिशतैर्मृतम्। गुणानुवादं शंसन्तो गुणानुकथनं तथा ॥ ४०२ ॥
हरेर्गुणानुवादं य श्लोक्यमाहुः शुकादयः। तस्मादेको देव इति श्रुतिरुक्त्वा हरेर्गुणान् ॥ ४०३ ॥
तदन्ते दुर्मतप्राप्तनिर्गुणत्वव्यजिहीर्षया। समुच्चितं गुणैरुक्तैस्तमेवानिर्गुणं जगौ ॥ ४०४ ॥
अपूर्वोयं पदच्छेदो यत्पूर्वं चादिता गुणाः। मुक्तयध्वनीनैस्तच्छलाघ्यो मध्वस्याध्वेति मे मतिः ॥ ४०५ ॥

तस्मादिति। तस्मात्। ऐक्यविरोधिगुणानां प्रशस्यत्वेन मिथ्यात्वानर्हत्वात्। एवं सत्सङ्गतिकमनिर्गुणमीशमेवजगाविति योजना। अन्यथा एक इत्यादिपूर्वोक्तप्रशंस्यत्वयोर्विरोध इति भावः। **अपूर्व इति**। अकारपूर्वः। पूर्वं गुणानामुक्तत्वात्पश्चात्तनः। **परैरविदिततया** नवश्चेत्यर्थः ॥ ४०४ ॥ मुक्तयध्वनीनैः। मोक्षमार्गाविलंबिभिः। तत्। भेदस्यैव सत्यत्वात् तस्यचात्रप्रतिपादनात्। भगवद्गुणानां ह्रातुमशक्यत्वात्।

तेषां चात्र प्रशंसनात् ॥ जडदेहेषु क्रियाये व्याप्यब्रह्मचैतन्यातिरिक्तमणुचैतन्यं परेणाङ्गीकारयति । **किंचेत्यादिना** । व्याप्तत्वे प्रमाणमाह । **अन्तरिति** । वक्ष्यमाणदोषोऽस्मन्मते नास्तीत्याह । **अनन्तेति** ॥ व्याप्तस्य उपाधितोपि क्रिया नेत्यत्र दृष्टान्तमाह । **किमिति** ॥ अन्तः । देहान्तः । अस्य वाच्यानीत्यत्रान्वयः । अतः ब्रह्मचैतन्यस्योक्तरीत्या निष्क्रियत्वात् । ब्रह्मचैतन्यसंबन्धमात्रेण देहे क्रियाऽयोगाच्च । भिन्नभिन्ना-

किंचैकं ब्रह्मचैतन्यं व्याप्तं सर्वत्र सर्वदा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ ४०६ ॥
इत्यादिश्रुतितो वाच्यं त्वयापि च मयापि च । अनन्तशक्तियुक्तं तदणुचाङ्गीकृतं मया ॥ ४०७ ॥
त्वया तु शक्तिविधुरमखण्डं महदेव तत् । अच्छेद्यंचोच्यते तस्मात्तस्य संचरणं न हि ॥ ४०८ ॥
किं स्याद्घटाभ्रसंचारो घटाद्यैरप्युपाधिभिः । अतः संचरणार्हाणि चैतन्यानि पृथक् पृथक् ॥ ४०९ ॥
अन्तः संचरणानर्हजडदेहप्रवृत्तये । वाच्यानि नानाभोगाय भिन्नभिन्नान्यनादितः ॥ ३१० ॥
तत्संचारेण संचारो जडदेहस्य नान्यथा । अतस्तान्येव देहांतः क्रियावन्ति ह्यणूनि च ॥ ४११ ॥

न्यपि प्रतिशरीरं भिन्नभिन्नान्यपि । तत्र हेतुः नानाभोगायेति । अन्यथा विविधसुखादिभोगो न स्यादिति भावः । आकाशसंबन्धाद्घटे क्रियाऽभावेपि देवदत्तादिना इतस्ततः स्थापनेन क्रिया स्यात् । न च तथा देहे वक्तुं शक्यत इत्याह । **अभ्रेत्यादिना**॥ अभ्रातिरिक्तदेवदत्तादि-वद्देहे ब्रह्मचैतन्यातिरिक्तचैतन्यस्य त्वन्मतेऽभावादिति भावः । इदानीं भिन्नचिद्भावेपि मुक्तौ स्यादेकतेति पराशां निरस्यति । **अनादितोपीति** ।

उपसंहरति । तदिति ॥ मुक्तावप्यैक्ययोगात् । अनेन परेशः जीवाधीशः तद्धर्मोपकत्वात् तत्पोषकत्वात् तद्रक्षकत्वात् बन्धमोचकत्वादिना तज्ज्ञेयत्वात् राजादिवदिति मानं मुक्त्यनंतरमप्यधीशत्वे सूचितम् । परमपहसति । प्रमेति ॥ परमते सवि-

अभ्रोपाधिघटादीनां संचारोप्यन्यचेतनैः । इतस्ततः स्थापने स्याद्देहे देहे न चापरः ॥ ४१२ ॥
प्रवर्तकश्चेतनोस्ति मह तेन प्रवृत्तिमान् । तद्घटाकाशदृष्टान्तो दुर्घटत्वे विचारणे ॥ ४१३ ॥
देहप्रवृत्तये व्यामश्रप्रचिद्विन्नचिद्यतः । बलाद्वाच्या तेन शोच्या सर्वापि प्रक्रिया तव ॥ ४१४ ॥
अनादितोऽपि भिन्नानां चितां लिंगस्य भंगतः । स्वस्वाकारस्य शुद्धिःस्यात्पङ्कादुत्क्षिप्तरत्नवत् ॥ ४१५ ॥
रत्नान्तरैकता रत्ने नैव दृष्टा तदापि हि । अतः शुद्धानन्तचितो मुक्तौ स्युः पृथक् पृथक् ॥ ४१६ ॥
तद्बन्धच्छेदको विष्णुर्बन्धोच्छित्तेरनन्तरम् । अप्यन्नदाना ज्ञेयः स गोप्ता तेन पदे पदे ॥ ४१७ ॥
बन्धमुक्तानुगस्तुल्यराजादिरिव सर्वदा । मुक्तानामप्यधीशोऽस्तु मास्तु मूढाखिलक्षयः ॥ ४१८ ॥
प्रमा तु निर्विकल्पा ते साधिका बाधिका न सा । सविकल्पा च सर्वा धीर्न प्रमा तत्त्ववाखिलाः ॥ ४१९ ॥
शास्त्रार्थाः केन मानेन साध्याः स्युर्बुधसंसदि । अप्रमाणाच्च सर्वार्थसिद्धौ सर्वं भवेद्धि सत् ॥ ४२० ॥

कल्पकं सर्वमपि ज्ञानं भ्रमात्मकमेव । प्रमा तु निष्प्रकारिका धीरेकैव । तथा च त्वदभिमतार्थाः केन साध्यन्ते । न तावदाद्येन । तस्य भ्रमत्वात् ।

भ्रमेणाप्यर्थसिद्धौ किं किं न सिद्धयेत् । नाऽपि चरमधिया । तस्या निष्प्रकारकत्वेन साधकबाधकतावधुर्यादिति समुदायार्थः ॥ ४२० ॥

वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः । प्रथमः सुधियां कंठालंकारं कुरुतेतराम् ॥ ४२१ ॥

श्रीः ॥ इति श्रीमद्वादिराजपूज्यविरचित न्यायरत्नावल्यां प्रथमः सरः ॥ श्रीः

न्यायाः रत्नानीव । अत एव सरेऽमलत्वम् । लौकिकरत्नमालावन्नेयमापामरसाधारणी अविचारितरमणीयाचेत्याह । **सुधियामिति** ॥ अत एवालंकुरुतेतरामित्युक्तम् ॥

॥ इति भाविसमीरश्रीमद्वादिराजपूज्यचरणविरचितन्यायरत्नावल्याः व्याख्यायां प्रकाशसंग्राह्याख्यायां प्रथमः सरः ॥

॥ प्रथमसरः समाप्तः ॥

ॐ ॥ श्रीः । गगनमणिजिघृक्षोश्चापलाद्वादिराजा थमसरवगाहे दत्तहस्तावलम्बाः । पुनरपि करुणार्द्रा दत्त हस्तावलम्बमपरसरवगाहे दु या प्रोद्यतस्य ॥ अस्मिन्सरे-जीवस्य ब्रह्मणैक्येऽपि एकानेकजीवभेदेन मतद्वयं परिकल्पयन्ति । तत्रादावेकजीवमतं सविस्तरं निरस्यति । तत्प्रसक्त-मन्यच्च । **किंचेत्यादिना ॥ अपरेजडा इति ॥** परमते एकजीववादे व्यवहारदशायामपि ब्रह्मातिरिक्ता जीवचिदेके अपरं सर्वमपि तदज्ञानपरिकल्पितं जडप्रायमेव । सोप्येको जीव एतावत्कालपर्यन्तमपि निद्रास्वेव तत्स्वप्नोयं सकलप्रपञ्चः । तस्योत्थाने किमपि नास्ति ।

श्रीवादिराजगुरुभ्यो नमः । श्रीवेदव्यासाय नमः ।

किंचैकजीववादे ते जीवस्त्वेकोऽपरे जडाः । स चावुधो न चेद्घोरसंसाराऽऽधारताऽस्य न ॥ १ ॥
तच्चेदद्रष्टृवाक्यानि नैक्यायासन् जडा हि ते । अजडस्तेऽतिमूढोऽत्र न बोध्यो नापि बोधकः ॥ २ ॥
स्वरीत्यैवाखिलं वेदं बहिष्कुर्वन्नकौशलः । स्वयं जडो वा ब्रह्मेन्द्ररुद्राद्या वा जडा वद ॥ ३ ॥

अत एतावत्कालपर्यन्तं स एकोऽपि जीवोऽबुधः ज्ञानशून्यः । निद्रितत्वात् । नचेत् अबोधाभावे । ज्ञानसत्व इति यावत् । जगतः प्रवि-लयापत्त्याऽस्य संसाराधारता न स्यादिति ॥ १ ॥ तत् एकस्य सुप्तत्वादन्येषां जडत्वात् । तथा च येषां ऋषीणां वाक्येनैक्यं बोधनीयं ते जडाः । यस्त्वजडएको जीवः सोऽतिमूढः । निद्रितत्वात् । अतः स शिष्यैक्यमुपदिशेति बोध्यो न । तेषां बोधकोऽपि स नेति भावः ॥ २ ॥ वेदं बहिष्कुर्वन् । अप्रामाणिकतामापादयन् । अकौशलः । न कौशलं यस्य । अकुशल एवाकौशलः । स्वार्थेऽणिति वा ॥ ३ ॥ प्राहुणिकाः

सम्भावनया भोजनीया इति शक्तिलभ्योर्थः । प्रकृते तु विवाहकाले 'वृणीमह' इत्यादिवक्तार इति तात्पर्यार्थः ॥ ४ ॥ स्वमूलश्रुतिसूत्र-विरुद्धमिदमित्याह । **सन्ध्य इति** । सन्ध्योः जाग्रत्सुषुप्त्योर्मध्येभवं सन्ध्यं स्वप्नावस्थेति । तदा सृष्टिः श्रूयते 'न तत्र रथा न रथयोगाः' इत्याद्यारण्यकोपनिषदि । इति श्रुत्या । एतदर्थकया श्रुत्या । न केवलं सृष्टाः । किन्त्वजडाश्च । ईशेन तदा सृष्टत्वात् । चेतनत्वेन तदानीं दृष्टत्वाच्च । न च सृष्टिः दृष्टिश्च भ्रान्तिः । बाधकाभावादिति भावः । स्रष्ट्रीश्वरेच्छया नष्टाश्चेति नोत्तरकालं प्रतीतिप्रसङ्गः । ते स्वाप्नान्ते

जडाः प्राहुणिकाः सर्वे जडाश्च प्राभिकाः किल । विवाहश्च विवादश्च जडयोः शवयोः किल ॥ ४ ॥
सन्ध्ये सृष्टिरिति श्रुत्या स्वाप्नव्याघ्रगजादयः । अजडा एव तत्कालसृष्ट्या दृष्ट्या च तत्क्षणे ॥ ५ ॥
स्वाप्नावसाने सर्वे ते नष्टाः स्युः स्रष्टुरिच्छया । कात्स्न्र्येन ह्यनभिव्यक्तरूपत्वं तेषु वस्तुषु ॥ ६ ॥
असूत्रयत्सूत्रकारस्तेन सूक्ष्मतमाश्च ते । जडाश्चैवंविधाः सन्ति सृष्टिकौशलमीशितुः ॥ ७ ॥

नष्टा इति कल्प्यते । तत्क्षण एव दृष्टत्वादिति वा । स्वाप्नस्थूलसृष्टेरन्तरत्वे हृदयविदारणम् । बाह्यत्व इतरैः प्रतीयेतेत्यत आह । **कात्स्न्र्येति** । अन्तरेव सृष्टाः सूक्ष्माश्चानो नोभयदोषः । अत्र सूत्रं प्रमाणम् । 'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वा'दिति । अत्र मायापदेनेश्वरीच्छा जैवी वासना च विवक्षिता ताभ्यां निमित्तोपादानाभ्यां मितं निर्मितं ईश्वरच्छयैव त्रातं च मायामात्रं । अत्र हेतुः कात्स्न्र्येनत्वादि इत्येवं सूत्रार्थः अन्यतोऽवगन्तव्यः । अपरिमितजडाजडपदार्थानां तत्काल एव सृष्टिर्दृष्टिर्नष्टिश्च कथमित्यत आह । **कौशलमिति** ॥ **कोवेदेति** ॥ 'परास्य

शक्तिरित्यादौ सामान्यत एवाघटितघटनापटीयसी शक्तिः श्रूयते । न विशिष्य । अतोऽस्मद्बुद्ध्यगोचरत्वेन न वयं वक्तुं प्रभवाम इति भावः ॥ ८ ॥ प्रकृते किमायातमित्यत आह । **अत इति** ॥ उक्तरीत्या मूलशास्त्रस्य श्रुतेश्च तव विरोधित्वादित्यर्थः । अशक्त्या । स्वाप्न-दृष्टान्तस्योक्तरीत्या सत्यत्वेन तव घटयितुमशक्यत्वाच्चेति जडत्वे हेत्वन्तरं । **क इति** ॥ सर्वेषां सुप्तैकजीवपरिकल्पितत्वेन सुप्तस्य त्वनुपदेष्टृत्वेन

को वेद तेन ते स्वप्नद्रष्टृजीवस्य दृष्टितः । न सृष्टाः किं तु हरिणा सृष्टा दृष्टाः परं नृभिः ॥ ८ ॥
अतः स्वमूलशास्त्रार्थमूढत्वाच्च जडो भवान् । निदर्शनं स्वं निर्वोढुमशक्त्या च जडो भवान् ॥ ९ ॥
अपि चानादिमूढस्य मौढ्यं हर्तुं पदे पदे । उपकर्तुं च तत्त्वानि व्याकर्तुं चास्ति कः पुमान् ॥ १० ॥
जडो व्याख्यानि मत्तत्वमजडश्च शृणोति तत् । इति यो वक्ति जडता तस्य वा स्याद्धटस्य वा ॥ ११ ॥
किंचास्य स्वप्न एवान्यो यदा दुःस्वप्नदृग्जनः । तच्छान्त्यै पायसं जुह्वन् दृष्टः कष्टं तदा तव ॥ १२ ॥
यथा स स्वप्नदृङ्मिथ्या वृथाऽस्य श्रवणादि च । तथायमपि च द्रष्टा तस्याष्टमरमोपमम् ॥ १३ ॥

चेति भावः ॥ १० ॥ गुरुशिष्ययोर्मध्ये शिष्यस्य गुरोर्नैकजीवत्वमिति न परस्यापि निश्चयः । तत्र शिष्यस्यैकजीवत्वे दोषमाह । **जड इति** ॥ एकजीववादे लोकानुभवविरोधमाह **किंचेति** ॥ यदाऽन्यो दुःस्वप्नदृग्जनः पायसं जुह्वन् दृष्टश्च यदि वा स सर्वोऽपि अस्यैकजीवस्य स्वप्न एव तदा तव कष्टम् । दुःस्वप्नस्य तद्द्रष्टुश्च कल्पितत्वेन होमादिकैमर्थ्याकांक्षायामुपपादकाभावात् । एतदेवाह **यथेति** ॥ स स्वप्नदृक् दुःस्वप्नद्रष्टा यथा

मिथ्या तथा तस्य श्रवणादिकमपि गुरूपसत्त्या क्रियमाणं तव मते मिथ्यैवेति । अयं द्रष्टा श्रवणादिजन्यसाक्षात्कारकर्ता । अष्टमरसोपमं । दुःस्वप्नादीति शेषः । श्रवणादीति पूर्वतनस्य वान्वयः । द्रष्टुः सप्तमरसायितस्यैवाभावादिति । अयं भावः । यथा तव मते स्वप्नः तद्द्रष्टा च मिथ्या तथा सुप्तैकजीवकल्पितत्वे सर्वस्य श्रवणादेस्तज्जन्यसाक्षात्कारवतश्च मिथ्यात्वेन स्वप्नवत्तस्य साक्षात्करणमष्टमरसायितमिति । द्रष्टृन्तरं नास्तीत्यु-

नान्योतोऽस्तीति वाचा यद्दृष्टमात्रं न ते मते । न किंचनेति वाक्चैवं सति संकुचितैव न ॥ १४ ॥
श्रुतियुक्तिविरुद्धं च यदि रक्ष्यं मतं तव । तर्हि व्यासस्य राद्धान्तगुप्त्यै रक्ष्यं मतं मम ॥ १५ ॥
यद्वैधर्म्याच्च न स्वप्नादिवदित्याहसत्प्रभुः । स वै स्वतन्त्रद्रष्टा मे मतोऽन्यस्तु तदाज्ञया ॥ १६ ॥
अतस्तदुक्तमार्गेण वर्तितव्यं बुभूषुणा । तन्माध्वं मतमेवाभूद्विद्वन्मुकुटवर्धनम् ॥ १७ ॥
बहुजीवमते मानमस्ति चेदेकतैषु न । न चेदप्रामाणिकं तत्कथं बुद्धिमतो मतम् ॥ १८ ॥
एकजीवमते मानमस्ति चेद्बहुतैषु न । न चेदप्रामाणिकं तत्कथं बुद्धिमतो मतम् ॥ १९ ॥

क्तमेव पराभ्युपगतश्रुत्यैव साधयति । **नेति** ॥ 'नान्योतोऽस्ति द्रष्टे'त्यारण्यकोपनिषदाऽत एकस्मादन्यो द्रष्टा नेत्युक्तेरिति । **वागिति** ॥ 'नेहनानास्ति किंचने'ति वाङ्नैव सङ्कुचिता । जडमात्रनिषेधपरत्वे **सङ्कोचः** स्यात् । प्रकृते च जीवजडसकलवस्तुनिषेधकत्वादिति । गुरुण्या इत्युक्तमेव दर्शयति । **यदिति** ॥ 'वैधर्म्याच्च न स्वप्नादिव'दिति सूत्रम् । (अ० २ पा० २) बाधभावाभावरूपवैधर्म्याज्जगन्न स्वप्नादिवदिति ॥ १७ ॥ परस्यासंबद्ध-

प्रलापितां प्रकटयति । **बह्वित्यादिना** । अविरुद्धयोर्द्वयोः पक्षयोः स्वीकारः स्यादप्येकस्मिन्मते सम्भावितः । अनयोस्तु विरुद्धयोरेकानेकमतयोः न कथंचिदप्यङ्गीकारः शक्यः । एकस्य प्रामाणिकत्वेऽपरस्याप्रामाणिकत्वाद्विरुद्धत्वयोः प्राप्तेः । न च मानविरुद्धं तदसिद्धं चाङ्गीकर्तुं शक्यम् । अन्यथा ब्रह्म जगद्वा सदसदिति कुतो नोच्यत इति भावः । अतः परस्परं विरुद्धयोरङ्गीकारानर्हत्वात्त्वमेव न हतः । तवैकजीव-

यद्धि मानविरुद्धं तद्बुद्धिमान्न मतं वदेत् । यच्चाप्रामाणिकं तच्च बुद्धिमान्न मतं वदेत् ॥ २० ॥
कथं विरुद्धपक्षौ द्वावेकोऽङ्गीकुरुते बुधः । सच्चासच्च कुतो ब्रह्म जगद्वा नोच्यते त्वया ॥ २१ ॥
अतस्त्वमेव न हतो मते चेमे हतौ मिथः । पृथक्श्रमोऽत्र तद्व्यर्थः को मृतं मारयेद्बुधः ॥ २२ ॥
सुन्दोपसुन्दौ हन्तुं प्राग्ब्रह्मा चक्रे तिलोत्तमाम् । भाविब्रह्मा त्विमौ हन्तुं चक्रे युक्तितिलोत्तमाम् ॥ २३ ॥
यद्यैक्यं ब्रह्मणि तदा तेनैवैक्यकथा गता । नाधारएव ह्याधेयं भेदोऽवश्यं ततस्तयोः ॥ २४ ॥
निर्विशेषं हि ते ब्रह्म न विशेषोऽस्ति कश्चन । तद्धर्मधर्मिता चैकरूपता च न ते मते ॥ २५ ॥

कल्पितत्वात् । किन्त्विमे मते अपि द्वे मिथो हते ॥ २२ ॥ भाविब्रह्मा मध्वः । अथवा ऋजुग्रदस्थो वादिराजः । युक्तितिलोत्तमां अनुव्याख्यानाद्युक्तयुक्तितिलोत्तमां । युक्तिमल्लिकाख्यां वा ॥ २३ ॥ ऐक्यस्य विकल्पासहत्वादपि न जीवपरयोरैक्यमित्याह— । **यदीति** ॥ ऐक्यं ब्रह्मवृत्ति न वा । आद्ये आधाराधेयभावरूपविरुद्धधर्मवत्त्वात्तयोर्भेदः स्यात् । गुणगुण्यादीनां भवन्मत इवाभेदः स्यादित्यत आह । **निर्विशेष-**

मिति ॥ अस्मन्मते ब्रह्मणः सविशेषत्वाभ्युपगमेन तद्बलेन भेदेऽपि धर्मधर्मिभावादिकमुपपद्यते । तव मते तु ब्रह्मणो निर्विशेषत्वेन ब्रह्मैक्ययोरेकत्वे भेदकार्यधर्मधर्मिभावानुपपत्तिरेवेति भावः ॥ २५ ॥ ब्रह्मण्यैक्यमिति आश्रयाश्रयिभावव्यवहार औपचारिक इति शङ्कां निराकरोति । **उपचारेणेत्यादिना** ॥ उपचारप्रयोग वस्तुतः पदार्थासत्वदर्शनेन तवैक्यमपि सार्वज्ञादिधर्मवन्मिथ्यैव स्यादिति तत्र तव महान्

उपचारेण तत्तत्रेत्युक्ते यदि तदा नरे । सिंहत्वमिव तत्रैक्यं नास्त्येवेत्यापतेद्भिदा ॥ २६ ॥
मिथ्या चैक्यमभूत्तत्ते सर्वज्ञत्वादिधर्मवत् । निर्धर्मके कथं धर्मो वृथैवासीद्भ्रमस्तव ॥ २७ ॥
यदि ब्रह्मैव चैक्यं स्यादेकं न स्यान्नि तत्तदा । ऐक्यं रूपं तदेकत्वं स्यान्नैकं विदुषां मते ॥ २८ ॥
एकमेवेति या वाक्ते साऽभूद्धि ब्रह्मणो बहिः । ततोऽप्यैक्यं नैव भवेत्प्रमाणाभावतस्तव ॥ २९ ॥
किंचैकमेवेति वाग्वदैक्यमेवेति वाक्यु ते । ऐक्यस्य ब्रह्मणैक्यं तन्निर्मूलमिति मे मतिः ॥ ३० ॥

भ्रम इति स्यादिति भावः ॥ २७ ॥ द्वितीयं दूषयति । **यदीति** ॥ तर्हि ब्रह्मैकं न स्यात् । कुत इत्यत आह । **ऐक्यमिति** ॥ रूपं धर्मः । तत्तस्मात् धर्मधर्मिभावरूपविरोधादेकत्वमेकं विदुषां मते न स्यादिति । तथा 'चैकमेवाऽद्वितीय'मिति वाक्यमैकबोधकत्वेऽपि तद्विरुद्धैक्यबोधकत्वात् ऐक्यरूपब्रह्मप्रतिपादकता स्यात् । तथा चैक्यमप्रामाणिकमापन्नमिति ॥ २९ ॥ **किंचेति** ॥ यथा तव मते 'एकमेवा द्वितीय'मिति श्रुतिसत्वेऽपि जगत् ब्रह्माभिन्नमपि नास्ति । किन्तु मिथ्यैव । तथैक्यं ब्रह्मेति वाक्यस्य तुष्यतुन्यायेन सत्वाभ्युपगमेऽपि जगद्वदैक्यमिथ्येत्येव

धीः स्यात् । न तु ब्रह्मभिन्नं तत्सिद्धयतीति भावः ॥ ३० ॥ अत्र दृष्टान्तमाह । **जलमिति** ॥ एतद्वाक्यात् अस्मिन् दिने जलमात्रं नान्नमिति यथा लोकानां धीस्तथैक्यं नेत्येव धीः स्यान्न तु विरुद्धैक्यप्रतीतिरिति । न चेत् गुणानामप्यभेदाङ्गीकारेण सत्वं स्यात् समानन्यायत्वात् । तथाप्येकत्र तव पक्षपाते (इति मृदूक्तिः) दुराग्रहे भगवद्गुणनिन्दयाऽधः तमसि पतेः । अद्वितीयश्रुतिरुभयत्र समेति भावः ॥

जलमेवान्नमित्युक्ते यथान्ने नास्तिता भवेत् । ब्रह्मैक्यमिति च प्रोक्तेप्यैक्यं नास्तीति धीर्भवेत् ॥ ३१ ॥
विरुद्धधर्मधर्म्यैक्यमतिर्न स्याद्धि धीमतः । न चेद्गुणैकतावादमङ्गीकृत्य गुणान्यहून् ॥ ३२ ॥
कुतो नाङ्गीकराष्यज्ञ पक्षपातादधः पतेः । यद्यद्वितीय श्रुतित एवैक्यस्य तदेकता ॥ ३३ ॥
तर्हि सार्वज्ञपूर्वाणां धर्माणां च तदेकता । तत एव भवेन्मन्द ते न स्युश्चेदिदं च न ॥ ३४ ॥
एकदैकविधं वाक्यं सहोक्तामर्थमण्डलीम् । साधयेद्वा बाधयेद्वा द्वैविध्यं न हि सिद्धयति ॥ ३५ ॥
प्रतियोग्यनुयोग्यादिसापेक्षैक्यं भवन्मते । निरपेक्षे निर्विशेषे ब्रह्मण्येकीभवेत्कथम् ॥ ३६ ॥

॥ ३४ ॥ 'एकमेवाद्वितीय'मिति श्रुतिर्भगवद्धर्माणां निषेधिका चेदविशेषादैक्यमपि निषेधेत् । ऐक्यं पुष्णाति चेद्गुणानपि पोषयेत् । त्वदभिलषितमर्धजरतीयं नेति भावः । विरुद्धधर्मवत्त्वाच्चैक्यब्रह्मणोर्नैक्यमित्याह । **प्रतियोगीति** ॥ तथा च सापेक्षनिरपेक्षत्वरूपविरुद्धधर्मवत्त्वान्न तयोरैक्यमित्यर्थः । ऐक्यब्रह्मणोराश्रयाश्रयिभाव एव तवेष्टः पदलभ्यश्चेत्याह । **किंचेति** ॥ अद्वितीयवाक् गुणरूपद्वितीयं

निषेधति । न तु ब्रह्म द्वितीयं नेति गुणब्रह्मणोर्भेदं वक्ति । अपसिद्धांतापातात् । निषेधश्चात्यन्ताभावरूपः साधिकरण इति ब्रह्माधिकरणं वदेत् । द्वितीयं यस्य नेति समासपर्यालोचनयापि अभावसम्बन्ध एव भासते । न त्वभेद इति भावः । नः अस्मन्मते । पुमान् चेतनः । नहीति ॥ अभावस्य कस्यापि

किं च ब्रह्मगुणद्वैतनिषेधादपि तद्वचः । द्वैताभावाख्यमैक्यं ते ब्रह्माधिकरणं वदेत् ॥ ३७ ॥
न यस्येति नञर्थस्य योगोऽत्र प्रतीयते । न तु तद्रूपतामाह नञ्यभावोऽद्य नः पुमान् ॥ ३८ ॥
अत एव ह्यभावस्य द्वैतमित्यपि ते मतम् । तद्ब्रह्मधर्मितैक्यस्य सिद्धयेन्न तु तदेकता ॥ ३९ ॥
अद्वैतमेव स्वद्वैतं यतो ब्रह्मण्यसाधयत् । सर्वाद्वैतमतं तस्मात्स्वव्याहतमभूत्तव ॥ ४० ॥
एवं निर्गुणतावाणी निर्गुणं ब्रह्मचेद्वदेत् । तदा शाब्दत्वमेयत्वनिर्गुणत्वादयो गुणाः ॥ ४१ ॥
ननृतुर्ब्रह्मणि परे नचेन्मानबहिष्कृतम् । न सिद्धयेन्निर्गुणत्वं ते सर्वज्ञत्वादयो गुणाः ॥ ४२ ॥
स्वमानवेद्याशाब्दत्वमेयत्वादिगुणैः सह । धिक्कृत्य निर्गुणत्वं ते नृत्यन्ति विगतज्वराः ॥ ४३ ॥
एवं चोभयतः पाशारज्जुं संगृह्य ते मतम् । प्रविद्ध्य व्याहतिस्त्री मा भैषीरित्याहनश्रमूम् ॥ ४४ ॥

मते चैतन्याभावात् । तथा च चेतनाचेतनयोरैक्यायोग इति भावः । अत्र परसम्मतिमाह । अत इति ॥ 'अभावरूपा धर्मा नाद्वैतं निघ्नन्ती'ति मण्डनमिश्रोक्तेः । तदेकता ब्रह्माभिन्नत्वम् ॥ ४० ॥' एवं निर्गुणश्रुत्यापि पराभिलषितासिद्धिप्रकारं दर्शयति । एवमिति ॥ वाणी 'केवलो निर्गुणश्चे'ति श्रुतेः ।

तथा च परस्योभयतः पाशारज्जुरिति भावः। पाशारज्जुः गलबन्धिका रज्जुः 'पाशा स्याद्गलबन्धिके'त्यभिधानात्॥ विगतज्वराः प्रन्दुन्दुशून्याः। साहित्य मुद्रया परमपहसति **एवंचेति** ॥ ४४ ॥ पररीत्यैव ऐक्यस्याप्रामाणिकत्वं साधयति **स्वावेद्येति** ॥ ब्रह्मणः परेण स्वावेद्यत्वाभ्युपगमात्तदभिन्नमैक्यमपि वाक्यप्रतिपाद्यम् न स्यात्। यतो ब्रह्मणः पौरुषेयादपौरुषेयाद्वा वाक्यात् स्वज्ञानं नास्ति। प्रमाणांतराच्च नास्ति। स्वावेद्यत्वात्। अन्यथा स्वज्ञेयत्वापातात्। अतस्तन्मात्रमैक्यमपि तथा। अन्यस्य ज्ञातुरभावात् स्वेनाज्ञेयत्वाच्च। अयमाशयः। ऐक्यं बोधयदपि वाक्यं कं प्रति

स्वावेद्यब्रह्मणैक्यं च यद्यैक्यस्य निगद्यते। अहं ब्रह्मेत्यादिवाचस्त्वद्रीत्यैवाखिला अपि ॥ ४५ ॥
ब्रह्मस्वरूपतै(मै)क्यं ते न ब्रूयुरिति मे मतिः। यमर्थं मनसा ध्यायेत्तमेवार्थं वदेत्किल ॥ ४६ ॥
स्वावेद्या चित्स्वात्ममात्रमैक्यं द्वेधापि नोल्लिखेत्। ब्रह्माभिन्नैक्यवादेपि नैक्यमानमिदं भवेत् ॥ ४७ ॥
स्वावेद्यस्याहमित्युल्लेखस्यैवाभावतस्तव। जडाहङ्कारवाचस्ताः सर्वा वाच्यास्त्वयैव तत ॥ ४८ ॥

बोधयति। ब्रह्म वाऽन्यं वा। न द्वितीयः। अभावात्। नाद्यः। स्वावेद्यत्वाभ्युपगमेन ब्रह्मणो मन्दादप्यतिमन्दत्वापातात्। तथा च वाक्यबोध्यं नेति **ब्रह्मस्वरूपतैक्यमिति** ॥ अत्र ब्रह्मस्वरूपमैक्यमिति पाठः प्रामाणिक इति भाति। श्रूयमाणस्यैव प्रमाणिकत्वे ब्रह्मस्वरूपतया उपेतमैक्यमिति तृतीयातत्पुरुषो बोध्यः। अर्थस्तु ब्रह्माभिन्नमित्येव। अत्र लोकन्यायं दर्शयति। **यमिति** ॥ मनसाऽवगतमर्थं वाचा वदेत्। न च ब्रह्मणः स्वावगमोऽस्ति। अवेद्यत्वात्। तथापि आगमाद्वा मनआदीन्द्रियाद्वा। नोल्लिखेन्न विषयीकुर्यात्। यतो हि ब्रह्मणः परमते स्वावेद्य-

त्वादहमिति प्रत्यक्षविषयता नास्ति प्रमाणांतरविषयतापि नाभ्युपगता। अत एव ता अहं ब्रह्मेत्याद्या वाचो ब्रह्मविषयकत्वनिर्विषयकत्वयोरयोगाज्ज-
ड्डाहमर्थविषयका वाच्या इत्यर्थः॥ ४८॥ निजमर्थं स्वविषयकप्रकाशरूपम्। अन्यथा त्वदभिलषितासिद्धया इमाः श्रुतीस्त्वजवा चित्त्वगुणाभावे।
अचित्तनु अचिद्रूपं। तेनैक्ये ब्रह्मणा तवेति शेषः। न नः क्षतिः। तव जडतापत्त्या अस्माकमप्रतिद्वन्द्वत्वात्। चित्त्वाभावेपि चिद्रूपं चेत्

जडैक्यं च न ते पक्षे तेनैक्यश्रुतयः क्व ते। भज वा स्वप्रकाशोक्तेर्निजमर्थं श्रुतीरिमाः ॥ ४९ ॥
त्यज वा व्याहतिस्त्रीणां सृज वा हृदि मन्दिरम्। तस्मादीदृङ्मतं युक्तिविरुद्धं सद्भिगर्हितम् ॥ ५० ॥
को विद्वान्मानयेद्विद्वत्सभां प्रत्यानयेच्च कः। निर्गुणश्रुतितश्चित्वमपि नो चेदचित्तनु ॥ ५१ ॥
जडं ब्रह्म भवेन्मूढ तेनैक्ये च न नः क्षतिः। चित्वाभावेपि चित्सच्छेच्छृङ्गं तत्वं च शृङ्गयभूः ॥ ५२ ॥
शूद्रत्वोक्तश्च शूद्रोऽभूः पशुत्वोक्तः पशुर्ह्यभूः। ऐक्याविरोधिधर्माणां बाधिका सा नचेत्तदा ॥ ५३ ॥
एकत्र मग्नदन्तेयं कथं धर्मान्तरं दि(द)शेत्। सर्वं ब्रह्मेति वाचोक्तसर्वैक्यस्य च सिद्धये ॥ ५४ ॥

शृङ्गत्वाभावेपि शृङ्गं तत् ब्रह्म स्यात् तादृशब्रह्माभ्युपगंतृत्वाद्वा धर्माभावेपि धर्मीत्वभ्युपगमाद्वा। त्वं च शृंग्यभूः पशुरित्यर्थः। ब्रह्मणः
सर्वाभेदादेव शूद्रत्वाद्युक्त्या अस्माभिरपि तथाविधब्रह्माभिन्नतयाभ्युपगतस्य तवापि शूद्रत्वादिकं स्यादिति भावः। चित्त्वादिधर्माणामैक्या
विरोधित्वान्नाद्वितीयश्रुतिर्निषेधतीत्यत आह। **ऐक्येति** ॥ धर्माणां चित्वादीनां। एकत्र सार्वज्ञादिधर्मे भग्नदन्ता। तन्निषेधकतया

ब्रह्मणस्तद्धानासमर्था । धर्मान्तरं चित्त्वादिकं दिशेत् । ब्रह्मणि प्रतिपादयेत् कथमिति भावः । बाधकान्तरं चाह । **सर्वमिति** । 'सर्वं खल्विदं ब्रह्मे'ति वाक्याद्ब्रह्मणि सर्वैक्यश्रुतेस्तत्सिद्धये जगद्धर्मांश्चोक्तान् घटत्वादिकान ब्रह्मणि न क्षिपेन्न निराकुर्यात् । चित्वादिवत्सर्वधर्मत्वं ब्रह्मणि श्रुतं चेत्याह । **इत्युक्तेति** ॥ 'सर्वनामा सर्वकर्मा सर्वलिङ्गः सर्वगुणः सर्वकामः सर्वधर्मे'तिश्रुत्युक्तेत्यर्थः । तथा च तव मते विचारणे ब्रह्माऽविद्यमानघटत्वाद्युपेतमेवासीत् । परं किन्तु । सद्धर्मतः वस्तुतः विद्यमानज्ञानानन्दादिगुणतः बहिः शून्यमभूत् । घटत्वादियुतस्य घटा-

सर्वधर्मेत्युक्तमर्वजगद्धर्मांश्च न क्षिपेत् । अतः पटत्वकुड्यत्वघटत्वाद्यमत्वपूर्वकैः ॥ ५५ ॥
धर्मैश्च सहितं तत्स्यात्परं सद्धर्मतो बहिः । यदि श्रौतं जडैक्यं च रक्ष्यं नाध्यक्षरोधतः ॥ ५६ ॥
तर्हि दुःखौघभरितजीवैक्यं च न रक्ष्यताम् । ब्रह्मनिर्गुणतावाक्ते न हि जीवगुणान् क्षिपेत ॥ ५७ ॥
ऐक्योक्तिबलतस्तत्रेत्यसिद्धं हन्याज्जडेष्वपि । उपचारोऽत्र ते कस्मादपचारः प्रभौ तव ॥ ५८ ॥

दिवज्जडत्वेन दिव्यगुणाभावादित्यर्थः । प्रत्यक्षविरोधाज्जडैक्यं नाभ्युपगम्यत इत्यत आह । **यदीत्यादिना** ॥ न रक्ष्यं यदीति योजना । न रक्ष्यतां । प्रत्यक्षविरोधादेव । न च जीवेषु विरोधिगुणाभावादेव नाक्षविरोध इति वाच्यम् । जीवगुणनिषेधकाभावात् । श्रुतश्च ब्रह्मण्येव गुण-निषेधकत्वात् । तथा चानिषिद्धाः प्रत्युत प्रत्यक्षसिद्धाः जीवगुणाः विरोधिनः कथं न स्युः । न च निर्गुणत्वश्रुतिर्ब्रह्माभिन्नत्वाज्जीवस्य तद्वा-नपि गुणान्सैव निषेधतीति वाच्यम् । तथा सति ब्रह्मणि जडैक्यस्यापि श्रुतिप्राप्तत्वादैक्योक्तिबलत एव जडेषु प्रत्यक्षसिद्धं घटत्वादिक-

मपि हन्यात् । सैव श्रुतिर्निराकुर्यादिति समुदायार्थः । जडैक्यमौपचारिकमिति चेद्ब्रह्मणि जीवैक्यमपि तथैव स्यात् । जडेषूपचारश्चेतने ब्रह्मण्यपचारः अल्पजीवाभेदकथनादित्युपहासः ॥ ५८ ॥ **प्रस्तर इति** ॥ यजमानः प्रस्तरः । अग्निर्माणवक इत्यादिवाक्याद्यष्टा त्वं प्रस्तरो माभूरित्यपहासः अनलो माभूदिति विभक्तिविपरिणामेनान्वयः । मायिभिः दुरागमं श्रुत्वाऽऽग्रहादेव बलान्नीता श्रुतिः 'सर्वं खल्विदं ब्रह्मे'त्यादिका राजपुरुषगृहीतपुरुषवद्विचारयतीत्याह । **किंचेत्यादिना** ॥ विचारकरणे हेतुः तद्गीत्वा स्वपरनाशप्रसक्तिः ॥ ६० ॥ विचारप्रकार-

माभूस्त्वं प्रस्तरो मन्द मा च माणवकोऽनलः । किं च सर्वमिदं ब्रह्म खल्वित्याह हि या श्रुतिः ॥ ५९ ॥
मा मायिभिर्बलान्नीता श्रुत्वा तस्य दुरागमम् । स्वनाशाच्च जगन्नाशाद्भीतेत्थं पर्यचिन्तयत् ॥ ६० ॥
सर्वश्रुतेरसंकोचो जडैक्यान्न भवेत्किल । एकस्मिन्सर्वताऽयोगात्संकोचोप्यस्य नार्थकृत् ॥ ६१ ॥
एकजीवमतस्य स्यादर्थः कोऽपि न मेऽभवत् । बहुजीवमतेप्येकब्रह्मणो बहुनैकता ॥ ६२ ॥
न स्याद्ब्रह्मगतैकत्वत्यागे ब्रह्मद्विताऽऽपतेत् । जीवस्य बहुतात्यागे सर्वशब्दः प्रकुप्यति ॥ ६३ ॥

मेव दर्शयति । **सर्वेति** ॥ मया जडैक्योक्तावपि सर्वशब्दोऽसंकुचितो न स्यात् । कुतः । एकस्मिन्सर्वत्वायोगात् । तथा चैकत्वे सर्वस्यैवाभावात्सर्वशब्दोऽनर्थकः स्यात् । एकजीवमतेऽर्थसंभवेपि न मे कश्चिदर्थः । बहुजीवमते तु एकस्य ब्रह्मणो बहुना एक्यायोग एव । ब्रह्मण्येकत्वत्यागे तत्रैव द्विता स्यात् । जीवस्य वा बहुत्वत्यागे पुनः सर्वशब्दो ममानर्थकः स्यात् । जीवब्रह्मगतयोरेकत्वबहुत्वयोरत्यागे कथं विरुद्धयो-

रैक्यम् । विचारान्तरमप्याह । **एकैक इति** ॥ इयता कालेन मुक्तः एकैक एव । स तु न सर्वशब्दोक्तः । मुक्तानां पुञ्जीकरणं त्वैक्य प्राप्त्याऽयोगाच्च नोपपद्यते । अतः कदा ब्रह्मणः सर्वत्वम् ॥ ६४ ॥ तवाभिमतैक्यरूपमोक्षः पुञ्जताया भञ्जको नाशकः किन्नित्यपहासः ऐक्यस्यैवायोगेन पुञ्जताभञ्जकत्वं दूरोत्सारितमिति भावः । पदार्थानां पृथक्स्थितावेव बहुत्वं संख्यापकपुरुषानुभवसिद्धमित्याह ।

अत्यागेतु विरुद्धैक्यं कस्य वा स्याद्विवेकिनः । एकैको मुच्यमानोऽद्य सर्वशब्देन नोच्यते ॥ ६४ ॥
तत्पुञ्जीकरणायोगात्सर्वत्वं स्यात्कदा वद । एकत्वरूपमोक्षोऽसौ पुञ्जताभञ्जको नु किम् ॥ ६५ ॥
एकैकवस्तुगणकाश्चान्ते तं वस्तुसंचयम् । वदन्ति सर्वशब्देन न क्वाप्येकस्य सर्वता ॥ ६६ ॥
एकैकनाशे सर्वं च नष्टमित्यपि यद्वचः । तच्च पुंजीभूततत्तन्नाशेष्वेवाऽऽह सर्वताम् ॥ ६७ ॥
प्रतियोगित्वसम्बन्धादभावानुगतैव सा । उपचारेण तत्रापि प्रोच्यते न तु मुख्यतः ॥ ६८ ॥
बहुत्वाख्यगुणव्याप्ता नष्टेषु न हि सर्वता । एकैकवस्तुनिष्ठैः प्रागेकत्वाख्यगुणैः किल ॥ ६९ ॥

एकैकमिति ॥ यत् यस्मात् नष्टमित्यपि वचः नाशेष्वेव सर्वतामाहेति योजना । तथा च विपरीत एव लोकानुभवः । सर्वं नष्टमित्यस्य सर्वनाशोऽस्तीत्येवार्थ इति । नष्टमित्यनेन नाशप्रतियोगिषु भावेषु प्रतीयमानं सर्वत्वं कथमभावे उच्यत इत्यत आह । **प्रतियोगित्वेति** ॥ सर्वं नष्टमित्यादौ नाशरूपाभावानुगता सर्वता प्रतियोगित्वसंबन्धाद्भावेषूपचारेणोच्यत इत्यर्थः ॥ ६८ ॥ कुत इत्यतः समुदायत्वरूपसर्वत्वस्य

बहुत्वगुणव्याप्ततया नष्टेषु च धर्म्यभावेन गुणाभावाप्रसिद्ध्याप्तं सर्वत्वमपि नोपपद्यत इत्याह । **बहुत्वेति** ॥ बहुत्वस्यायमेकोऽयमेक इत्याद्येकत्वादिगुणविशिष्टधर्मिकापेक्षाबुद्धिजन्यत्वेन नष्टेषु च तदयोगादिति भावः । **शब्दार्थवेदिन इति** ॥ विधेयव्याप्योद्देश्यतावच्छेदकव्यापकधर्मपर्याप्तिः सर्वशब्दप्रवृत्तिनिमित्तं सर्वत्वमिति यावत् । यथा सर्वे घटा रूपवन्त इत्यनेन विधेयरूपव्याप्योद्देश्यतावच्छेदकघटत्वव्यापकयावद्घटगतसमुदायत्वरूपधर्मपर्याप्तिर्घटे प्रतीयते । अत्र सर्वं द्रव्यं रूपवदिति प्रयोगवारणाय धर्मे विधेयव्याप्यत्वोद्देश्यतावच्छेदकव्यापकत्वयोर्निवेशः ।

त्रिभिर्वा चतुराद्यैर्वा बहुता तेषु वस्तुषु । जायते बहुतायास्तु या पर्याप्तिः स्थले स्थले ॥ ७० ॥
तां तां सर्वपदेनाहुः सन्तः शब्दार्थवेदिनः । तद्बहुत्वसमव्याप्तं सर्वत्वं न हि संशयः ॥ ७१ ॥
अभावेषु गुणाभावनादो येषां हि वादिनाम् । बहुत्वैकत्वपूर्वोक्तिस्तेषां तत्रौपचारिकी ॥ ७२ ॥
गुणैः समं नष्टभावेष्वभावेषु च वस्तुनाः । न सन्ति तेन ते शब्दा मुख्यतो नेति तन्मतम् ॥ ७३ ॥
अनष्टार्थेषु सर्वत्वबहुत्वाभं हि कोविदैः । पुंजीभूतेषु तेष्वेव प्रोच्यते बहुवस्तुषु ॥ ७४ ॥

अन्यथा व्याप्यत्वाऽनिवेशे उक्तप्रयोगे उद्देश्यतावच्छेदकद्रव्यत्वव्यापकयावद्द्रव्यगतसमुदायत्वस्य द्रव्येऽबाधात् । व्यापकत्वानिवेशेऽपि तथा । रूपव्याप्यरूपवद्द्रव्यमात्रवृत्तिसमुदायत्वमादाय तथा प्रयोगापत्तेः । निवेशे च नापत्तिः । यावद्द्रव्यगतसमुदायत्वस्य रूपव्याप्यत्वाभावात् । रूपवन्मात्रवृत्तिसमुदायत्वस्य च द्रव्यत्वव्यापकत्वाभावादिति भावः । **सर्वपदेनाहुः** प्रवृत्तिनिमित्ततया । तत् । शब्दमर्यादया बहुत्वव्याप्तार्थ-

स्वैव पदेन बोधात् । येषां मतेऽभावेषु गुणाः न सन्ति तेषां मते एकोऽभाव इत्यादिव्यवहारे एकत्वादिगुणवत्तद्व्याप्तं सर्वत्वमप्यौपचारिकमेव । मुख्यतस्तु सत्स्वेवार्थेषु नाशात्पूर्वं समुदितेषु एकत्वबहुत्वादिकं तद्व्याप्तसर्वत्वं चेति एकस्मिन्सर्वशब्दः क्वापि नेति भावः । **एकैकमोक्षेपीति** ॥ क्रममुक्तिपक्षे वा युगपन्मुक्तिपक्षे वा ब्रह्मणैकत्वमाप्तानां चितां सर्वत्वं बहुत्वं वा नोपपद्यत इति मे सर्वमिति गिरः कथमर्थं

एकस्मिन्सर्वशब्दस्तु न लोके नाप्यलौकिके । अस्य त्वेकैकमोक्षेऽपि बहुत्वं तु चितामपि ॥ ७५ ॥
एकेन ब्रह्मणैकत्वमाप्तानां न हि युज्यते । तस्मादेकैकमुक्तौ च सर्वं ब्रह्मेति मे गिरः ॥ ७६ ॥
अर्थं किञ्चिष्टबहुतामादाय घटयाम्यहम् । ऐक्याख्यमोक्षोप्येकोऽस्य तत्रापि बहुता न हि ॥ ७७ ॥
बहवो ये भवध्वंसास्तेपि सर्वैक्यवादिनाम् । ब्रह्मणैकत्वमाप्ताश्चेन्नैव स्युर्बहुतोचिताः ॥ ७८ ॥
असत्वे तु पृथक्तेषां नितरां बहुतोचिता । सर्वं ब्रह्मेत्यादिगिरा तदैक्यं को वदेद्बुधः ॥ ७९ ॥
अभावद्वैतवादे ते बहवो नैकतोचिताः । जडत्वात्सुबहुत्वात्तैरनङ्गीकरणादपि ॥ ८० ॥

घटयामि संसारदशायामैक्यं नास्ति । ऐक्यरूपमोक्षे तु सुतरां न बहुता । ये भवध्वंसास्ते सर्वैक्यवादिमते ब्रह्मणैकीभूता इति न तत्रापि बहुतामादाय ममार्थघटना यद्यप्यभावद्वैतवादेऽभावानां बहुत्वं तद्व्याप्तं सर्वत्वं चोपपद्यते । तथापि तेषां जडत्वेन ब्रह्मणैक्याभावात् । अभावद्वैतवादिभिस्तदैक्यानङ्गीकाराच्च न तन्मतरीत्यापि ममार्थघटनेति भावः ॥ ८० ॥ तदध्वना मायिमार्गेण । अस्मै शब्दाय सर्वशब्दाय ।

उक्तवर्त्मना शब्दाभिमतो नेत्यर्थः ॥ ८२ ॥ सर्वैकशब्दयोर्विरोधाच्च नैक्यबहुत्वयोरेकत्र योग इत्याह । **क्वापीति** ॥ अन्यत्र गुणवति एक-सर्वपदयोः भावरूपगुणवाचकत्वेऽपि तव निर्गुणे ब्रह्मणि तदयोगात् ब्रह्मणि श्रूयमाणं 'सर्वं खल्वि'ति सर्वपदं 'एकमेवे'त्येकपदं च क्रमेणैकत्वा भावसर्वत्वाभावौ निमित्तीकृत्यैव प्रवृत्ते इति क्वापीत्युक्तम् । तथा च तवमते यत्र सर्वपदं प्रयुज्यते तत्रैकत्वं नास्ति । यत्रैकपदं प्रयुज्यते तत्र

अतो मे सर्वशब्दोऽयं नैव गच्छेत्तदध्वना । मुख्यार्थस्य परित्यागः शब्दायास्मै न रोचते ॥ ८१ ॥
मुख्यार्थत्यागिनीं मां च हसेयुः सर्वसज्जनाः । क्वाप्येकत्वाभावमेव ब्रूयुः सर्वपदादयः ॥ ८२ ॥
तथा बहुत्वाभावं च क्वचिदेकपदं व्रजेत् । अमुख्या लक्षणाख्यासौ वृत्तिस्तवतु सापि न ॥ ८३ ॥
यतोऽत्यन्तविरुद्धौ तावभावौ चैक्यरोधिनौ । निर्विशेषा ब्रह्मचित्ते जैवी चिदपि तादृशी ॥ ८४ ॥
अतः कस्य बलाद्वा सा बहुता चैकता वद । तद्भेदस्यैव बलतो वाच्या तासां द्विरूपता ॥ ८५ ॥
भेदेनैक्यं ततस्त्यागे सर्वोक्तेर्नास्ति गोचरः । अतः सर्वप्रकारैश्च ममार्थं व्यर्थयत्ययम् ॥ ८६ ॥

बहुत्वं नास्तीत्यर्थ इति तयोः परस्परपरिहारेण सत्वदर्शनेन विरोधादमुख्यवृत्त्या लक्षणयापि जीवपरयोरैक्यं वक्तुं तौ विरुद्धौ धर्मौ न मुंचतः । यतस्तावभावौ अतस्त्वन्मतेऽपि सत्यौ । विशेषादपि तव गतिर्नास्तीत्याह । **निर्विशेषेति** ॥ तादृशी निर्विशेषा । तत् अभेदे विरुद्धयोस्तयोरभावयोर्घटयितुमशक्यत्वात् । द्विरूपता । एकत्वबहुते ॥ ८५ ॥ भेदे सतीति शेषः । ऐक्यं न । ततः ऐक्याभावभिया ।

त्यागे अर्थाद्भेदस्य । उक्तरीत्या सर्वपदं निरर्थकं भवतीति भावः । ममैव नाशकस्य । सर्वमिथ्यात्ववादित्वात् । एवं बहुजीववादिमतेपि ममार्थो नास्तीति श्रुतेर्विचारप्रकारमाह । **बहुजीवेति** ॥ अस्य सर्वशब्दस्य । न लभ्यते क्रममुक्तौ युगपन्मुक्तौ वा संसारे वा पूर्वं व्याख्यातरीत्या नोपपद्यते । अतः सर्वशब्दस्यानुपपन्नार्थत्वात् । एकत्वैकस्वभाववत् । केवलैकत्वस्वभावं ब्रह्म । अस्य सर्वशब्दस्य नार्थः । बहुत्वा

ममैव नाशकस्यास्य न चित्रं मेऽर्थनाशनम् । एकजीवमते सर्वशब्दः स्वार्थे यथा जहौ ॥ ८७ ॥
बहुजीवमतेऽप्यस्य शब्दस्यार्थो न लभ्यते । अतो ब्रह्माऽस्य नार्थोऽभूदेकत्वैकस्वभाववत् ॥ ८८ ॥
ऐक्यार्होऽन्योऽपि नार्थोऽभूदेकत्वैकस्वभाववान् । यदा सर्वविमोक्षः स्यात्तदाप्युक्तेन वर्त्मना ॥ ८९ ॥
रुन्धे पदद्वयं मेऽन्ध बहुता चैकतापि ताम् । अतोऽशब्दतोऽर्थं वा कथं गच्छामि तेऽध्वनि ॥ ९० ॥
अहमर्थार्थिनी वाणी त्वं तत्त्वघ्नः पदे पदे । इत्थं सर्वब्रह्मतोक्तिरर्थाभावोत्थरोषतः ॥ ९१ ॥

संभवात् । अन्योऽपि जीवोपि । तस्यापि संसारदशायामप्यैक्यार्हत्वेन ब्रह्मवदेकत्वैकस्वभाववत्वादिति भावः । उक्तमेव स्फुटयति । **यदेति** ॥ सर्वमोक्षेपि चितां श्रूयमाणा बहुता चैकता चोक्तरीत्या दुरुपपादा । पदद्वयं सर्वपदं एकपदं च । रुन्धे इति भावः । अतः विरुद्धघटनाऽयोगात् । त्वन्मतरीत्याऽशब्दतः शब्दाऽवाच्यब्रह्मणः सकाशात् । कथं वाऽर्थं गच्छामि सार्थका भवेयम् । अशब्दत इत्यनुपपत्तौ हेत्वन्तरम् ॥ ९० ॥ त्वं तु पदे पदे तत्त्वस्यार्थस्य नाशकः । उक्तिः 'सर्वं खल्विदं ब्रह्मे'त्यादिका । प्रत्याक्षिपत् धिक्कृतवती । यथा स्वामी स्वोक्ताकरणे कुपितः विष्टिगृहीतं

वक्ति । त्वं सर्वं मदुक्तं कृतवान्खलु । त्वं भ्रान्तः खलु इत्यादि । एवमत्रापि स्वानभिमतिसूचकेन खलुशब्देन तन्मतं प्रत्याक्षिपदित्यर्थः । साहित्यमुद्रयाऽऽह । **किंचेति** ॥ अपेक्षी-आम्नायः । नः पदे अस्मत्पदे । स्पर्शने कृते सति । पदाभ्यां सर्वब्रह्मपदाभ्यां पौरुषं अत एव स्त्रीलिङ्गतया प्रकृतत्वेपि पूर्वमपेक्षीति पुमानिर्देशः । अस्य महावाक्यत्वात्तदर्थस्य सत्यत्वादत्र धर्मे मिथ्यात्वरूपगतिरपि ते नास्तीत्याह ।

प्रत्याक्षिपन्निषेधार्थं खलूक्त्या मायिनां मतम् । किं च पक्षान्तरापेक्षी पुनर्नः स्पर्शने पदे ॥ ९२ ॥
पदाभ्यामेव हन्मि त्वां पश्याद्य मम पौरुषम् । महावाक्यस्य पदयोरर्थः सत्यस्तवापि हि ॥ ९३ ॥
तन्मिथ्याभूतबहुतापक्षोप्यत्र न शोभते । मुख्ययोर्धर्मिपदयोरर्थे नामुख्यतोचिता ॥ ९४ ॥
अविभक्त्यन्तधर्मार्थविभक्त्यर्थस्य तूचिता । अतो विभक्त्यर्थभूतमैक्यं त्यक्त्वा सदक्षतां ॥ ९५ ॥
जीवेष्वेष वदेद्वाक्यं यज्वप्रस्तरवाक्यवत् । पदाभासाभासतायां न कस्यापि भयं भुवि ॥ ९६ ॥
छेदस्तु मुख्यपदयोः शिरच्छेदायितो नृणाम् । किंच मुख्यार्थबाधेस्याल्लक्षणा नान्यथा किल ॥ ९७ ॥

महावाक्येति ॥ विचारान्तरमप्याह । **मुख्ययोरिति** ॥ धर्मधर्मिवाचकपदयोर्मध्ये धर्मिवाचकपदस्य मुख्यत्वेन तदर्थस्यामुख्यता नोचिता । किन्तु । **अविभक्तीति** ॥ अविभक्तेः प्रकृतेः मुख्यार्थकाया अन्ते विद्यमाना या धर्मार्थकविभक्तिः तदर्थस्यामुख्यतोचितेति । औचित्यप्रदर्शनाय विभक्तौ धर्मार्थकत्वविशेषणम् । तदुपपादनाय धर्म्यर्थकप्रकृतिपदान्त्यस्थितत्वरूपेतरविशेषणम् । ऐक्यं मुख्यं त्यक्त्वा ।

वाक्यवत् । 'यजमानः प्रस्तर' इति वाक्यवत् । पदस्य प्रकृतेराभासः विभक्तिः तदाभासता तस्या अमुख्यार्थता ॥ ९६ ॥ लक्षणाया मुख्यार्थ-बाधमूलकत्वेन प्रकृते तदभावः । दोषान्तरं चाह । **विरुद्धेति** ॥ **विरुद्धधर्मिणोरिति** ॥ एकत्वैकस्वभाववदित्यत्रोक्तरीत्या । तथाच विपरीत-मासीत् । सर्वत्र लक्षणास्थले मुख्यार्थबाधः । तव तु लक्ष्यार्थस्यैव बाधितत्वं । **अत्यन्तेति** ॥ मम मते चितोरपि केवलं विरोधः । तव तूक्त-

विरुद्धधर्मिणोर्जीवब्रह्मणोरेकतैव ते । मतेपि बाधिता मन्द मम त्वत्यन्तबाधिता ॥ ९८ ॥
तद्बाधितविभक्त्यर्थं छिन्धि वृत्यन्तरासिना । अबाधितार्थछेदस्तु न योग्यो नापि ते हितः ॥ ९९ ॥
यो दोषी तस्य नरको दृष्टो नैव त्वदोषिणः । पदद्वयार्थत्यागे च जीवानां ब्रह्मणैकता ॥ १०० ॥
न सिद्ध्येच्चिच्चिदित्येव ह्युक्तं स्यात्तेन किं फलम् । मुख्यार्थे सत्यमुख्यार्थो नैवार्थ्यः किल धीमतां ॥ १०१ ॥
अतः श्रुतिः स्वमुख्यार्थलाभायेत्थमचिन्तयत् । बहुता धर्मिषु गताऽत्याज्याकारगुणादिकान् ॥ १०२ ॥

रीत्या एकत्वबहुत्वरूपधर्माभ्यां इति विवेकः परेण स्वरूपेण विरोधाऽनंगीकारात् । वृत्त्यन्तरासिना गौण्या । न हितः । पूर्वोक्तरीत्या विरोधपरिहारस्य कर्तुमशक्यत्वात् । ते न हित इत्युक्तं रीत्यन्तरेणोपपादयति । **य इति** ॥ तथाच निर्दोषतया प्रमितस्यापि ब्रह्मणः जीवाभेदे दोषितया नरकं । यद्वा तथोक्त्या ब्रह्मनिन्दनेन तव दोषित्वान्नरकं स्यादिति । एकता कुतो न स्यादित्यत आह । **चिच्चिदिति** पदानां लक्षणया-चिन्मात्रपरत्वे चिच्चिदित्यवोक्तं स्यात् जीवपरैक्ये किमायातमिति भावः । इत्थमित्युक्तामेव रीतिं दर्शयति **बहुतेति** ॥ इयं बहुता वि-

तत्त्वेन स्वसमान् सर्वानपि तस्य तस्य हितान् । यद्वा न पिहितानपिहितान् अनुभवसिद्धत्वेन प्रकटान् । ब्रह्मणि तु भुक्त्वा प्रकटान् । अथवा अपिहितानाच्छादितान् तवाऽज्ञानात् । किंवाऽपिहि किंच तान् प्रमितान् दुःखित्वादिकान् सर्वज्ञत्वादिकांश्च ॥ अत्याज्याकारगुणादिकान् मिथ्यात्वाद्युक्त्याऽन्यथा वा त्यक्तुमशक्यान् विलक्षणानाकारान् गुणादींश्च भिनत्ति सामानाधिकरण्येन स्थातुं न सहते । यद्वा त्याज्याः हेयाः जैवाकारगुणादयः इदं ब्रह्मणि नयनार्नेहत्वे हेतुः । या बहुताऽभेद-

समानपि हितान्सर्वान्भिनत्यामरणं मिथः । नाभेदमात्रं सहते किं पुनस्तद्विलक्षणान् ॥ १०३ ॥
यथा पटस्था बहुता घटस्यान्यत्र च स्थिता । मरणे सति यद्वस्म तच्चान्योन्यं भिनत्ति हि ॥ १०४ ॥
तद्धर्मिनिष्ठबहुता स्वभावोऽयमभूद्बलात् । एवं चानादितो भिन्नस्वभावाद्भिन्नकर्मणः ॥ १०५ ॥
अणूञ्जीवगणान्स्वस्वधर्माधारान्स्वधर्मिणः । तवाप्यभिमता तेऽथ बहुता लोकसम्मता ॥ १०६ ॥

मात्रमपि न सहते परस्परं विलक्षणान् तान् धर्मान्न सहते इति किं वाच्यम् ॥ १०३ ॥ अत्र दृष्टान्तमाह । **यथेति** ॥ घटस्य बहुता । अन्यत्र स्थिता बहुता च । भिनत्ति परस्परम् । आमरणमित्युक्तमनुभावयति । **यदिति** । यदि मरणोत्तरमपि भस्माप्यन्योन्यं तरतमभावाद्वाऽन्यस्माद्वैलक्षण्याद्वा भिनत्ति । तदाऽऽमरणं भिनत्तीति किमु वक्तव्यम् । तत् बहुत्वस्यामरणं भेदकत्वात् । स्वभावः स्वाभाविकी । भिन्नकर्मण इति द्वितीयाबहुवचनान्तम् ॥ १०५ ॥ अभिमता बहुता । अथ ते स्वस्वधर्माश्च । मिथः भिनत्ति जीवान् । ब्रह्मणश्च एतान् जीवान्

भिनत्ति । ते धर्मा इत्यत्र भिन्दंतीति विपरिणामेन योज्यम् ॥ १०७ ॥ **न रुणद्धीति** कथमित्यनुवर्तते । तत्र **हेतुर्महदित्यादि** । विरुद्धत्वादिति भावः । पुनरचिन्तयदित्युक्तां चिन्तामाह । **इदमित्यादिना** । सर्वं पदं सर्वमिति पदम् । इदमादिसर्वपदं च । अदृढं न नियतार्थकम् ।

मिथश्च ब्रह्मणश्चैतान्न भिनत्ति कदा वद । कथं चातिविरुद्धेन ब्रह्मणैषामभिन्नताम् ॥ १०७ ॥
नरुणद्धि महत्तद्धि सर्वज्ञं सर्वकर्तृ च । एवं चातिविरुद्धैक्यमिदं वक्तुं कथं यते ॥ १०८ ॥
अतोऽन्यं लोकमान्यं च कंचनार्थं वदाम्यहम् । इति श्रुतिर्विनिश्चित्य पुनश्चार्थमचिन्तयत् ॥ १०९ ॥
इदं सर्वं पदं सर्वनामत्वान्न क्वचिद्दृढम् । यत्रेच्छा तत्र गच्छेद्धि तत्पूर्वत्रोत्तरत्र च ॥ ११० ॥
प्रस्तुतं भगवद्धर्मनिजरूपमनन्तकम् । अनुच्छेदं सर्वमिति ब्रह्मेत्याह तदेकताम् ॥ १११ ॥
तेष्वेव बोधयन्ती सा नोचेद्दोषस्य नौषधम् । धर्मनिष्ठा तु बहुता धर्मिणैक्यं न बाधते ॥ ११२ ॥
भेदाभेदमते धर्मधर्म्यैक्यस्यापि सम्मतेः । यथा रूपरसादीनां बहुता स्वस्वधर्मिणा ॥ ११३ ॥

यत्रेच्छा । वक्तुरिति शेषः । तथाच सर्वपदेन पूर्वोत्तरप्रसक्ताननन्तानुच्छेदशून्यान् धर्मान् संगृह्य तेषु धर्मेष्वेव ब्रह्मपदेन तदेकतामाह । धर्माणामिदमादिना ग्रहणे बुद्धिस्थत्वाय प्रस्तुतत्वोक्तिः । सा श्रुतिरेवं बोधयन्ती नो चेदौषधं नेति भावः । अत्र कल्पे धर्मधर्मिगतबहुतैकतं नाभेदबाधिके इति सदृष्टांतमाह **धर्मेत्यादिना** ॥ ११२ ॥ रूपादीनां धर्माणां बहुता । एकेन धर्मिणा ऐक्यं चास्तीति योजना । लोके यद्-

दृष्टं तदृष्टानुसारेण कल्प्यम् । प्रकृते च नीलमुत्पलमित्यादौ धर्मधर्मिणोः सामानाधिकरण्यमभेदः दृष्ट इति भावः । 'नेहनाने'ति श्रुतिबलाद्ब्रह्मधर्माणां तेनाऽत्यन्ताऽभेदः । लोके तु भेदाभेदाविति विशेषः । अभेदे आधाराधेयभावः कथमित्यत आह । **धर्मेति** ॥ स्वभावेन विशेषाऽपरपर्यायेण ॥ ११७ ॥ आधाराधेयभावस्य घटकान्तरमप्याह । **यदिति** ॥ हरेस्तद्धर्माणां चाऽघटितघटकसामर्थ्यसद्भावादपीति भावः ।

एकेनाप्यैक्यमस्त्येव तवापि च ममापि च । तथेहापि भवेदेव यदृष्टं च दृष्टवत ॥ ११४ ॥
सामानाधिकरण्यं च धर्माणां धर्मिणा सह । नीलोत्पलादिवाक्येषु यद्दृष्टं तेन का क्षतिः ॥ ११५ ॥
दृष्टानुसारः सर्वस्य निर्वाहकशिरोमणिः । इयांस्त्वत्र विशेषोऽस्ति नेह नानेतिमानतः ॥ ११६ ॥
भेदासहिष्णु ब्रह्मैक्यं तद्धर्माणामभृद्बलात् । धर्मधर्मिस्वभावेनैवाधाराधेयता भवेत ॥ ११७ ॥
यत्समर्था हरेर्धर्मा धर्मी चासौ महाप्रभुः । कदाप्यभावस्याभावस्तत्स्वभावानुभावकः ॥ ११८ ॥
तथाऽवयवनिष्ठा या बहुता सा च देहतः । एकस्मादप्यनेकेषां तेषामैक्यसहा किल ॥ ११९ ॥
अतोऽपि भगवत्पादजानूरुकटिपूर्वकम् । हस्तमस्तकनेत्राद्यं सर्वं ब्रह्मेति वा मम ॥ १२० ॥

अधाराधेयभावस्य धर्मधर्मिस्वभावत्वे युक्तिमाह । **कदापीति** ॥ तथा च यस्याभावो यत्र कदापि नास्ति स तत्स्वभावः । प्रकृतेप्याधाराधेयभावः धर्मधर्मिणोः सकाशात्कदापि नापैतीति तत्स्वभाव इति भावः ॥ ११८ ॥ श्रुतेरर्थान्तरमाह । **तथेति** ॥ अवयवगा बहुता अवय-

विनः एकस्माद्देहात्तेषामवयवानामैक्यसहा ॥ १२० ॥ ते अवयवाः । तथा च 'कप्यासं पुण्डरीक'मित्यादौ प्रस्तुतानत एवेदंपदनिर्देश्यान् सर्वपदेनानूद्य ब्रह्मेति स्वरूपदेहाभेदमभिधत्ते इति । अयमाशयः । इदंपदनिर्देशेप्रस्तुतत्वमावश्यकम् । हेऽज्ञ तेऽवयवाः छांदोग्यप्रथमाध्याये 'यथा कप्यास'मित्यादौ पादादयः पूर्वं उक्ताः छांदोग्ये एव तृतीयाध्यायगता 'सर्वं खल्वि'ति वाक् इदमा तानवयवान्निर्दिश्याऽभेदं बोधयतीति भावः । श्रुतेरर्थान्तरमप्याह । **विशेषेति** ॥ **व्यासशिक्षयेति** ॥ अनेनाऽस्यार्थस्य गुरूपदेशप्राप्तत्वमितरस्य तदभावं च सूचयति । तथा

अर्थोऽस्तु तेऽज्ञ कप्यासं पुण्डरीकमिवाक्षिणी । इत्यादौ प्रस्तुतास्तस्मादिदंतार्हाश्च तेऽखिलाः ॥ १२१ ॥
सर्वलोकविरुद्धार्थं कोऽर्वाचीनो वदेद्वद । विशेषशक्त्या सर्वत्वबहुत्वानन्तताादिकम् ॥ १२२ ॥
यर्ह्यभिन्नावतारेषु यो ब्रूते तन्मतं भजे । स्थानभेदोत्थतद्भेदं निषेद्धुं व्यासशिक्षया ॥ १२३ ॥
तद्रूपवृन्दमखिलं तन्मतप्राप्तमेव हि । इदमित्यनूद्य सर्वं च ब्रह्मेत्येव ब्रवीम्यहम् ॥ १२४ ॥
अथवा रूपजातं तद्विष्णुवामनपूर्वकैः । तदसाधारणैः शब्दैर्विद्वन्मात्र प्रसिद्धिभिः ॥ १२५ ॥

च स्थानभेदादिप्रयुक्तभेदशङ्कानिरासाय सकलमपि परमात्मरूपवृन्दमिदमित्यनूद्य सर्वं ब्रह्मेति ब्रवीमीति श्रुतिरचिन्तयदित्यर्थः ॥ ॥ १२४ ॥ अर्थान्तरमप्याह । **अथवेति** विद्वद्रूढैर्विष्णुवामनपूर्वकैरग्निवाय्वादिशब्दैश्च प्रतिपाद्यं भगवतोनन्तरूपं तल्लक्ष्म्यास्तदाश्रया मानिन्या मम भारत्याश्च पदे पदे प्रतिक्षणं । दृष्टिगोचरमितीदमः निर्दिश्य सर्वं ब्रह्मेति वदामीत्यचिन्तयदिति भावः । अत्र यद्यपि श्रुतेर्ज्ञ-

त्वादियता प्रबन्धेन दर्शितं विचारकर्तृत्वमनुपपन्नं । तथापि मायिप्रदर्शितस्वाभिमन्यमानश्रुत्यप्रमाण्यदर्शनजनितरोषकलुषिताऽभिमानि

अग्निवाय्वादिशब्दैश्च प्रतिपाद्यं पदे पदे । यतश्च श्रुतिमानिन्या लक्ष्म्या मम तदाज्ञया ॥ १२६ ॥
मानिन्याश्च दृशा सर्वं सर्वदाऽत्रैव दृश्यते । तस्मादिदंपदार्हैं तद्वृन्दं सर्वं च पूर्ववत् ॥ १२७ ॥
श्वश्रूवा लक्ष्म्याः नुषायास्तु मम वा दृष्टिगोचरम् । अनूद्य सा वा ब्रह्मेति स्तौति स्तौम्यहमेव वा ॥ १२८ ॥
वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः । द्वितीयः सुधियां कण्ठालङ्कारं कुरुतेतराम् ॥ १२९ ॥

श्रीः ॥ इति श्रीमद्वादिराजपूज्यविरचितन्यायरत्नावल्यां द्वितीयः सरः ॥ श्रीः

देवता एवं विचारितवतीति । यद्वा काष्ठं पचतीति सार्वजनीनव्यवहारादुग्रन्थकारः स्वकर्तृकमेव विचारं करणभूतायां श्रुतौ व्यवाहरदिति ध्येयमिति ॥ १२१ ॥

॥ इति भाविसमीरश्रीमद्वादिराजपूज्यचरणविरचितन्यायरत्नावल्याः व्याख्यायां प्रकाशसंग्रहाख्यायां द्वितीयः सरः ॥

॥ द्वितीयसरः समाप्तः ॥

ॐ ॥ श्रीः ॥ गुरुवर तव सा कृपार्द्रदृष्टिर्मम हृदयमलीमसानि भिन्ताम् । उभयसरवगाहने कृतेपि न भवति विमलो ममाऽन्तरात्मा ॥ १ ॥ सर्वपदोक्तबहुत्वसमव्याप्तधर्मविरुद्धत्वान्नैक्यमिति पूर्वसरे प्रतिपाद्य द्वित्वविरुद्धत्वाच्च तदैक्यं वक्तुं न शक्यत इति अत्र प्रतिपादयति । **कथमिति** ॥ एकं ब्रह्म एको जीव इत्यपेक्षाबुद्धिजन्यं द्वित्वं तयोरेकतां न रुणद्धि किम् । रुणद्धयेव । तद्वत् । पूर्वोक्तबहुत्ववत् । तथा चैकजीवे नाप्यभेदाऽयोगे सर्वाऽभेदः सुदूरपराहत इति भावः ॥ १ ॥ तदेवोपपादयति **द्वयोरिति** ॥ **ध्रुवेति** ॥ अपेक्षाबुद्ध्याद्वित्वमनुत्पाद्य निर्निमित्तं

श्रीमद्वादिराजगुरुभ्यो नमः ॥ श्रीवेदव्यासाय नमः ॥

कथं चैकचितोपि स्यादेकब्रह्मचितैकता । एकत्वद्वयजं तद्वद्द्वित्वं किन्न रुणद्धि ताम् ॥ १ ॥
द्वयोरैक्यकथायां हि द्वित्वापेक्षा यतो ध्रुवा । अपेक्षाबुद्धिनाशेनाप्यस्य नाशो न तद्भवेत् ॥ २ ॥
जहती चाप्यजहती पदयोर्लक्षणा यदा । तदापि च द्वयं ताभ्यां पदाभ्यां ध्रुवमुच्यते ॥ ३ ॥

द्वयोरिति व्यवहारस्यैवाऽयो ।त् । उत्पादे च विरोधात् । द्वित्वनाशानन्तरमैक्यं स्यादित्याशामपि निराकरोति । **अपेक्षेति** ॥ निमित्तबुद्धिनाशेऽपि द्वित्वनाशो न स्यात् । कुतः । तत् तयोरैक्यमित्यस्य ध्रुवं द्वित्वापेक्षत्वात् । तथाचैकस्यैक्यं वा द्वयोरैक्यं वा नाद्यः जीवब्रह्मणोरैक्यासिद्धेः । द्वितीयेत्विदमनिवार्यमिति भावः ॥ २ ॥ जहदजहल्लक्षणयापि तव नेष्टसिद्धिरित्याह । **जहतीति** ॥ व्यक्तिद्वयं ध्रुवमुच्यते । यतः धर्मं जहती व्यक्तिमजहतीत्यर्थप्रतीतेस्तस्याः व्यक्तिलोपकत्वं नेत्यवगम्यत इति ॥ ३ ॥ त्रेधाप्यैक्योक्तया तव नेष्टसिद्धिरित्याह ।

द्वितामिति ॥ अयमाशयः । तत्त्वंपदाभ्यां द्वितामनूद्य द्वित्वेन व्यक्तिमनूद्येति भावः । वाक्येनैक्यं विधीयत इति वदन् प्रष्टव्यः किं द्वित्वादिधर्म मुण्डयित्वैक्यं ब्रूषे । उतान्ययोरमुण्डितधर्मयोः **अथवा** तत्त्वदैक्यं ब्रह्मचिता ब्रह्मचितः जीवचिता च **तच्चित** इति । नाद्यः । उक्तरीत्या लक्षणया सकलधर्मलोपेपि व्यक्तिद्वयाऽवश्यंभावेन विरोधिद्वित्वाऽवर्जनात् । न द्वितीयः विशिष्टैक्यस्य बाधितत्वात् । न तृतीयः । अनुपयोगात् । तथा चेदृशे ऐक्ये वाक्यबोधितेपि तत्त्वमसिसिद्धिर्वा ममानिष्टं वा नेति भावः । तत्त्वमसीत्यत्र शक्त्या विशिष्टैक्यस्य लक्षणयामुंडि-

द्वितामनूद्यैक्यमेव यदि वाक्येन बोध्यते । मुण्डितैक्येन्ययोर्वैक्ये तत्तदैक्ये च बोधिते ॥ ४ ॥
नार्थसिद्धिस्तवापि स्यान्नाऽप्यनर्थो भयेन्मम । तत्त्वंपदोक्तचिन्मात्र द्वितयस्य परस्परम् ॥ ५ ॥
ऐक्यं चेद्बोध्यते तर्हि द्वित्वबोधोप्यभङ्गलात् । पदाभ्यामुपलक्ष्यत्वपक्षो विक्षोभकृत्तव ॥ ६ ॥
ताभ्यामप्युपलक्ष्यैक्ये न कोप्यतिशयो यदि । तर्ह्युक्त एव दोषः स्याद्यदि व्यावर्तके पदे ॥ ७ ॥

तैक्यस्य । तत्त्वं पदाऽऽवृत्तौ तत्तदिति त्वं त्वमिति तत्तदैक्यस्य च प्रतीत्या संभावितत्वा त्रेधा विकल्पितम् । तत्र लक्षणापक्षे दोषमाह । **तत्त्वमिति** ॥ परस्परं अन्योन्यं । द्वित्वबोधोऽभूदिति । तथा च चिन्मात्रोक्तावपि व्यक्तिद्वयावश्यं भावेन द्वित्वप्राप्त्योक्तदोषानिस्तार इति विक्षोभकृत् । कुत इत्यतस्तत्र विकल्पयति । **ताभ्यामिति** ॥ उपलक्ष्यैक्ये पदाभ्यां तत्तदैक्यात् कश्चिद्विशेषो नाधीयते उताधीयते । आद्ये किमनेनाधिकमाचरितम् । नार्थसिद्धिस्तवेत्युक्तदोषानिस्तार एव । द्वितीये आह । **यदीति** ॥ एकैकगतात्स्वस्वैक्यादिदमैक्यं व्यावर्त्तत इति वाच्यम । तथा चेदं

व्यावर्तकं पदमैक्यमेव द्विविधमसाधयदिति द्वित्वस्याप्रतिद्वन्द्वत्वम् । यतो ब्रह्मणि ब्रह्मणैक्यमिदं च तद्व्यावृत्तमैक्यं भिन्नमासीदिति ॥ नचेत् पदे न व्यावर्तयतश्चेत् । अस्य महावाक्यत्वात्तदर्थोऽपि तयोर्जीवब्रह्मणोरप्रीत्यै । विरोधिद्वित्वसत्त्वेन बाधितार्थस्य च मनः प्रियत्वाभावादिति भावः । उक्तमनूद्यापहसति । एकेति ॥ एकैकजीवेनापि ब्रह्मण ऐक्यं विचार्यमाणे इत्थं नाभूत् । किन्तु ब्रह्मणि ब्रह्मैक्यमेवाभूत् ।

ब्रह्ममात्रगतादैक्याज्जीवमात्रगतादपि । व्यावर्त्यैक्यमिदं द्वयैक्यं कुरुतश्चेद्द्वितापभूत् ॥ ८ ॥
न चेत्प्रागुक्तदोषः स्यान्न स्यात्तव मनीषितम् । महावाक्यार्थतातस्मात्त्वप्रीत्यैव तयोर्ध्रुवा ॥ ९ ॥
एकैकैक्यं च तन्नाभूद्ब्रह्मैक्यं नितरामभूत् । हाहन्तपङ्के पतितमुद्धर्तुं कोऽस्ति पण्डितः ॥ १० ॥
किंवानुवादोऽपि तदा दूष्यो यदि निषेधनम् । निषेधस्य त्वभावेसावनुवादोऽपि वादवत् ॥ ११ ॥
गामानयेत्यादिवाक्येष्वनूद्यागौरगौर्नहि । यद्यैक्यमेव द्वित्वस्य निषेध इति मन्यसे ॥ १२ ॥
कार्यकारणरूपत्वाद्गुणत्वादुभयोरपि । द्वित्वाभावानात्मकं तत्कथं द्वित्वं निषेधति ॥ १३ ॥

यतो ब्रह्मणः स्वैक्यस्य जीवैक्यस्य च व्यावर्तकेन परस्परं व्यावर्तितत्वात् । पङ्कमग्नम् । कथमत्र वक्तव्यमिति विचारपङ्कमग्नम् ॥ १० ॥ द्वितामनूद्येति । पूर्वोक्तद्वित्वानुवादः एवमेव वा निषेधाय यदि विकल्प्याभ्यां दूषयति किंवेति ॥ किंचेत्यर्थः यदि निषेधनं क्रियते तदैवानुवादो दोषाय । प्रकृते निषेधाभावादनुवादोऽपि वादवन्मान्य इतिभावः । यथा गोरनुवादमात्रेण नागोत्वं भवति । तथानुवादमात्रेण द्वित्वं

न हीयत इति ' ऐक्यमेव निषेधोऽस्तीति शङ्कते । **यदीति** ॥ ऐक्यस्य द्वित्वविरोधित्वेन निषेधकत्वं वाच्यम् । तत्र विरोध एवकथम? परस्परविरहव्याप्यतया वा । तद्व्यापकतया वा । परस्परविरहात्मकतया वा केवलं विरुद्धस्वभावत्वादेव वा । नाद्यद्वितीयौ । कार्य-कारणभावापन्नत्वेन परस्परविरहव्याप्यत्वव्यापकत्वयोरभावात् । कार्यकारणभावश्च द्वित्वस्यैकत्वविशिष्टविषयकापेक्षाबुद्धिजन्यत्वात् । न तृतीयः । द्वित्वैकत्वयोरन्योन्यविरहानात्मकत्वात् । नापि चतुर्थः । तयोरपि गुणत्वेन समत्वेन स्वरूपतोप्य विरोधादितिभावः ॥ १३ ॥

अर्थाच्च बाधकं नैक्यं यद्द्वित्वेन सहस्थितम् । सहानवस्थिते गोत्वाश्वत्वादौ स्यादियं गतिः ॥ १४ ॥
इहत्वसाबहमिति यदैक्यस्य प्रमा भवेत् । अपेक्षाबुद्धिजं द्वित्वमपि तत्र तदैव हि ॥ १५ ॥
एकाभावेन नियता यत्सत्ता तेन तत्परम् । सहानवस्थितं प्राहुर्नत्विमे यत्सहस्थिते ॥ १६ ॥
अन्यथा मुण्डितैक्यं तन्मुण्डयेद्धि शिरस्तव । एवं चेद्द्वित्वमप्येते तत्कथमैक्यमिदं क्षिपेत ॥ १७ ॥

सहानवस्थितयोरेव एकसत्वप्रतीतौ अपरसत्वप्रतीत्यभावरूपो बाध्यबाधकभावः न सहस्थितयोः द्वित्वं च सहस्थितमित्याह । **अर्थादिति** ॥ सहस्थित्यन्यथानुपपत्तिरूपात् । सहस्थितिमेवोपपादयति । **इहेति** ॥ असौ अहमितिप्रतीतेरपेक्षाबुद्धिरूपत्वात्तत्कार्यमपि द्वित्वं तदा दुर्निवारमिति । क तर्हि सहानवस्थानमित्यत उपपादयति । **एकेति** ॥ इमे द्वित्वैकत्वे ॥ १६ ॥ अन्यथा अबाधितद्वित्वसत्वेप्यैक्योक्तौ । मुण्डितैक्यं बाधितैक्यं । शिरो मुण्डयेत् । बाधितार्थकथकस्य तव मतिशून्यतां प्रकटयेत् । यदि द्वित्वमैक्यसहस्थितमितिस्यात् स्यात्तदा

॥ ५१ ॥

तयोरविरोध इति तत एव बाधकाभावात् कथमिदं मयोच्यमानमैक्यं निराक्रियत इति शङ्कते । **एवं चेदिति** ॥ धिङ्मं नः समीहितमिति हर्ष मागा इति साहित्यमुद्रयाह । **सत्यमिति** ॥ नाहं करोमि अहमित्यभिमानं स्वात्मनि न करोमि । त्वां च न त्वं करोमि । न धिक्करोमि । आत्मानमुच्चतया त्वां नीचतया न जानामीति भावः । त्वं च स्वात्मन्यहमित्यभिमानं माकुरु । ममत्वं कुरु । नेत्यनुषज्यते ।

इति चेच्छङ्कसे सत्यं शङ्क्यं न भयङ्करी । नाहं करोम्यहं क्वापि नत्वां च त्वं करोम्यहम् ॥ १८ ॥
त्वं च नाहं कुरु सदा ममत्वं कुरु संसदि । वाग्धेनुः पश्य नानार्थान्दोग्ध्री स्वर्धेनुवन्मम ॥ १९ ॥
इमां रम्यतमां ध्यायन्भ्रमं नैमि श्रमं च न । अपेक्षा बुद्धिजं द्वित्वमप्यैक्यप्रत्ययायते ॥ २० ॥
यतो युक्तिबलात्प्राप्तं तत्सहैव स्थितिर्ध्रुवा । सहस्थितमिदं द्वित्वं विरुद्धाकारधर्मिणोः ॥ २१ ॥
मुख्यत्वात्सिंहनरयोरिव मुख्यैक्यमोचकम् । सामानाधिकरण्याच्च सादृश्यैक्य सहस्थितम् ॥ २२ ॥

संसदि विद्वत्सभायां । नानार्थान् वक्ष्यमाणरीत्या । इमां वाग्धेनुं । त्वास्माकंच क्रमेण विरुद्धाविरुद्धाभिलषितार्थदातृत्वेन रम्यतमाम् । श्रमं च नैमि । त्वद्वत् उत्तरास्फुरणेनदिग्भ्रमं स्वेदादिदेहविकारं वा नैमीत्यर्थः । उत्तरं वक्तुं तयोः सहस्थितिमेव साधयति । **अपेक्षेति** ॥ यतो जीवो ब्रह्म चैकमिति व्यक्तिद्वयमुद्दिश्यैवैक्यप्रतीतिस्ते भवति । अत ऐक्यप्रतीतये द्वित्वमप्युक्तरीत्या युक्तया प्राप्तं तत्तस्मात्तयोः सहस्थितिर्ध्रुवा । यद्यप्येवं तथापि विरुद्धाकारवतोर्धर्मिणोरैक्यसहस्थितमिदं द्वित्वं मुख्यमिति मुख्यैक्यस्य मोचकम् । समानविभक्तिकपद-

बोध्यत्वात्सादृश्यैक्यसहस्थितमिति । अयमाशयः । द्वित्वमैक्यं च द्विविधं । मुख्यामुख्यभेदेन । तत्र द्वित्वं मुख्यं चेत् मुख्यमैक्यं मोचयति । ऐक्यं मुख्यं चेन्मुख्यं द्वित्वं मोचयतीति । अमुख्यद्वित्वस्यस्थलं दर्शयति **यदीति** ॥ रामकृष्णादिभगवद्रूपेषु यदैक्यप्रतीतये उद्देश्यव्यक्तिगतं

यदि चैकीभूतराम कृष्णादिभगवत्तनौ । ऐक्यस्यैव प्रत्ययायद्वित्वापेक्षां च शङ्कसे ॥ २३ ॥
तत्रापि नित्यसमयोस्तयोर्वैषम्यमूलभूः । अत्युग्रमेतद्द्वित्वं न तत्कस्यैक्यसहस्थितिः ॥ २४ ॥
द्वित्वं च द्विविधं दृष्टं मुख्यं चामुख्यमेव च । तथैवैक्यं द्विःप्रकारं मुख्यामुख्यतयैव हि ॥ २५ ॥
पृथुबुध्नोदराकारो यो घटस्तद्विलक्षणः । यश्चातानवितानात्मा पटस्तद्भातु याद्विता ॥ २६ ॥
मुख्यासाभेदसचिवा मुख्यैक्यं न तयोर्द्वयोः कदापि सहते सैव मुख्यैक्यक्षपणक्षमा ॥ २७ ॥
सादृश्यैक्यं तु सह ते द्रव्यत्वाद्यैः स्वधर्मिणः । यत्रैक्यं रामकृष्णादिभगवद्रूपयोर्द्वयोः ॥ २८ ॥
नेह नानेति मानोक्तं तन्मुख्यैक्यं विदुर्बुधाः । तच्च मुख्यद्वितां क्षेमुमलं या भेदसाधिका ॥ २९ ॥

द्वित्वमावश्यकमिति तदपेक्षां तत्रापि भवान शङ्कसे यदीति भावः । वैषम्यमूलभूः । विषमत्वं भेदः । अत्युग्रमैक्यासहिष्णु एतत् । मुख्यं । तत् । तस्मात् । ऐक्यसहस्थितिः कस्य । मुख्यद्वित्वं नेत्युक्तयाऽमुख्यद्वित्वस्यैवेति सिद्धयतीति भावः । सर्वमिदमैक्यद्वित्वयोर्द्वैविध्ये स्यादित्यतस्तदेव दर्शयति । **द्वित्वमिति** ॥ मुख्यैक्यं कदापि न सहते इति यो जनः । सादृश्यैक्यं तु मुख्यद्वित्वेन सहस्थितिं सहते द्रव्यत्वाद्यैरिति सादृश्यनिरूपणम् । मुख्यै-

क्यस्थलमाह । **यत्रेति** ॥ या मुख्यद्विता ऽत एव भेदसाधिका । तां मुख्यद्विताम् । कांचित् । अमुख्याम् । केनचित् । विशेषेण । तद्बलादेव । विशेषबलादेव । तयोरमुख्यद्वित्ववतोः । ऐक्यप्रमा । मुख्यैक्यप्रमा ॥ ३० ॥ भेदप्रतिनिधिविशेषदृष्टांन्तेन द्वित्वद्वैविध्यमनुभावयति । **यथेति** ॥ इदं प्रतिनिधिद्वित्वम् । तत्तु मुख्यद्वित्वम् । भिनत्ति । उपमर्दयति । अत्र प्रमाणमाह । **बह्विति** ॥ महाभारततात्पर्यनिर्णयप्रथमा-

अभेदसचिवां कां चिद्द्विितां केनचि दर्पिताम् । सहते तद्बलादेव तयोरैक्यप्रमा किल ॥ ३० ॥
यथा भेदप्रतिनिधिर्विशेषो विष्णुमूर्तिषु । द्वित्वादिप्रतिनिध्यन्यद्द्वित्वाद्यं तद्वदस्ति हि ॥ ३१ ॥
इदमैक्यसहं तत्तु भिनत्त्यैक्यं स्वधर्मिषु । बह्वूपमोभूदिति वागिहमानं महात्मनाम् ॥ ३२ ॥
यदीदं मुख्यमैक्यं स्यात्तदा द्वित्वं गतं मम । यदि मुख्या द्वितेयं स्यात्तर्ह्यैक्यं ते प्रमर्दयेत् ॥ ३३ ॥
तद्बलाबलचिन्तायां यो बलीयान्स जेष्यति । यः सर्वज्ञ इति श्रुत्या सर्वज्ञत्वं हरौ श्रुतम् ॥ ३४ ॥

ध्यायगतं वाक्यमिदम् । सृष्टिप्रकरणे स्वभावत एव बहूनां जीवानां उपमायस्य सः । वस्तुतः बहुत्वं जीव एव । न परात्मनि । तत्र बहुत्वं विशेषकृतमेवेति । परः बहूपम एव न तु स्वतो बहुरिति तदर्थः । अनेन परमात्मनि मुख्यबहुत्वाभावः अमुख्यं बहुत्वं सिध्यतीति द्वित्वात्मनतिभिन्न बहुत्वे प्रमाणतयोपन्याससंगतिः । बलिनः जय इति सर्वसिद्धमेव । प्रकृते किमायातमित्यत आह । **य इति** ॥ 'यः सर्वज्ञः स सर्ववित्' । इति श्रुत्या श्रुतम् । 'बहूनि मे व्यतीतानि जन्मानि तव चार्जुन । तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप' ।

इति गीतास्मृत्वा । तत्र हरौ । तत् सार्वज्ञ्यं । स्मृतम् । **तन्मूलीभूतेति** ॥ 'मनसाध्यातमेवार्थं वदयुः सर्वसज्जना' इति न्यायात् । एवं जीवस्याल्पज्ञत्वेऽपि प्रमाणमाह । **जीवेष्विति** ॥ ३६ ॥ 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते' । इति माण्डूक्योपनिषदि । **य इति** ॥ 'योऽविद्ययान्धः स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः' । इति भागवते एकादशस्कन्धेअ० ११ । तत् अल्पज्ञत्वम् । युक्तया । जीवोल्पज्ञः

तान्यहं वेद सर्वाणीत्याह तत्र स्मृतिश्च तत् । तन्मूलीभूतभगवत्प्रत्यक्षं च तदीक्षते ॥ ३५ ॥
जीवेष्वल्पज्ञता तत्तत्प्रत्यक्षेण निरीक्ष्यते । नत्वं वेत्थेति गीता च जीवेष्वल्पज्ञतां जगौ ॥ ३६ ॥
अनादिमायया सुप्त इत्यज्ञत्वं श्रुतिर्जगौ । यो विद्ययान्ध इति च प्रोक्तं भागवते च तत् ॥ ३७ ॥
नित्यमुक्तत्वबद्धत्वयुक्त्या चा नुमिते हि ते । इत्यादिमानशतकैरत्युपोद्बलितं मम ॥ ३८ ॥
द्वित्वं वा मुख्यतामर्हेत्सर्वैरेतैः प्रमर्दितम् । सहायशून्यमैक्यं वा मुख्यं स्याद्बुधसंसदि ॥ ३९ ॥
अद्याप्यसिद्धं सन्दिग्धमैक्यमध्यक्षबाधितम् । मानानीमानि तत्सिद्धविरुद्धाकारमेतयोः ॥ ४० ॥
भेदं च भेदसचिवं मुख्यं द्वित्वं कथं क्षिपेत् । किन्तु द्वित्वमिदं व्याघ्रवदनोग्रदोषमम् ॥ ४१ ॥

नित्यबद्धत्वात् । ईश्वरो वा सर्वज्ञः नित्यमुक्तत्वादिति युक्तया । व्यतिरेकेण परस्परवदिति । एतैः प्रत्यक्षादिमानैः । प्रमर्दितं । बाधितम् । अत एव सहायशून्यम् । मानानीमानीति द्वितीया । क्षिपेदित्युत्तरत्रान्वयः सर्वेषाममीषां द्वितीयांतानाम् । तत्सिद्धं मानसिद्धम् । आकारं सार्वज्ञाल्पज्ञते ।

कथम्। न कथमपीति भावः। इदं मुख्यम्। अत एवोत्तरदोषमम्। बहुमानसिद्धत्वाद्व्याघ्रेत्यादि विशेषणं। हरिणीम्। मानशून्यत्वेन कातरत्वात्। अतएव सर्वमानसिद्धमुख्यद्वित्वस्योक्तरीत्यैक्यासहिष्णुत्वादेव ॥ ४४ ॥ निगमयति **तस्मादिति** ॥ द्वितयं द्वित्वं। मुख्यत्वद्योतनाय **नीचोच्चेति** ॥ तव निर्विशेषवादिनः। अमुख्यद्वित्वेनापि भगवति तत्सहमैक्यं वक्तुं न शक्यत इत्याह। **निर्विशेषेति** ॥ तथा च भगवद्रूपेष्वपि **तवैक्यो-**

मुख्यैक्यहरिणीं तेऽज्ञ भक्षयेन्नात्र संशयः। श्रौततत्त्वंपदद्वन्द्व सामानाधिकरण्यतः ॥ ४२ ॥
अमुख्यैक्याख्यशशकशिशुकं शोषयेत्परम्। अनुवादबलं पश्य यस्याग्रे मूकता द्विषाम् ॥ ४३ ॥
अत एव द्वासुपर्णेत्यादौ मुख्यैक्यखण्डने। जीवेशयोर्द्वित्वमेव श्रुतिर्युक्तिमचीकथत् ॥ ४४ ॥
तस्मान्नीचोच्चचिन्निष्ठद्वितयं बलवत्तरम्। मुख्यैक्यं मोचयेत्सादृश्यैक्यं च स्थापयेद्बलात् ॥ ४५ ॥
निर्विशेषब्रह्मवादे भगवद्रूपयोरपि। विशेषोपहितद्वित्वाभावादैक्य कथा गता ॥ ४६ ॥
अन्यत्र च द्वित्वसत्त्व मर्दितैक्यशिशोस्तव। गर्भस्रावेणैव नाशा दासीदैक्यं न कस्य चित् ॥ ४७ ॥
तद्वृद्धिमिच्छतां मूलहानिर्हन्ता भवत्तव। भेदासहिष्णु यदभूदैक्यमेवाष्टमो रसः ॥ ४८ ॥

त्तयसंभवे मुख्यद्वित्ववत्त्यन्यत्रैक्योक्तिर्न घटत इति किं वक्तव्यमिति भावः ॥ ४७ ॥ वृद्धिमिच्छतः। जीवैक्यमिच्छतः मूलहानिः ब्रह्मरूपेष्वपि तदैक्यासिद्धिः। कुत इत्यत आह। **भेदेति** ॥ उक्तरीत्या भेदासहिष्णु। मुख्यं। क्वापि न संभवतीति भावः ॥ ४८ ॥ अहमादिपदस्य

मुख्यतो भगवद्वाचित्वात् । तदैक्यं ममेष्टमेवेति श्रुतेरर्थान्तरं वक्तुं पीठमारचयति । **किंचेति** ॥ लयेषु प्रतिलयं । यतोऽनादिरतः स्यात् । **पुंयोगः** हरीतरपुरुषसंबन्धः नित्येऽपौरुषेये । तस्य प्रसिद्धस्य जगतःआदितः सृष्टेरादौ । यः स्थाता उर्वरितः । अथवा तस्य वेदस्य यः स्थाता । अन्तर्णीतण्यीच् । सर्गलयादिषु स्थितिहेतुः । स एव तमनुसंधत्ते । योनुसन्धत्ते तदा स एवार्थः स्यात् । अन्यस्याभावात् । समौ । नित्यः शब्दश्चेदर्थोपि तादृशः स्यात् । अपरो न । अनित्यत्वान्मुन्यादेः प्रलयेप्रवाहतोप्यभावाच्च । अत्र यद्यपि नित्यवेदस्य स्वरूपतोऽनित्योऽपि प्रवहणादिरर्थः प्रमितः ।

किंचानादिरयं वेदः स्याद्धि ब्रह्मलयेष्वपि । अहमादिपदार्थस्तु कस्तदा स्याद्विचारय ॥ ४९ ॥
पुंयोगो नास्ति नित्येस्मिन्यस्तु वक्ताऽऽदितः पुमान् । अहमादिपदार्थश्च स एवेति मतिर्मम ॥ ५० ॥
वेदः सर्गे लये चास्ति तस्य सर्गलयादिषु । यः स्थाता सोनुसन्धाता स एवार्थो भवेदृध्रुवम् ॥ ५१ ॥
शब्दार्थौ यत्समौ प्राहुस्तन्मुख्यार्थो परोस्य न । नारायणाज्जगन्नाथात्स्मृतिश्चाह तमेव हि ॥ ५२ ॥
मां विधत्तेऽभिधत्ते मामित्याद्या श्रुतिसम्मता । वेदश्च शब्दराशीनां स्पष्टं मुख्यार्थरूपिणम् ॥ ५३ ॥

तथापि तदादे राज्ञः प्रवाहनित्यतामूरीकृत्यवेदवाच्यत्वं समर्थयन्ति मीमांसकाः । ततश्च यथाकथंचिदर्थस्य नित्यत्वमुपेत्यैव वेदवाच्यत्वाङ्गीकारेण नित्यस्या नित्योऽर्थो नतिज्ञायत इति न दोषः । हरिरेवाहमार्थ इत्यत्र प्रमाणमाह । **स्मृतिरिति** भागवतम् । 'मां विधत्तेऽभिधत्ते मां विकल्प्योपोह्य इत्यहम् । इत्यस्याहृदयं साक्षान्नान्योमद्वेद कश्चने'ति । श्रुतिसंमता । परमाप्तसर्वज्ञ व्यासोक्तत्वेन प्रामाण्यात् । श्रुतिसम्मता श्रुतिसदृशी । अथवा

श्रुतिसंमता। वक्ष्यमाणश्रुतिसंवादिनी। तामेव श्रुतिमाह। **वेदश्चेति** ॥ वेदश्च आहेत्यन्वयः। 'नामानि सर्वाणी'त्यादिरूपः। तस्मात्। भगवत एव मुख्यार्थत्वस्य श्रुतिस्मृतिप्रतिपाद्यत्वात् ॥ ५४ ॥ तदा परमात्मवाचित्वदशायां। योग्यममुख्यद्वित्वं। योग्येन मुख्यैक्येन। अन्येषामहमाद्यर्थत्वाभावे युक्तिमाह। **तद्वाक्यस्येति** ॥ अनित्यत्वान्नित्यवेदपदार्था नेति कथंचनामुख्यतयाऽर्थाः स्युरिति भावः। तदेवाह। **हर्याज्ञयेति** ॥ यः ऋषिः। माभूदर्थः। अभावा-

तस्माद्ब्रह्माहमित्यादि वाक्यस्थाहंपदोदितः। स एवाभूत्तस्य मुख्यमैक्यं चास्तु न मेक्षतिः ॥ ५४ ॥
द्विता तदा त्वमुख्या तु योग्यं योग्येन युज्यताम्। तद्वाक्यस्यानुवक्तारस्तद्दृष्टागमदर्शिनः ॥ ५५ ॥
अनित्या नित्यवेदस्थपदार्थाः स्युः कथंचन। हर्याज्ञया त्वमुख्यार्थास्ते मुख्यैक्यस्य नोचिताः ॥ ५६ ॥
माभूद्यः पूर्वकल्पेर्थो भाविकल्पे भवेच्च न। मध्ये तस्यार्थता या तु सा तुच्छेति मतिर्मम ॥ ५७ ॥
सर्वराज्याधिपो राजा तत्रान्यमधिकारिणम्। एकैकांशेषु कुरुते हरते च निजेच्छया ॥ ५८ ॥
महाराजस्य वा राज्यं त्यक्तदत्तपदस्य वा। इतोऽप्यहं ब्रह्मतोक्तरर्थो नागन्तुको मुनिः ॥ ५९ ॥
योभूत्पूर्वलयेप्यर्थो योर्थो भाविलये भवेत्। मध्ये तस्यैवार्थता या सायुक्तेवेति मे मतिः ॥ ६० ॥

देव। न भवेत्। नष्टत्वादेव। **सा तुच्छेति** ॥ पूर्वोत्तरकल्पयोरन्यार्थत्वेऽवश्यवाच्ये मध्येपि सतस्तस्यार्थतया परित्यागः नोचित इति भावः ॥ ॥ ५७ ॥ अत्र लौकिक दृष्टान्तमाह। **सर्वेति** ॥ अहमादिपदानां हर्यर्थकत्वे युक्तयन्तरमप्याह। **इतोऽपीति** ॥ वक्ष्यमाणन्यायादपीति भावः ॥

॥ ५९ ॥ ६० ॥ कुत इत्यत: साहित्यमर्यादामङ्गीकृत्याह । **यदेति** ॥ मुख्यार्थयात्रायां स्वस्या अपि मुख्योयोर्थ: हरिस्तं प्रतियात्रायां । पदद्वयं । चरणद्वन्द्वं गमनाय प्रेरयेत् । तदा पतिभक्तिपरायणा सा रमा नान्यसमीपं गच्छेत् । अतो मुख्यैक्यमेव वक्ति । पदद्वयमहं ब्रह्म इत्यादि पदद्वयमित्यप्यर्थ: । मुख्यार्थयात्रायामित्यस्य हरिप्रार्थनादशायामित्यप्यर्थ: । तथात्वेवाऽन्यं प्रति गमनेनान्यं प्रति याच्ञया वा

यदा मुख्यार्थयात्रायां प्रेरयेत्स्वं पदद्वयम् । तदा मुख्यैक्यमेव श्रीर्वक्तिप्राणेशरूपयोः ॥ ६१ ॥
पतिव्रताशिरोरत्नभूता द्विपति शङ्कया । यदा तु मुनिनान्येन गृहीतैकपदाभवेत् ॥ ६२ ॥
मुख्यैक्यं न तदा दद्याद्दृग्याद्दृशतादृशम् । स्वपुत्रमुनिनाभर्तुरैक्ये पुत्रांगसङ्गिनी ॥ ६३ ॥
भवेयमिति भीतासीन्निरवद्यशिरोमणि: । विशेषशक्त्या प्राप्तं यद्दित्वमैक्यसहिष्णु च ॥ ६४ ॥
हरिरूपेष्वभेदोक्त्यै तदगत्या सहायकृत् । इहत्वतिविशेषोऽस्ति यो भेदस्यैव साधक: ॥ ६५ ॥
अपूर्णत्वसुपूर्णत्वविभुत्वाणुत्वपूर्वक: । सोऽयं स्वधर्मिणोर्जीवपरयोरेकरूपताम् ॥ ६६ ॥

लोकस्य मयि द्विपतित्वशङ्का स्यादिति भीता । कदैवं शङ्केत्यत आह । **यदेति**॥गृहीतैकपदेति । एकपदस्य यदि मुन्यादिरर्थ: स्यादिति भाव:॥ ॥ ६२ ॥ तदा मुन्यर्थकत्वे । यादृशतादृशं सादृश्याद्यमुख्यैक्यम् । मुनिहर्योरैक्यमहमादिपदेन शंक्यमपि नेत्यत्र हेतु: मुने: पुत्रत्वं हरेर्भर्तृत्वम् । हरिरूपेष्वभेदोक्त्यै सहायकृद्दित्वं विशेषप्राप्तं प्रतिनिधिभूतमेव । इह तु मुन्यादौ । अतिविशेष: । पूर्वोक्तप्रमाणप्रमितविरुद्ध-

धर्ममूलकमुख्यद्वित्वम् । विरुद्धधर्मोवा । तमेव विशिष्यदर्शयति । **अपूर्णत्वेति** ॥ सोयं विरुद्धधर्मः उपपत्तिरूपत्वात् श्रुतिमर्थान्तरे क्षिपेदिति योजना । अर्थान्तरे सादृश्यादिरूपे । एकरूपतां मुख्यैक्यम् । तदनुगं विशेषममुख्यं द्वित्वं । अत एवैक्योपमर्दितम् । इदं सर्वं बहिष्कृत्येत्यन्वयः । बलवत्तरं मुख्यं ॥ ६७ ॥ स्वत एव जीवेशचितोरसमर्थसमर्थत्वरूप विरुद्धधर्मवत्वं प्रमाणैः साधयति । **अपिचेत्यादिना** ॥

ऐक्यानुगं विशेषं च द्वित्वं चैक्योपमर्दितम् । बहिष्कृत्यात्यन्तभेदं द्वित्वं च बलवत्तरम् ॥ ६७ ॥
स्थिरीकृत्योपपत्तित्वाच्छ्रुतिमर्थान्तरे क्षिपेत् । अपि चा नादितो देहि देहेष्वेव स्थितापि या ॥ ६८ ॥
भवजक्लेशराशीनामुच्चाटनपटीयसी । अनश्नन्नन्य इत्युक्तदुःखा ऽभोक्तृत्वतः सदा ॥ ६९ ॥
अभितश्चाकसीतीति तस्यामेवार्चया स्तुता । मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ ७० ॥
न हन्यते देहगतोऽपि दोषैर्दुःखैर्न दैहिकैः । क्व शोकमोहौ स्नेहो वा भयं वाथ ऽज्ञ सम्भवाः ॥ ७१ ॥
क्व चाखण्डितविज्ञानज्ञानैश्वर्येश्वरोऽजितः । एवं भागवते पार्थनारदाद्यैश्च या स्तुता ॥ ७२ ॥

न शंशय इत्यन्तेन । **अनश्नन्निति** ॥ 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योभिचाकशीती'त्यथर्वणी श्रुतिः । **मायांव्युदस्येति** भागवते प्रथमे पार्थवाक्यम् । 'त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः' इति पूर्वार्धम् । न हन्यत इत्यनेन 'कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोपि दैहिकैः' । इति पञ्चमस्कन्धगतं नारदवाक्यं संगृह्णतो कर्तापि देवदत्तवद्यो न बध्यते । देहगतोऽपि देहसम्बन्धिभिर्दोषैर्न हन्यत इति।

'द्रष्टुर्न दृश्यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे'। इत्युत्तरार्धम्। **क्व शोकमोहाविति** भागवतदशमोत्तरार्धगतं ऋषिवाक्यम्। **ईश्वर इति** गीतावाक्यम। श्रुतौ। पूर्वोदाहृतायाम्। स्वाद्वतीत्यत्राऽत्तोत्युक्ता। सा स्वभावादसमर्था ॥ ७५ ॥ परन्यायेनापि चितोः शक्तता शक्तते साधयति। **चिन्मात्रेति** ॥ तव मते चिन्मात्रगतमप्यज्ञानमुपाधिः किल। प्रतिबिम्बो जीवः किल। उपाधेः प्रतिबिम्बपक्षपातिता च

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ७३ ॥
इत्थं गीतासु च प्रोक्ता यास्तुतेव स्थले स्थले। स्वभावादेव सा ब्राह्मी चित्समर्था न संशयः ॥ ७४ ॥
जैवीचित्वखिलक्लेशराशीनात्माप्रियानपि। अनादितोऽपि या भुङ्क्ते तयोरन्य इति श्रुतौ ॥ ७५ ॥
यात्तोत्युक्ता सा स्वभावादसमर्था न संशयः। चिन्मात्राश्रितमज्ञानमुपाधिः किल ते मते ॥ ७६ ॥
प्रतिबिंबे पक्षपातस्तस्येत्यपि मत तव। प्रतिबिम्बं च जैवी चित्तस्मादज्ञानसम्भवम् ॥ ७७ ॥
दुःखं च जीवचिद्भोग्य न तु योग्यं जडेशयोः। कथं चित्स्वामिता दुःखे न स्याज्जीवचितो यदि ॥ ७८ ॥
न प्रेरयेत्तदा स्वोरस्ताडनाय करौ स्वकौ। मिथ्याभूता च दुःखस्य भोक्तृता न चितो यदि ॥ ७९ ॥

मता खलु। अतोऽज्ञानसम्भवं दुःखं जीवस्यैव योग्यं भोग्यं नेतरस्येति स्वद्रोक्तैव प्राप्तम्। जीवे दुःखित्वानभ्युपगमे बाधकमाह। **कथंचिदिति** ॥ कथंचित् व्यावहारिकमपि। **न प्रेरयेदिति** ॥ उरस्ताडनस्य दुःखकार्यत्वादिति भावः। बाधकान्तरमप्याह। **मिथ्येति** ॥ असत्यदुः-

दुःखानुभवजन्या विषयविरक्तिः । यद्यनुभवो जीवस्य नास्ति तदा कारणाभावाद्विरक्तिरपि सा न स्यात् । तथा च जैवीचित् मुक्तये नयते तचेति । तद्यत्नस्य विरक्तिसाध्यत्वात् । न हि विषयासक्तो मुक्तयेयतते । तथा च मोक्षवति जीवे दुःखादिभोगरूपबन्धाभावे बन्धमोक्षयोः सामानाधिकरण्यं च न स्यादिति भावः ॥ ८० ॥ उक्तमुपसंहरति । त्वदिति ॥ त्वदन्यायेनैवासमर्था किं नाभवदिति योजना ।

तर्हि नास्याविरक्तिः स्यान्मुक्तये च न यतेत सा । सामानाधिकरण्यं च नस्याद्बन्धविमोक्षयोः ॥ ८० ॥
त्वदन्यायादपि स मर्त्या सामर्थ्ये तच्चितोर्द्वयोः । दुःखं च दुःखहेतुं च देहान्तः करणादिकम् ॥ ८१ ॥
अज्ञानपक्षपातं च ब्रह्मणो चिदिव जीवचित् । यतः स्वतोऽनादितोऽपि बहिष्कर्तुं न शक्नुते ॥ ८२ ॥
अतः स्वमायादेयंगमसमर्थाभवन्न किम् । मायां व्युदस्य चिच्छक्त्येत्युक्ताज्ञानविधूननम् ॥ ८३ ॥
अधूननं च चिच्छक्त्या तदशक्त्या च नान्यतः । नर्ते त्वत्क्रियते किंचिदित्युक्तेश्वरसम्पदम् ॥ ८४ ॥
जडेषु कः प्रमान्कुर्याद्विना सांख्यकुमारकान् । अज्ञानस्यैव सामर्थ्याद्यदि जीवचितः स्मृतिः ॥ ८५ ॥

यतो ब्रह्म चिदिव जीवचित दुःखादिकमनादितः स्वतः बहिष्कर्तुं न शक्नुते । अतो ऽसमर्थेति हेतुहेतुमद्भावः । दोषनिर्हरणशक्तिः सर्वाप्यज्ञानस्यैव न चित इति परोक्तं दूषयति । मायामिति ॥ इति स्मृत्या विधूननं चिच्छक्त्या ऽधूननं चिदशक्त्या जडादितोनेत्येव वाच्यम् । यतः 'न ऋते त्वत्क्रियते किंचना' इति श्रुत्यधिभूयमाणत्वात् । न चेत्प्रकृतेरेव जडायास्सर्वकर्तृत्वं वदतः सांख्यस्य मतप्रवेशः स्यादिति भावः । तुल्यम्

न्यायेनाऽज्ञानस्यैव सामर्थ्याभ्युपगतावपि तदुशमीयुषी जीवचिदसमर्थाऽज्ञानशक्तिरस्कर्त्रीश्वरचित्समर्थेति त्वयैवोक्तप्रायमिति व्यर्थोयं दुराग्रह इत्याह । **अज्ञानस्येत्यादिना** ॥ रीत्यन्तरेणाप्यज्ञानस्य सामर्थ्यं प्रकटयति । **किंचेति** ॥ अनाद्यपि तवाज्ञानं यस्य हरेर्ज्ञानं साद्यपि नाशयेत् । यत् यस्मादिति वा । वृत्तिरूपं यज्ज्ञानमिति वा । तस्माज्ज्ञानाज्ञानयोर्मध्ये ज्ञानस्यैव समर्थत्वम् । सर्वैरर्थ्यमानत्वाच्च ज्ञानं

तथापि सा समर्थान यतोस्य वशमीयुषी । तच्छक्तेश्च तिरस्कर्त्री नित्यमुक्तेश्वरस्य चित् ॥ ८६ ॥
कथं नातिसमर्थाभूद्व्यर्थस्तेभूदुराग्रहः । किंचानादि तवाज्ञानं यज्ज्ञानं साद्यपि क्षिपेत् ॥ ८७ ॥
तज्ज्ञानं वा समर्थं स्यादज्ञानं वा विचारय । असाध्य मोक्षदं ज्ञानं स्वतः सिद्धभवानुगात् ॥ ८८ ॥
तवाज्ञानादपि महत्समर्थं चेति मे मतिः । यदर्थयंते विबुधाः अबुधाश्च मुमुक्षवः ॥ ८९ ॥
सर्वैरर्थ्यमिदं ज्ञानमसमर्थं कथं वद । यद्भक्तिदं मुक्तिदं च तृप्तिदं च प्रभोः सदा ॥ ९० ॥
तत्समर्थतरं मन्ये मिथ्याऽज्ञानापहर्तृ च । चोरस्य तम एवेष्टं तत्समर्थं वदेच्च सः ॥ ९१ ॥

समर्थमित्याह । **चिदिति** नच्च प्रयोजकं कश्चिदर्थयते दूरे सर्वं इति भावः ॥ ८९ ॥ ऐशचितः सामर्थ्यमनेकधा उपपादयति । **यद्भक्तिदमिति** ॥ यत् यस्मात् । समर्थतरत्वं साध्यमन्यत् सर्वं हेतुः । लोकरीत्या दूषयति । **चोरस्येति** ॥ जगच्चोरस्य मायिनोपि तमः अज्ञानमिष्टं समर्थं च । वयं तु तमः शत्रुं ज्ञानं मानयामः । ईश्वरचितः केमुत्येन समर्थत्वमाह । **ईदृगिति** ॥ यदि ज्ञानमीश्वरविषयकत्वरूपेशसंबन्धादेव ईदृक्सामर्थ्योपेतं महच्च ।

तदेश्वरचितः सामर्थ्यं महत्वं च किमु वक्तव्यमिति भावः । इयता सिद्धमर्थं संकलय्याह । **अत इत्यादिना** ॥ उक्तरीत्या सामर्थ्या-सामर्थ्यरूपविरुद्धधर्मा क्रान्तत्वात् । यत् यस्मात् स्वभावस्य कदापि नाभावः । तत् तस्मात् । उत्तरश्लोकान्वयी । तदेकता तयोरेकता ॥ ९६ ॥ वदन्ती वाक् 'तत्वमस्या'दिवाक् । न च भेदादिकं न हन्ति चेदनर्थकतया स्वात्मानमेव हन्तीति वाच्यम् । एकत्वं वदन्तीत्युक्तया सादृश्या-

ज्ञानिनस्तु तमः शत्रुं मानयन्ति दिवाकरम् । ईदृग्ज्ञानं च यच्चाम्रचरणस्पर्शतो महत् ॥ ९२ ॥
चिद्रूपदेहकरणः स समर्थतमो हरिः । अतो जीवचितोऽज्ञानं भवश्च ज्ञानमेव च ॥ ९३ ॥
भवेयुर्यच्चितः सत्वात्सर्वोच्चोन्याश्रितोधमाः । एवं चानादि संसारभावाभावोपपत्तये ॥ ९४ ॥
चितोरेवोच्चनीचत्वं स्वभावोयममूढलात् । स्वभावस्य च नाभावो यद्भवेन्न कदापि तत् ॥ ९५ ॥
मुक्तौ चैकोदरे न्यस्य प्रवेशो सत्यदृश्यता । क्षीरांतस्थितनीरस्येव स्यान्नतुतदेकता ॥ ९६ ॥
एकतां च वदन्ती वाक् न भेदं हन्ति न क्षितम् । एकांशग्राहि ते ज्ञानमन्यांशे न दयापरम् ॥ ९७ ॥
तथापि ब्रह्मणोन्यांशं जग्रास न कुतो वद । यद्यज्ञानं परिच्छिन्नं व्यासान्यांशग्रहाक्षमम् ॥ ९८ ॥

चैक्यबोधकत्वस्योररीकरणात् । परमुखेनैवाज्ञानस्या शक्ततामीशचितः शक्ततां च वाचयति । **एकांशेति** ॥ जीवब्रह्मरूपांशद्वयमध्ये जीवांशं गृह्णदज्ञानं स्वतः समर्थं चेत् ब्रह्मांशमपि कुतो न जग्रास । न च दयया परित्यागोऽज्ञान्तरस्येति वाच्यम् । जडत्वेन तस्यशून्यत्वात् ।

आशङ्कते । **यदीति** ॥ उत्तरयति **तर्हीति** ॥ ब्रह्मशक्त्यैव व्याप्तस्यांशस्याज्ञानं बहिर्भूदिति भावः । तथाच निगमयति **व्याप्तीत्यादिना** ॥ **तदंशेति** ॥ ब्रह्मांशेत्यर्थः । परिच्छिन्नाज्ञानवशत्वे हेतुः शक्तिरहितत्वमणुत्वं च । अत एवाज्ञानवशत्वादेव ततः । ब्रह्मांशतः ॥ १०० ॥ उक्तविरुद्धधर्मौ संगृह्याह ।व्याप्तीत्यादिना॥ तत इत्युक्तमेव विवृणोति । **यत इति** ॥ सैव मायैव । चक्रे । स्वबशत्वतदभावरूपविरुद्धधर्म

व्याप्तस्य ब्रह्मशक्त्यैव तर्ह्यज्ञानमभूद्बहिः । व्याप्तिनित्य सुखित्वाद्यैस्तदंशस्थबृहद्गुणैः ॥ ९९ ॥
रहितोणुः परिच्छिन्नाज्ञानस्य च वशं गतः । अत एव सदा दुःखी जीवोंशोयं ततः पृथक् ॥ १०० ॥
अणोरेव महत्वं च यतो नास्ति भवन्मते । व्याप्यव्याप्ती सुख दुःख मायामायाविदूरता ॥ १०१ ॥
कथमेकस्य धर्माः स्युस्ततो मायैव ते रिपुः । यतः सैव चिदंशौद्वाविमौ चक्रे पृथक् पृथक् ॥ १०२ ॥
ब्रह्मणोच्छिद्रता गुप्त्यै यच्छोत्रापि मृग्यते । तर्हि तादृश एवैको मृग्योंशो नत्वतादृशः ॥ १०३ ॥
नह्यच्छिद्रपटस्यांशो भिन्नाभिन्नस्वभाववान् । नोचेत्सच्छिद्रमेवास्तु छिन्ननासापुटः पुमान् ॥ १०४ ॥

संपाद्य । **ब्रह्मण इति** ॥ अयमाशयः । जीवो ब्रह्मांश इति वदतापि भवता महापटमध्यादेकस्यांशस्योद्धारे तस्य सच्छिद्रत्ववत् जीवांशस्य ब्रह्मणः सकाशादुद्धारे सच्छिद्रं ब्रह्म यथा न स्यात्तथा वक्तव्यम् । तथा चांशविचारदशायां तादृश एवांशो गवेषणीयः येनान्विष्टेनांशेन ब्रह्म सच्छिद्र न स्यादिति । **भिन्नाभिन्नस्वभाववानिति** ॥ तथा पटस्याच्छिद्रत्वे पृथक् प्रतीयमानांशः कश्चिदत्यन्तभिन्न एव स्यात् । न तु

तदुद्भूतांशवद्भिन्नाभिन्नः । तथात्वे वा पटस्य सच्छिद्रत्वं स्यात् । तथा ब्रह्मणोऽछिद्रत्वाय जीवांशः भिन्न एव मृग्य इति । नोचेत् भिन्नांशानङ्गीकारे । ब्रह्म सच्छिद्रमेवास्तु । छिन्ननासापुटः पुमान् । तत्रत्रणेन ताम्रनासिको भवति । एवं ब्रह्म व्रणयुक्ततया हास्यमभूत्तथा मा कुर्विति मृदुक्तिः तव ब्रह्म ईदृगनेकयातनोपेतं दुष्टं नोपास्यमिति । ब्रह्मांशस्याऽज्ञानदूरतां प्रकारांतरेणाह । **अपिचेति** ॥ तेऽज्ञानं स्वविकारोत्थदेहस्याभ्यन्तरे सदा हृदि गतं भिन्नमंशमेभ्यं कुतो न स्पृशति । न च स्पृशत्येवेति वाच्यम् । 'अनादिमायया' 'क शोकमोहौ' इत्याद्युक्तश्रुतिस्मृतिभ्यां

ताम्रनासिक एवं स्वं ब्रह्महास्यं न कारय । अपि चान्तर्हृदि गतं भिन्नांशं न कुतः स्पृशेत् ॥ १०५ ॥
तेऽज्ञानं स्वविकारोत्थदेहस्याभ्यन्तरे सदा । अज्ञानकार्यं दुःखं च मोहस्नेहादिकं श्रुतिः ॥ १०६ ॥
स्मृतिश्च तत्र नेत्याह कार्याभावे च कारणम् । तस्मिन्नंशे नेति युक्त्या सिद्धमेव विवेकिनाम् ॥ १०७ ॥
मायां व्युदस्येति वाक्यं च विशेषोत्कर्षवाचिना । उपसर्गद्वयेनांघ्रियुगेनेवांशतो हरेः ॥ १०८ ॥
दूरीचकार ते मायां हृद्गोप्यंशस्तदीदृशः । तच्छक्त्या चेत्तदर्थेणुश्च ब्रह्मांशः शक्तितो महान् ॥ १०९ ॥

तदभावोक्तेः । अपि च शोकादिरूपकार्याभावलिङ्गककारणाज्ञानाभावसाधनेनापि तत्सिद्धेः । लिंगस्योक्तागमसिद्धत्वात् । एवं मायामित्युक्तस्मृतिः वि-उत्-इत्युत्कृष्टवाच्युपसर्गद्वयेन तव मायां हरेरंशतः अंघ्रिद्वयेनेव दूरीचकार । हृद्गतोऽत एवाणुः शक्तितो महान ब्रह्मांशः ईदृशः मायाविदूरश्चेत् बाह्यः व्यक्तितो महान्-ब्रह्मांशः तदूर इति किं वक्तव्यम् । यद्वा हृद्गोप्ययमणुर्जीवांशः तच्छक्त्या ब्रह्मचिच्छक्त्या ईदृशश्चेत् मायाविदूरो

भवति चेत् शक्तितो महान् ब्रह्मांशस्तथेति किमु वाच्यमिति भावः । उक्तमुपसंहरति । एवं चेति ॥ तद्गृहीतांशः । अज्ञानगृहीतांशः । बहिः भिन्नः ॥ ११० ॥ तव सर्वाण्यपि महावाक्यान्यस्मदीयद्विता मार्गमानीतवतीत्याह । एवं चेति ॥ उक्तरीत्या युक्तया सिद्धा श्रुत्युपोद्बलिता च । महत्त्वबोधकं ईश्वरस्य महत्त्वबोधकानि यथा स्युः तथा चक्र इतीदं क्रियाविशेषणम् । अतो न वचनव्यत्यासो

एवं च तद्गृहीतांशो ब्रह्मणोंऽशः कथं भवेत् । तस्मादज्ञानशक्त्यैव जीवोऽभूद्ब्रह्मणो बहिः ॥ ११० ॥
हन्ताज्ञानैकशरणस्तेनैव त्वं हतोऽस्यहो । अतः स्वभावसंसिद्धभेदयोर्भिन्नधर्मिणोः ॥ १११ ॥
चिन्मात्रयोर्द्विता चेयं वाङ्मात्रेण न गच्छति । एवं च द्वासुपर्णेति श्रुत्या युक्त्या बलीयसी ॥ ११२ ॥
द्विता भवन्महावाक्यशतानि च रमापतेः । महत्त्वबोधकं चक्रे स्थिरीचक्रे जगत्त्रयम् ॥ ११३ ॥
अतस्तव महावाक्य सर्व भेदस्य साधकम् । बलाद्भूदन्यथैक्यकथेयं स्याद्वृथैव ते ॥ ११४ ॥
मुण्डितैक्यस्य हि ज्ञानं ब्रह्मसम्बन्धवर्जनात् । ब्रह्मप्रमात्वरहितं न हितं ते करिष्यति ॥ ११५ ॥

दोषाय । अथवा वेदाः प्रमाणमित्यत्र एकविधप्रमितिकरणत्वरूपार्थविशेषविवक्षया यथा विधेयवाचकविशेषणपदोत्तरमेकवचनप्रयोगः । तथा सर्वमहावाक्यानां भेदप्रतिपादनद्वारा विष्णोर्महत्त्वरूपैकार्थप्रतिपादकत्वादेकवचनप्रयोगः साधुरिति ज्ञेयम् ॥ ११३ ॥ अतः द्वित्वबलात् । अन्यथा भेदसाधकत्वानङ्गीकारे । वृथा । बाधितैक्यस्य कार्यासाधकत्वात् ॥ ११४ ॥ सर्वानपि धर्मान् लोपयित्वा चिन्मात्रैक्याङ्गीकारे परस्येष्टा-

सिद्धिमाह । **मुण्डितेति । ब्रह्मसम्बन्धवर्जनादिति** ॥ मुण्डितैक्ये चिच्चिदित्येवोक्तं स्यात् । ननु ब्रह्म जीव इति । तथा च तज्ज्ञानं न ब्रह्मप्रमेति ते हितमज्ञाननिवृत्तिरूपं न करिष्यतीति भावः ॥ ११९ ॥ उपजीव्यत्वाच्च द्वित्वस्य ब वत्वमाह । **अत इति** ॥ ऐक्यं वदतापि त्वया किं तस्य तेनैक्यमिति तत्तदैक्यमुच्यते उत द्वयोरैक्यम् । नाद्यः । जीवब्रह्मैक्यासिद्धेरुक्तत्वेन तस्य निष्फलत्वात् । तदिदमाह । **अफलमिति** ॥ साफल्याय द्वयोरैक्यमुच्यते चेत् तर्हि प्राप्ता द्वित्वस्योपजीव्यता । तत एव सा द्विता बलवतीति । द्वित्ववन्तावेव

अतस्तवैक्यमफलं सफलीकुर्वतोश्रितोः । द्वितेयमुपजीव्यत्वादभूदतिबलीयसी ॥ ११६ ॥
उपजीव्यामिमां हन्तुं नोपजीवकमर्हति । मिथस्त्वतिविरूढेऽर्थे द्वितेयं बलवत्तरा ॥ ११७ ॥
अत्यन्तभेदव्याप्तत्वाद्विक्करोति यदेकतात् । सादृश्यैक्याय राज्यं तद्दत्वैक्यं तद्विदार्दितम् ॥ ११८ ॥
आरण्यकं परित्यज्य सनामारण्यकं ययौ ॥ ११९ ॥

चेतनौ ऐक्यमुक्त्वेत्या सफलयत इति सफलीकुर्वतोरित्युक्तम् । उपजीवकमैक्यम् । यस्माद्बलवती द्विता मुख्यैक्यं विक्करोति । तत तस्मात् । द्वित्वार्दितं मुख्यैक्यं उपनिषद्रूपं स्वराज्यं सादृश्यैक्याय दत्वा ययाविति । यथा बलिष्ठैः शत्रुभिरर्दितो राजा शत्रुसहायाऽन्यस्मै कस्मै चित्स्वराज्यं दत्वा स्वयं वनं विशति तद्वत् । आरण्यकं तन्नामकं । राज्यमिति वर्तते । बृहदारण्यकोपनिषदमित्यप्यर्थः । सनामारण्यकम् । उपनिषद्रूपं सत् वनं विवेशेति भावः । सनामेत्यनेन राज्यपरित्यागकालेऽपि तत्र बह्वभिमानात् तत्समाननामधेयमेवान्यत्स्थानं प्रविशतीति ध्वनयति ॥ १२० ॥

॥ इति भाविसमीरश्रीमद्वादिराजपूज्यचरणविरचितन्यायरत्नावल्याः व्याख्यायां प्रकाशसंग्रहाख्यायां तृतीयः सरः ॥

॥ तृतीयसरः समाप्तः ॥

वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः । तृतीयः सुधियां कण्ठालङ्कारं कुरुतेतराम् ॥ १२० ॥

श्रीः ॥ इति श्रीमद्वादिराजपूज्यचरणविरचितायां न्यायरत्नावल्यां तृतीयः सरः ॥ श्रीः

ॐ ॥ श्रीः ॥ गुरूत्तंसो वादिराजः करोत्वंहोनिवारणम् । भिनत्तु मतिदारिद्र्यं युनक्तु सुधियं मयि ॥ १ ॥ पूर्वसरे विस्तरतः 'सर्वं खल्विं'ति श्रुत्वा परेष्टासिद्धिं प्रतिपाद्य इदानीमैक्यप्रतिपादकत्वेन पराभिमतश्रुतिभिरेव परेष्टासिद्धिं दर्शयति । **अद्वितीयेत्यादिना** ॥ **नैक इति** ॥ द्वितीयसामान्यनिषेधेनाऽनेकस्य जगत इवैकस्य जीवस्यापि निषेधात् । न च द्वितीयपदेन जडमेव गृह्यते न चेतन इति नैक-जीवनिषेध इति वाच्यम् । द्वितीयपदस्य स्वेष्टसिद्धिफलकोक्तसंकोचवदस्मदिष्टसंरक्षणाय तत्पदं जडमप्यनूद्य नञा न निषेधतीत्यापातात् ।

श्रीमद्वादिराजगुरुभ्यो नमः ॥ श्रीवेदव्यासाय नमः ॥

अद्वितीयश्रुतेः सत्वान्नैको जीवोऽपि सिद्धयति । स्वेष्टसंरक्षणायास्याः संकोचेऽन्येष्टगुप्तये ॥ १ ॥
जगच्च नाक्षिपेत्किन्तु तस्यासदृशतां वदेत् । त्वमित्युक्तः श्वेतकेतुर्नैकजीवो मते तव ॥ २ ॥
अज्ञानमूलः संसारो न ह्यस्य ज्ञानिनो भवेत् । तेनैकजीवमतिनाममतेयं श्रुतिर्ध्रुवा ॥ ३ ॥

न च तर्ह्यद्वितीयश्रुतेरानर्थक्यं शंक्यम् ब्रह्मणि तत्सदृशशून्यतोक्त्या महिमप्रतिपादकत्वात् । न च पदाबोध्यत्वम् । अयमद्वितीयो राजेत्यादौ असदृशार्थकताया दृष्टत्वात् । 'तत्वमसि' श्रुत्यापि परेष्टासिद्धिं दर्शयति । **त्वमिति** ॥ कुत इत्यत आह । **अज्ञानमूल इति** ॥ हिर्हेतौ । यतो गुरूपदेशादिनाऽयं श्वेतकेतुरैक्यज्ञा वानतस्तदज्ञानमूलः संसारो नोपपद्यत इति भावः । तेन । संसारानुपपत्तिदोषेण । इयं श्रुतिः । 'तत्वमसी'त्यादिका । एकजीवमतिनाम् । तन्मतावलम्बिनाम् । तन्मतमेषामस्तीति विग्रहात् । अमता उक्तार्थवशादसम्मतिदानानर्हा ॥

॥ ६१ ॥

॥ ६ ॥ बहुजीववादिनामपीयं श्रुतिर्नेष्टेत्याह । **एकस्येति** ॥ इयं छन्दोगानां श्रुतिः । बहुजीवैक्यवाचिका नेत्यत्र हेतुः **उक्तित इति** ॥ एकविधिरितरनिषेधफलक इति न्यायेनैकस्यैवैक्योक्तौ बहूनां तन्नेति लभ्यत इति भावः । बह्वैक्यस्यापि लाभप्रकारमाशङ्कते । **एकेति** ॥ बहूनामपि जीवत्वेनैकजीवसाम्यादेकस्योक्तमन्येषामपि इति बहुजीवैकता यदीत्यर्थः । परिहरति । **एकत्वेनेति** ॥ बह्वनुग्रहस्य लोकप्राप्तत्वेनैकतयाऽनुक्तबहुसाम्यादेकोपि तद्वद्बहुजीववन्नैकीभूत इत्येवोक्तः स्यात् । तदा श्रुतिरन्यमर्थं वदेत् । यदि श्रुतिरन्यार्था स्यात्तदा तथैव स्पष्टमनुक्त्वा तत्त्वमि-

एकस्यैक्योक्तितश्चेयं बहुजीवैक्यवाक्च न । एकजीवस्य साम्येन बहूनामेकता यदि ॥ ४ ॥
एकत्वेनानुक्तसुयद्बहुजीवानां प्रबलत्वतः । अयं च तद्वदेवान्यो वाक्यं चान्यार्थतामियात् ॥ ५ ॥
अनुग्रहं यद्बहूनां न्याय्यमाहुर्मनीषिणः । अनूचानत्वाभिमानादहं ब्रह्मेति दुर्धिया ॥ ६ ॥
स्तब्धस्य ज्ञानदानाय तत्त्वमित्याह तं प्रति । इति स्याद्भृतिरस्माकं प्राक्चाहंमानिनां प्रति ॥ ७ ॥

त्युक्तेः का संगतिरित्यत आह । **अनूचानत्वेति** ॥ द्वादशवर्षमधीतीत्यभिमानात् । **ज्ञानदानायेति** ॥ ज्ञानलवदुर्विदग्धानां बालानां मनसि विचारोत्पादाय सर्वज्ञस्त्वमसि किं वक्तव्यमस्तीति कथनं लोकेप्यस्ति । तेन च श्रोतृणां मतिः यत एवमेतं मां भिक्षुर्वन्त्यतः नेदं तत्त्वं किन्त्वन्यदेव स्यात् तच्च ज्ञातव्यमिति विचारपरा जायत इति प्रसिद्धम् । परमत एव गतिर्नास्तीत्याह । **प्रागिति** ॥ पूर्वमेवाहं ब्रह्मेति ज्ञातत्वेन तत् मसीति ते वादः निरर्थक एव । **पौनरुक्त्यादिति** ॥ ज्ञातस्यैव पुनर्ज्ञापनमिति ज्ञेयम् । न तूक्तौ पुनर्भावः

तदभावात । कथं तर्हि वक्तव्यमित्यत आह । **किंत्विति** ॥ सर्वमते । एकानेकजीवमते सर्वैक्यमुपदेष्टुमेवं त्वमेव तद्ब्रह्म न किं तु सर्वे जीवाश्च तद्ब्रह्मेति वदेदिति भावः ॥ ९ ॥ तथा वक्तव्यत्वे हेतुमाह । **यत इति** ॥ अस्य । अज्ञाततयोपदेशार्हस्य सर्वजीवैक्यस्य । **अहं ब्रह्मेति तु** ज्ञातमेवेति भावः । श्रुत्यन्तरेणापि परेष्टासिद्धिमाह । **अहमिति** ॥ इदं बृहदारण्यगतं वामदेववाक्यम् । उक्तवर्त्मना । बहनुग्रहस्य न्यायत्वेनाज्ञातस्यैव ज्ञापनीयत्वेन चेत्यर्थः ॥ ११ ॥ वाक्यान्तरेणाप्यैक्यं दूषितमित्याह । **नैतदिति** ॥ अनेन 'नैतदिच्छन्ति पुरुष-

त्वं ब्रह्मेति तु वादस्ते पौनरुक्त्यान्न शोभते । किन्तु त्वमेव तन्नासि सर्वे जीवाश्च तत्त्विति ॥ ८ ॥
वदेद्गुरुः सर्वमते सर्वैक्यमपि सम्प्रति । उपदेष्टुं यतः पूर्वाऽज्ञातमेव वदेत् बुधः ॥ ९ ॥
अवश्यवक्तव्यतत्वस्यास्यानुक्तिः कथं वद । अहं ब्रह्मेत्यादिवाक्यं च पूर्वश्रुत्युक्तवर्त्मना ॥ १० ॥
नैकजीवमतेऽप्यासीद्बहुजीवमतेपि न । अतस्तवायुधं सर्वं पश्यायुधमभून्मम ॥ ११ ॥
नैतदिच्छन्ति पुरुषमेकमित्यपि भारते । यद्वाक्यस्तच्च हि स्पष्टं चेतनेष्वेकतां क्षिपेत् ॥ १२ ॥

मेकं कुरुकुलोद्वह' । इत्यादिनैक्यं निरस्याऽन्यस्मान्निर्गुणाधिक'मित्यादिनैकस्योत्तमत्वं प्रतिपादयन्महाभारते मोक्षधर्मगतं वाक्यं गृह्णाति । परस्य प्रमेयांतरदूषणव्याजेनैक्यासिद्धिं सूचयन परमपहसति । **यत इति** ॥ अनेन 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति । तैत्तिरीयानन्दमयप्रकरणगतं वाक्यं सूचयति । **यद्गिरिति** ॥ एतच्छ्रुतिबलेन ब्रह्मणः सर्वशब्दावाच्यत्वाभ्युपगमादिति भावः । न केवलं श्रुतिबाह्यं

ब्रह्म किन्तु तद्रूपमैक्यं चेति हृदयम् । व्याहृतिमेव प्रकटयति । **वाग्रूपमिति** ॥ ब्रह्मप्रतिपादकं मीमांसाशास्त्रमारभते तत् शब्दवाच्यमिति च वक्तीति स्वक्रियाविरोधरूपव्याहृतिरिति भावः । **निवृत्तमिति** ॥ ब्रह्मणस्तदप्रतिपाद्यत्वादिति भावः । विवेकिनां सभामध्यादिति योजना । तत् । तस्मात् । श्रौतनिवृत्तिपदेन सामान्येन शब्दाऽविषयत्वप्रतिपादनात् । **अर्धेति** ॥ शब्दस्यार्थे प्रवृत्तिर्द्वेधा मुख्ययाऽमुख्यया च वृत्या । तत्र त्वया मुख्यवृत्या प्रवृत्तिर्नाभ्युपगता । अतः अवशिष्टाऽमुख्यवृत्त्या प्रवृत्तिरर्धप्रवृत्तिरिति भावः विशेषणांशपरित्यागेन विशेष्ये प्रवृत्तिरर्धप्रवृत्ति-

यतो वाचो निवर्तन्त इति श्रुत्या श्रुतेर्यहिः । यदि ब्रह्म करोषि त्वं व्याहृतिस्त्वां तदाग्रसीत् ॥ १३ ॥
वाग्रूपं तव शास्त्रं च निवृत्तं ब्रह्मणो भवेत् । तवापि च सभामध्यान्निवृत्तिः स्याद्विवेकिनाम् ॥ १४ ॥
यस्मान्निवृत्तिशब्दस्तं वक्ति वाचामगोचरम् । अर्धप्रवृत्तिरूपा तल्लक्षणापि न सिद्ध्यति ॥ १५ ॥
निवृत्तेरवधिज्ञस्यै यत्पदं वक्ति तं यदि । तर्हि तं मुख्यतो वक्ति मुख्याभावे हि लक्षणा ॥ १६ ॥

ष्टिति वा । लक्षणाऽसिद्धिं रीत्यन्तरेणाह । **निवृत्तेरिति** ॥ यत्पदं निवृत्त्यवधिवाचकं तत्सिलन्तं यत इति पदम् । अत्र ब्रह्मणः प्रकृतत्वेपि तमिति पुमान्निर्देशः यत्पदेन कर्तृतया प्रकृतपदस्यैव कर्मतयाऽपि तत्पदेन ग्रहणभ्रमो माभूदिति । आत्मानमिति च तस्यार्थः । यदितं वक्ति तर्हि मुख्यत एव वक्ति । लक्षणाया मुख्याभाव एवांङ्गीक्रियमाणत्वात् । यदीत्यनेन सर्वशब्दावाच्यत्वं वदन्परः । यत्पदेनापि ब्रह्म न प्रतिपाद्यत इति ब्रूयात् । परस्मिन्नविश्वासात् । तथा सति शब्दा ब्रह्मणो निवृत्ता इति न ज्ञायेतेति चेन्माज्ञायि । 'स्वनासिकाच्छेदमपी'ति न्यायादिति सूचयति॥ १६ ॥

वृथा मुख्यानुपपत्तिप्रतिसंधानं विना। प्रथमं मुख्यामुख्ययोर्मुख्ये संप्रत्यय इति मुख्यार्थस्य शीघ्रोपस्थितिकत्वेन प्रथमप्राप्तत्वात्। द्वितीयममुख्यं लक्ष्यार्थं। वृत्तिद्वयं शक्तिलक्षणारूपम्। ब्रह्मणि शब्दागोचरत्वप्रतीतये कामपि शब्दवृत्तिमपेक्षमाणस्त्वममुख्यतया दरिद्रतुल्यां लक्षणां कस्मादाश्रयसीति भावः। यत्पदस्य ब्रह्मणि मुख्यवृत्तिरप्यस्तीत्याह। **किंचेति** ॥ सर्वनाम्नां च बुद्धिस्थसर्ववाचकत्वादिति भावः। अस्य सर्वनाम्नोऽपि यत्पदस्य। अगत्या। अन्यथाऽवधितया ब्रह्मप्रतीतेर्गत्यभावेन। तदसाधारणं ब्रह्मण्यसाधारणं यत्तन्मात्रवृत्ति नारायणादिनाम। अत्र युक्तिमाह।

वृथा प्रथममुल्लंघ्य द्वितीयं कः समाश्रयेत्। अयं निवृत्तिशब्दस्तु वृत्तिद्वयनिवारकः ॥ १७ ॥
अगत्या याचमानस्त्वं दरिद्रं केन याचसे। किं चेदं सर्वनामत्वाद्यत्पदं सर्ववाचकम् ॥ १८ ॥
अस्य लक्षणतापक्षस्तेऽव्युत्पत्तेर्हि लक्षकः। अगत्येदंपदं तस्य वाचकं चेन्निगद्यते ॥ १९ ॥
तदसाधारणं नाम्नाप्यगत्या तस्य वाचकम्। नहि गङ्गापदं गङ्गाप्रवाहस्यापि लक्षकम् ॥ २० ॥
यस्य वाक्यान्तरं नास्ति तस्य वाच्यं तदेव हि। वाच्यहीनश्च शब्दो नेत्यगतिर्नास्ति किं मम ॥ २१ ॥

नहीति ॥ नारायणादिशब्दाः ब्रह्मवाचकाः। अर्थान्तरावाचकत्वे सति वाचकत्वात्। यत्पदं यदतिरिक्तावाचकत्वे सति वाचकं। तत्तद्वाचकं। यथा प्रवाहातिरिक्तावाचकं गङ्गापदमिति युक्तिरित्यर्थः। हेतौ विशेष्यासिद्धिं वारयति। **वाच्यहीन इति** ॥ तथा चावाचकत्वे शब्दत्वमेव नस्यादिति भावः तथाचागत्येति पूर्वोक्तं संमतं तद्वाचकत्वं विनाऽसाधारणनारायणादिनाम्नां गत्यभावादिति ॥ २१ ॥

तर्हिकः श्रुत्यर्थ इत्यत आह । **मनसेति** ॥ वागिन्द्रियागोचरत्वं श्रुत्यर्थ इति भावः ॥ २२ ॥ अतः अप्रत्यक्षस्यापि परोक्षतः ज्ञेयत्वात् । तव मनो वाक्यस्योचितमर्थं मिनोतु । जाना तु । ईश्वरस्य दिव्यदृष्टिगोचरत्वात्प्राकृतेति ॥ २४ ॥ उपनिषत्पदपर्यालोचनयापि ब्रह्मणि वाच्यत्वमेव

मनसा सह पाठेन वाग्वागिन्द्रियमस्त्वयम् । इन्द्रियागोचरत्वं च स्यादेवास्मिन्नतीन्द्रिये ॥ २२ ॥
साक्षादतीन्द्रियस्यापि पारोक्ष्येणास्ति वेदना। अतो मनो मिनोत्वस्य वाक्यस्यार्थं तवोचितम् ॥ २३ ॥
ब्रह्मौपनिषदं भूयात्समस्तान्नायगोचरम् । अतः प्राकृतवागादि त्वत्र नेत्याह वागियम् ॥ २४ ॥
नितरामुपसीदन्ती विद्या ह्युपनिषन्मता । सा चोपसर्गसामर्थ्यान्मुख्यतो वक्ति तं प्रभुम् ॥ २५ ॥
मां विधत्तेऽभिधत्ते मामित्याद्यां च स्मृतिं स्मर । दुराग्रहं परित्यज्य भज पदांबुजं हरेः ॥ २६ ॥
न चेदविद्ययान्धस्त्वमन्धे तमसि मज्जसि । सत्यज्ञानानन्तपदैर्लक्ष्यं चेद्ब्रह्म तद्बलात् ॥ २७ ॥
अज्ञानं चाप्यसत्यं च परिच्छिन्नं च तर्ह्यभूत् । अगङ्गैव यथा तीरं गङ्गाशब्देन लक्षितम् ॥ २८ ॥
यथा वा सिंहशब्दस्य मुख्यार्थः सिंह एव हि । सत्यं ज्ञानमनन्तं च ब्रह्मणोऽन्यद्बलाद्बलात् ॥ २९ ॥

सिद्धयतीत्याह । **नितरामिति** ॥ अत्र प्रमाणं चाह । **मामिति** ॥ भागवत(स्क० ११ अ २१)गतमिदं । ब्रह्मणः सत्यादिपदलक्ष्यत्वे बाधकमाह । **सत्येत्यादिना** ॥ २७ ॥ सर्वमिदं सति शक्येऽर्थेस्यात् । स एव नास्तीत्याह । **शक्तमिति** ॥ तथा च शक्यार्थाभावे पदत्वमेव न स्याद्दूरे लक्षक-

त्वाशेति भावः। उक्तदार्ढ्याय शक्यं लक्ष्यं च नेकमित्यत्र दृष्टांतमाह। **लक्ष्येति**॥ लक्ष्यार्थव्यतिरेकेति बहुव्रीहिः। व्यतिरेकवती लक्ष्यभिन्नेत्यर्थः। स्वपदबोधिता। गङ्गापदबोधित।। अन्यः। लक्ष्यात्। स्वपदोदितः। सिंहपदोदितः। कथमित्यत आह। **यदिति**॥ **ज्ञानगम्य इति**॥ 'सत्य'मिति श्रुतिस्थज्ञानपदमुख्यार्थविवरणम्। परप्रमेयांतरदूषणव्याजेनापि ऐक्यासिद्धिं सूचयन् परमपहसति। **असङ्गेति**॥ श्रुतिः 'असङ्गोह्ययं पुरुष' इति बृहदारण्य-

शक्तं पदं यतः प्राहुस्तन्मुख्यार्थयुतं च तत्। मुख्यार्थश्च न ते ब्रह्म यल्लक्ष्यमिति ते मतम्॥ ३०॥
अतस्तत्पदमुख्यार्थाः कथं न स्युर्हि तादृशाः। लक्ष्यार्थव्यतिरेकैव यथा स्वपदबोधिता॥ ३१॥
गङ्गैव गङ्गा सिंहश्च यथान्यः स्वपदोदितः। अतस्ते लक्षणा सेयं स्वोक्तस्यार्थस्य शिक्षणम्॥ ३२॥
कुरुते परसिद्धान्तरक्षणं च करोत्यहो। यल्लक्ष्यनिर्गुणादन्यस्सगुणस्तत्पदोदितः॥ ३३॥
सत्योऽभूज्ज्ञानगम्योऽभूदनन्तोऽभूच्छ्रियः पतिः। असङ्गश्रुतिसंगेन ब्रह्मासङ्गं हि यो वदेत॥ ३४॥
सोऽपि विद्वत्सङ्गशून्यो व्याहत्या संगवान्परः। किंचाऽसंगश्रुतेर्ब्रह्म सर्वसंगोज्झितं यदि॥ ३५॥
लक्ष्यालक्ष्यकृतासंगोप्यस्य नेति हतोऽस्यहो। बोध्यबोधकतायोगादैक्यमिच्छ्रि ते मतेन॥ ३६॥

गता॥ ३४॥ **व्याहत्येति**॥ सर्वसङ्गं निषधतैव श्रुतिसंगः ब्रह्मणोऽङ्गीक्रियते अन्यथा लक्षणाङ्गीकारायोगात् इति व्याहतिः। अनिष्टापत्तिमपि दर्शयति। **किंचेति**॥ **लक्ष्यालक्ष्येति**॥ लक्ष्यैरसत्यत्वजडत्वसान्तत्वादिभावैः। अलक्ष्यैः सत्यत्वादिभिः। इदं च ब्रह्मातत्तोक्तयोः लक्ष्यमुख्यार्थ-

भूतेः सत्यत्वादिभिः कृतः आसङ्गः नास्ति तथा लक्ष्यधर्मैरपि सङ्गो न स्यादिति । **हत इति** । इष्टाया लक्षणाया अप्यसिद्धेः । दोषान्तरमाह । **बोध्येति** ॥ तादृशसङ्गस्यापि सामान्य श्रुत्या निषेधात् । तथा च प्रमाणाभावेनैक्यासिद्धिरिति हृदयम् ॥ ३६ ॥ दोषान्तरमाह । **अधिष्ठानेति**॥यत् यस्मात् । श्रुतेर्ज्ञानासङ्गीति।श्रुतिरन्यज्ञानाविषय इत्यर्थः यद्वा श्रुतेः असङ्गश्रुतेः ज्ञानेनाऽप्यसङ्गीत्यर्थः। अस्योत्तरत्रोपयोगः।तत्। उक्तश्रुत्या ब्रह्मणि अज्ञानसंबंधाभावात् । ज्ञानासङ्गित्वोक्तरुपयोगाह । **तज्ज्ञानेति** ॥ ब्रह्मज्ञानस्यैवाभावात् । परिहारमाशङ्कते । **व्यावहारि-**

अधिष्ठानाध्यस्तभावायोगादाभीज्ञगद्यमत् । अज्ञानासंगि ते ब्रह्म ज्ञानासंगि च यच्छ्रुतेः ॥ ३७ ॥
तद्ब्रह्मनिष्ठाज्ञानस्य नोपदेशमभूज्जगत । तज्ज्ञानबाध्यताचास्य त्वन्न्ययादेव नो भवेत् ॥ ३८ ॥
व्यावहारिकसंगेन निर्वाहः क्रियते यदि । तर्ह्यसंगश्रुतिः स्वार्थमङ्कोचात्कुपिता सती ॥ ३९ ॥
दृग्दृश्ययोगायोगाख्यं प्रत्याख्याति मतं तव । किंचाश्वत्वगजत्वाद्यैर्व्यावहारिकसंगवान् ॥ ४० ॥
अश्वादिस्तदसंगीति केन वा कथ्यते भुवि । अतोऽसंगश्रुतेर्ब्रह्म नाभूदर्थो न चापरः ॥ ४१ ॥

केति ॥ सङ्कोचात्। सामान्यतः सङ्गनिषेधिकायाः श्रुतेःपारमार्थिकसङ्गमात्रनिषेधकत्वाङ्गीकारात्। **प्रत्याख्यातीति** ॥ तत्रापि व्यावहारिक-दृग्दृश्ययोगसम्भवादिति भावः । एवं सङ्कोचकरणं लोकविरुद्धं चेत्याह । **किंचेति** ॥ अश्वादिषु व्यावहारिकाश्वत्वादिसङ्गेपि त्वद्रीत्या-अश्वादिः अश्वत्वाद्यसङ्गीति व्यवहारः स्यात् । न चासावस्तीति भावः । अतः बह्वनिष्टसद्भावात् ॥ ४१ ॥ अपरार्थो नेत्युक्तमेव विशदयति ।

पारमार्थिकेति ॥ तवैव रीत्या लोकरीत्या च नाभूदिति । अयं भावः । तवमते पारमार्थिकसंगाभावोऽर्थ इति किं त्वद्रीत्या लोकरीत्या वा नाद्यः तथा सति जीवेपि तादृशसंगाभावेन जीवस्याप्यसंगत्वापत्तेः । लोकरीतिस्तु अश्वादौ अश्वत्वाद्यसङ्गीतिव्यवहारभावादित्युक्तमिति । तमेव व्यावहारिकमेव । दोषान्तरं वक्तुमुक्तमनुवदति । सत्य इति ॥ दोषांतरमाह । व्यावहारिकेति ॥ वेश्यासंग्येव । त्वन्मतरीत्या

पारमार्थिकसंगस्याप्यभावोऽर्थस्तवैव हि । नाभूत्तवमते लोकरीत्यातः कुपिता श्रुतिः ॥ ४२ ॥
तमेव संगं धिक्कृत्य निराचक्रे मतं तव । सत्यः संगोऽत्र नेत्यर्थो यद्युच्येत श्रुतेस्तदा ॥ ४३ ॥
मिथ्यासंगोऽत्र नेत्यर्थमुक्त्वान्योऽपि सुखी भवेत् । व्यावहारिकसंगेपि ब्रह्मासंगं भवेद्यदि ॥ ४४ ॥
वेश्यासंगेप्यसंगः स्यात् स्तुत्यः स्यात्तर्हि लम्पटः । किंच पुण्येन पापेन गुणेनाप्यगुणेन वा ॥ ४५ ॥
यत्संगि लोके तत्सर्वं व्यावहारिकसंगतः । संगि तेनैव दृष्यं च पोष्यं च किल ते मते ॥ ४६ ॥
अत ईदृग्विधं भंगमंगीकृत्य श्रुतिस्तव । ब्रह्म दृष्यं विधायांते पारमार्थिकसंगतः ॥ ४७ ॥

व्यावहारिकसंगवानेव । स्तुत्यः । परमार्थतस्तत्सङ्गशून्यत्वात् । तन्मतरीत्येव दूष्यादूष्ययोः साम्यमाह । किंचेति ॥ यत्सङ्गि वस्तुजातं तत्सर्वं त्वन्मते व्यावहारिकसङ्गेनैव सङ्गि । अत एव च पुण्यादिसङ्गि पोष्यं पापादिसङ्गि दूष्यं च । ईदृग्विधं व्यावहारिकम् । अज्ञानादिसङ्गा दूष्यमादौ विधाय । अन्ते अविद्यानिवृत्तौ । नृसृङ्गाऽऽभात् । तत्सदृशात् । पारमार्थिकसङ्गत इति योजना । किं फलमित्युक्तमेव

विशदयति । **दृष्येति** ॥ नृशृङ्गतुल्यपारमार्थिकसङ्गशून्यत्वस्य दूष्यार्थे रण्डापुत्रेपि सत्वात्प्रभोरीदृशेन संगराहित्येन को विशेषः । न कोपीति भावः ॥ ४८ ॥ तर्हि कः श्रुत्यर्थ इत्यत आह । **अत इति** ॥ अन्यार्थानुपपत्तेरित्यर्थः । लोकगं जीवगतं पुण्यपापलेपरूपं । तत् । लोकविलक्षणतयैव ब्रह्मणि सिद्धेः । अथवा तत् ऐक्यरूपं ते मतमिति योजना । साहित्यमुद्रयोक्तमर्थं समर्थयते । **स्वयमिति** ॥ श्रुतित्वात् ।

नृशृंगाभासु रहितं वदेच्चेत्किं फलं ततः । दूष्यार्थेपि स नास्त्येव को विशेषः प्रभोरभूत् ॥ ४८ ॥
अतश्च ब्रह्मणि जगद्वैलक्षण्याय लोकगम् । संगं निवारयेत्तत्ते मतं सर्वं च नाशयेत् ॥ ४९ ॥
स्वयं श्रुतित्वाच्छ्रीदेवीरूपा श्रीवत्सधारिणः । सदापि सङ्गिनी तस्मिंस्तत्सङ्गस्थापनोत्सुका ॥ ५० ॥
अर्थान्तरमतिं चक्रे यत्सज्जनमनःप्रियम् । सङ्गः सर्वात्मना त्याज्य इत्यादाविव तच्छ्रुतिः ॥ ५१ ॥
दुःसंगवर्जनादेव तव (वा) सङ्गं वदाम्यहम् । इति मत्वा तत्ववादिमताच र्यस्य यन्मतम् ॥ ५२ ॥
तदेव स्वमतं भूयादित्यन्यमतमत्यजत् । चित्वं च निष्क्रियत्वं च मिथो व्याहतमेव हि ॥ ५३ ॥

तदभिमानित्वात् । **श्रीवत्सधारिण इति** ॥ श्रियं वत्से धरतीत्यर्थकमिदं सदा सङ्गिनीत्यत्र हेतुतयोपात्तम् । यत् । पूर्वोक्तं धर्माधर्मलेपाभावरूपं । लोकगाथयापीममर्थं साधयति । **सङ्गइति** ॥ अनेन 'संगः सर्वात्मना त्याज्यः सचेत्यक्तुं न शक्यते । सद्भिः सहैव चासीत सन्तः सङ्गस्य भेषजं'मिति वाक्यं सूचयति । दुःसङ्गवर्जनादेव । न तु सकलसङ्गशून्यत्वात् । अतएव सङ्गं वदामीत्युक्तं । सकलशुभगुणसङ्गं

मम च (रमायाः) सङ्गं वदामीत्यर्थः । तवासङ्गमिति पाठेऽपङ्गं असङ्गश्रुत्यर्थं कर्मफलसम्बन्धाभावरूपं पूर्वमुक्तं वदामीत्यर्थः । एवं परोक्तं शब्दावाच्यत्वमसंगत्वं च निरस्य निष्क्रियत्वमपि निरसितुमाह । **चित्त्वमिति** ॥ व्याहृतिमेव दर्शयति । **यत इति** ॥ परिहारं शङ्कते । **यदीति** ॥ परिस्पन्दक्रिया वा स्वान्यक्रिया वा नास्तीति श्रुत्यर्थ इति भावः । समाधत्ते **तर्हीति**॥ सामान्यशब्दस्य सङ्कोचावश्यकत्वे दुष्क्रिया

यतो ज्ञानक्रियां चापि क्रियामाहुर्विपश्चितः । यदि भिन्नक्रिया नास्ति परिस्पन्दक्रियापि वा ॥ ५४ ॥
तर्हि संकुचितार्थो वाक् क्षिपेद्ब्रह्मणि दुष्क्रियाम् । यथा ज्ञानक्रिया ब्राह्मी तद्रूपेति निगद्यते ॥ ५५ ॥
परिस्पन्दक्रिया चैशी तद्रूपैवास्तु का क्षतिः । स्वाभाविकी ज्ञानबलक्रिया चेत्यस्ति हि श्रुतिः ॥ ५६ ॥
स्वरूपभूता ते ज्ञानक्रिया विश्वभ्रमं यथा । कुरुते तद्वदेवेयं क्रिया कुर्याद्गतागतम् ॥ ५७ ॥
अणोरणीयसि हरौ परिस्पन्दक्रियास्ति चेत् । अस्तु नो चेदवतरेत् भुवो भारं च को हरेत् ॥ ५८ ॥
महत्त्वशक्त्या सर्वत्र स्थितोऽप्यस्तु स एव हि । योऽयमर्जुनरथ सूतः प्राग्विश्वरूपोऽप्यसौ न किम् ॥ ५९ ॥
स्थविरस्य शिशोः पङ्गोर्या ह्यशक्तिर्गतागते । सा यद्बाल्याज्जवेनैव शक्तता वा गतागते ॥ ६० ॥

नेत्यर्थः स्यादिति भावः । यया श्रुत्या । तामेवाह । **स्वाभाविकीति** ॥ इयं श्रुतिः पूर्वमुक्ता । इयं स्वरूपभूता । क्रिया परिस्पन्दरूपा । ईशस्याणुत्वात्सा क्रिया संभावितत्यप्याह **अणोरिति** ॥ अत्र गीताकथां स्मारयति । **य इति** ॥ ५९ ॥ उक्तमर्थमनुभावयति । **स्थविरस्येति** ॥

याऽशक्तिः सा वा बहुजवात् गतागते निमित्तं शक्तता वा निमित्तमितिशेषः। तथा च ब्रह्मणः परिस्पन्देऽपि शक्तिशून्यत्वे बालादिकृतागतादिकं न स्यात्। हनुमदादाविव तस्य शक्तिकार्यत्वादिति भावः। महीति स्वाभिप्रायं विशेषणं क्रियावत्त्वे। अशरीरत्वमपि परोक्तं निरस्यति। **अशरीरेति** ॥ **श्रुतिरिति** ॥ 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इत्येवंजातीयका छान्दोग्याष्टमाध्यायगता। भिन्नदेहनिषेधकत्वे

दुर्लङ्घ्याब्धिं गतो लंकां लीलया पुनरागतः। हनूमान्वा सुरैः श्लाघ्यस्तदन्ये वा कपीश्वराः ॥ ६१ ॥
तस्मान्महाप्रभोरस्य परिस्पन्देप्यशक्ततां। कुणपस्येव को ब्रूते महाद्भरणकर्मणः ॥ ६२ ॥
अशरीरश्रुतिश्चास्य भिन्नदेहं प्रतिक्षिपेत्। स्वरूपभूतदेहस्य कथं सा बाधिका वद ॥ ६३ ॥
षष्ठ्यर्थदेहसंबन्धस्याभावो हि श्रुतेर्मतः। स्वरूपभूतः संबन्धायोग्यो देहोऽस्तु का क्षतिः ॥ ६४ ॥
देहोऽस्य नेति वाग्देहे क्षिपेद्देहान्तरं परम्। तस्य देहस्य सा वाणी साधिका बाधिकापि न ॥ ६५ ॥
मूर्धानं यदि वाग्वक्ति पृथिव्याश्चरतिं श्रुतिः। सा वाग्देहास्तिनः किं न स्पष्टमाचष्ट तं प्रभुम् ॥ ६६ ॥

युक्तिमाह। **षष्ठीति** ॥ **स्वरूपभूत इति** ॥ सम्बन्धायोग्यत्वे हेतुः। वाक् अशरीरमित्यादिका। देहे स्वरूपभूते सत्येव। देहान्तरं भिन्नदेहं। तस्य स्वरूपभूतस्य। श्रुत्या देहं साधयति। **मूर्धानमिति** ॥ यदि वाक्। यावाक्। मूर्धानमिति श्रुतिः। अनेन 'मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम्। कविं सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः।'

चित्यपि क्रिया स्यात् । **कर्त्रनपेक्षायां** क्रियाया अपि स्वकर्तृकत्वानियमात् । यत्र क्वचन सा स्यादिति ब्रह्मण्यकर्तर्यपि क्रिया संगता स्यादिति ॥ ९७ ॥ **शव इति** ॥ अधिष्ठातृजीवभावस्योभयत्र शवक्रिययोः साम्यादिति भावः । परप्रमेयं सर्वमेकैकं दूषयता मायाविशिष्टस्यैव ब्रह्मणः कर्तृत्वं परोक्तं कुतो न दूषितमिति शिष्यशङ्कामपाकरोति । **मायेति** ॥ मम दोषकृन्नो न हि । कुत इत्यत आह । **माययेति** ॥ मायाविशिष्टः कर्तेत्यङ्गीकारेपि ईश्वरः मायया सर्वं सृजतीत्येवार्थः । तथा चास्यां तृतीयानिर्दिष्टायां मायायां करणभूतायां सत्यां कर्तृत्वं यत्रेति विचारे प्राप्ताप्राप्तविवे-

शवोऽपि स्वभवत्सा ते क्रिया कर्त्रनपेक्षिणी । मायाविशिष्टकर्तृत्ववादो नो दोषकृन्मम ॥ ९८ ॥
मायया कुर्वतोऽस्यास्यां करणे यत्र कर्तृता । असङ्गत्वश्रुतेर्ब्रह्म यदि सङ्गविवर्जितम् ॥ ९९ ॥
श्रुतिसङ्गेऽसङ्गिता न तदसङ्गेप्यसङ्गि न । निर्गुणत्वश्रुतेर्ब्रह्म यदि धर्मविवर्जितम् ॥ १०० ॥
श्रुत्या श्रुतत्वे धर्म्यासीत्तदभावेपि धर्म्यभूत् । यतो वाचो निवर्तन्त इत्युक्तेर्यद्यशब्दता ॥ १०१ ॥

केन ब्रह्मण एव कर्तृत्वमिति भावः । **असङ्गत्वश्रुतेरिति** ॥ सकाशादिति शेषः । अथवा ब्रह्म सङ्गविवर्जितमिति यद्यर्थ इति शेषः । तदा प्रष्टव्यं । किं ब्रह्मेतच्छ्रुतिसङ्गि नवेति । आद्येऽतएवासङ्गि न । द्वितीये असङ्गत्वबोधकाभावादसङ्गि न । **निर्गुणत्वश्रुतेरिति** ॥ धर्मविवर्जितमिति यद्यर्थ इति शेषः तर्ह्यत्रापि प्रष्टव्यं । किमेतच्छ्रुत्या ब्रह्मणः श्रुतत्वमस्ति न वा । आद्ये तेनैव सधर्मत्वम् । द्वितीये ब्रह्मणि निर्गुणत्वबोधकाभावात्सधर्मत्वमिति । **इत्युक्तेरिति** ॥ यद्यशब्दता । ब्रह्मणीति शेषः । यच्छब्दे श्रुतिस्थयत इति शब्दे । तर्हीति शेषः । तथा च यत इति

शब्दस्य ब्रह्मबोधकत्वेनार्थान्तरस्याभावात्प्रमाणशब्दत्वमेव न स्यात् तदर्थं ब्रह्मबोधकत्वे ब्रह्मणोऽशब्दता गतेति भावः । **एकत्वादिति** ॥ ब्रह्म भेदशून्यमेकत्वादिति यदि साध्यते तदा हेतोरभावेन साध्याभावनियमाद्ब्रह्म भेदवदेवासीत् । हेत्वभावः कुत इत्यत आह । **एकत्वरूपमिति** ॥ तथाच पक्षहेत्वोरैक्येन स्वस्मिन्स्वाभावादसिद्धिः । तथा च कारणता हेतुता ऐक्यस्य हेतोः गतेत्यर्थः । हेतुपक्षयोर्भेदे ततएव बाध इत्यर्थः॥ १०३॥ **यदीति** ॥ ब्रह्मासन्नेति चेत् । बलात् । अकामतोपि । ब्रह्म तद्भेदवदभूत् । न चेत् । ब्रह्मासद्भिन्नं नचेदित्यर्थः । **व्यर्थमिति** ॥

यच्छब्दे शब्दता नाभून्नोचेन्नाभूदशब्दता । एकत्वाद्भेदशून्यं चेद्ब्रह्म कारणता गता ॥ १०२ ॥
एकत्वरूपं ब्रह्मैव यद्धेतूक्रियते त्वया । हेतोरभावे साध्यस्याभावाद्भेद्यभवद्बलात् ॥ १०३ ॥
यद्यसन्न तदा ब्रह्म तद्भेदवदभूद्बलात् । न चेद्विशेषणं व्यर्थमनिर्वाच्यत्वलक्षणे ॥ १०४ ॥
असत्ता ब्रह्मणैव स्यात्तवाप्यन्ते भवेद्धि सा । स्थूलतारारुन्धतीति शाखाग्रं चन्द्रमा इति ॥ १०५ ॥

सद्विलक्षणत्वे सत्यसद्विलक्षणत्वं ह्यनिर्वाच्यत्वम् । तत्र सद्विलक्षणत्वमेवालं । ब्रह्मणोऽसत्त्वेन सद्रूपब्रह्मवैलक्षण्येनैव तदभिन्नासद्विलक्षणत्वस्यापि लाभादित्यर्थः । अथवाऽसद्विलक्षणत्वमेवालं तेनैव तद्रूपब्रह्मविलक्षणत्वस्य प्राप्या सद्विलक्षणत्ववैयर्थ्यमित्यर्थः । तथा च मिथ्यात्वसाधने सिद्धसाधनता । न च तद्वारणायैव विशेषणमावश्यकमिति वाच्यं । ब्रह्मणोऽसत्वेऽन्यस्य सतस्तन्मतेऽभावेन तव प्रतियोग्यप्रसिद्धेः । परस्परीत्याचेज्जैनादिमतेन सिद्धसाधनतादिवारणाय विशेषणांतरस्यापि दानप्रसक्तेः । स्थूलारुंधतीशाखाचन्द्रदृष्टान्ताभ्यां जीवस्य सत्यनिर्गुणदृष्टिं परो वक्ति । तदपि

दूषयितुमनुवदति । स्थूलेत्यादिना ॥ न कोप्युपदिशेदिति ॥ तथा च दृष्टान्तासिद्धिरित्यर्थः । देशिनी । उक्तिः । ईदृशी स्थूलतारा-
रुन्धत्योः शाखाग्रचन्द्रमसोरभेदविषयिणी । तर्हीति ॥ अयं भावः । यदि स्थूलतारादिकमेवारुन्धत्यादित्वेन जन उपदिशेत्तर्हि स्थूलता-

न कोप्युपदिशेल्लोके यदि स्यादशिनीदृशी । तर्हि तत्र कृता दृष्टिः स्थूलयोश्च तयोर्द्वयोः ॥ १०६ ॥
दर्शनादेव सन्तुष्टा तत्रान्यं नहि द्रक्ष्यति । निवर्तेत ततः शीघ्रं कृतकार्या यथा पुरात् ॥ १०७ ॥
अपि तु स्थूलतारायाः समीपेऽग्रास्त्वर्णीयसी । सा तारारुन्धती शाखाग्रस्य मार्गेण चन्द्रमाः ॥ १०८ ॥
अस्तीत्युपदिशन्त्यार्याः क्रितीयाचन्द्रदृष्टये । अरुन्धतीदृष्टये च नो चेद्दृक्स्यात्र सूक्ष्मयोः ॥ १०९ ॥
तदध्वना गता दृष्टिर्यतमाना शनैः शनैः । अतिसूक्ष्मे च ते पक्षगेदिति सर्वस्य सम्मतम् ॥ ११० ॥
अतो मिथ्योपास्तितश्च सगुणोपास्तितश्च ते । सत्यनिर्गुणदृक्स्यादित्यत्र नेदं निदर्शनम् ॥ १११ ॥
किं च भेदोपासनया भिन्नवस्त्वन्तरेक्षणात् । तवैक्यमेव मिथ्या स्याद्भेदः सत्योऽवबन्मम ॥ ११२ ॥

रादिमात्रदर्शनेन कृतकृत्या दृष्टिर्नान्यं द्रष्टुमीहत । यथा वा कृतकृत्यः पुमान्पुरङ्गतः पुरान्निवर्तते तद्वदिति । तर्हि दृष्टान्तस्य कोर्थ इत्यत आह । अपित्विति ॥ अस्याः स्थूलतारायाः । समीपे तु अस्तीत्युत्तरत्रान्वयः । कुतएवं । प्रथमत एवारुन्धतीचन्द्रयोः प्रदर्शनं किं न स्यादित्यत आह । नोचेदिति ॥ १११ ॥ ऐक्यस्य मिथ्यात्वं परप्रक्रियया दर्शयति । किंचेति ॥ भेदोपासनया । भिन्नसगुणब्रह्मोपास्त्या भिन्नव-

स्त्वन्तरं । तदेव सगुणं ब्रह्म । **सत्य इति** ॥ उपासनया दृष्टस्याबाधितत्वादिति भावः । परमते दृष्टांतवैषम्यमाह । **स्थूलेति** ॥ तस्यैव उपदिष्टैक्यस्यैव । **भेदोपास्तिरिति**॥ 'निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः । ये मन्दास्तेनुकम्प्यन्ते सविशेषनिरूपणै'रित्युक्तेरिति भावः । रीत्यन्तरेणापि दृष्टान्ते वैषम्यमाह । **चान्द्रीति** ॥ **धर्मान्तरैरिति** ॥ अणुत्ववर्तुलत्ववक्रत्वादिभिरित्यर्थः । तद्धस्तु अरुन्धत्यादिकं । सगुणं उक्तरीत्या अणुप्रकाशा-

स्थूलैवारुन्धतीत्युक्ता शाखा चन्द्र इतीरिते । ऐक्यस्यैवोपदेशोऽभूत्तस्यैव स्यादुपासना ॥ ११३ ॥
भेदोपास्तिरभीष्टा ते दृष्टांतस्त्वैक्यगर्भितः । अतोऽपि नायं दृष्टान्तस्त्वदिष्टार्थस्य साधकः ॥ ११४ ॥
चान्द्री कला च यत्सूक्ष्मतारा च महसाणुना । युक्ता चन्द्रत्वतारात्वजात्या धर्मान्तरैरपि ॥ ११५ ॥
अतो दृश्यं च तद्ब्रह्म तु सगुणं न तु निर्गुणम् । तस्मात्वच्छास्त्रदृष्टार्थस्यान्तः स्यान्नाश एव हि ॥ ११६ ॥
अस्माक लोकसम्मत्या कथ्यमानं विवेकिभिः । दृष्टान्तत्रयमप्येतन्मदादिष्टार्थस्य साधकम् ॥ ११७ ॥
श्रीश्च ब्रह्मादयश्चैव स्थूलतारोपमा मम । राद्धान्ते ये न योगीन्द्रास्ते पश्येयुः पदे पदे ॥ ११८ ॥
परिवारतया तेषां पूजादिभिरुपासने । कृते तन्मध्यपद्मस्थसूक्ष्मतारोपमा हरेः ॥ ११९ ॥

दिधर्मोपेतं । अतो निर्गुणदृष्टये नायं दृष्टांत इति भावः । प्रथमदृष्टान्तस्यास्मदनुकूलतां दर्शयति । **श्रीश्चेत्यादिना** ॥ ये योगीन्द्रा न तेपि प्रतिक्षणं उपासने कृतेपि ईश्वरमूर्तिं पश्येयुरित्यर्थः । ननु योगीन्द्राणामदृश्याचेन्मूर्तिः कथं तर्हि दर्शनीयेत्यत आह । **कृपयेति** ॥ यद्वा **अदृश्येति** ॥

स्वभावतस्तादृशी । तथापि नोपासावैयर्थ्यमित्याह । **कृपयेति** ॥ तथा च स्वयमेव दर्शयति । न तूपासकप्रयत्नेन । उपासा तु कृपा-सम्पादिकेति भावः ॥ द्वितीयदृष्टांतस्यापि स्वानुकूलतां दर्शयति । **नराणामित्यादिना** ॥ **तेनिर्गुणमिति** ॥ ब्रह्मणो

अदृश्या मूर्तिरप्येषां कृपया दृश्यते शनैः । नराणामपि ये दृश्याः शाखाग्रोपमिता भुवि ॥ १२० ॥
गुरवः सन्ति पन्थानस्ते च कृष्णस्य दृष्टये । इत्थं दृष्टांतयुगलं मर्त्यानां योगिनामपि ॥ १२१ ॥
लब्धं यतस्त्वदुक्तयैव तद्विषं चामृतायते । अनुकूले जगन्नाथे हयग्रीवाभिधे प्रभौ ॥ १२२ ॥
अरिर्मित्रं विषं पथ्यं भवेन्नास्त्यत्र संशयः । ध्यायंश्च सगुणं यस्ते निर्गुणं द्रष्टुमिच्छति ॥ १२३ ॥
मुक्तिं ध्यायन्स पापीयानंधे तमसि पात्यते । तस्मादुपास्यो दृश्यश्च गम्यश्च हरिरेव नः ॥ १२४ ॥
किं च यत्सगुणं वस्तु तस्यैव तु पुनःपुनः । ध्याने सति गुणापायान्निर्गुणं च तदेव च ॥ १२५ ॥
बिषमोयमुपन्यासस्ततोपि न समञ्जसः । पुनःपुनश्च ध्यानेन तस्यैव स्याद्विनिर्णयः ॥ १२६ ॥
ध्याने सति गुणापायः केन वा जायते वद । किं ध्यानमसिधारा तं क्षुरधाराऽथवा भवेत ॥ १२७ ॥

रूपमिति शेषः ॥ १२४ ॥ सगुणोपास्त्या निर्गुणीभवनं दूषयति । **किंचेति** ॥ सगुणस्य परब्रह्मत्वानभ्युपगमाद्वस्त्विति । कुतो न समञ्जस इत्यत आह । **पुनः पुनरिति** ॥ १२७ ॥ एवं भेदोपास्त्या अभेदप्राप्तिमपि दूषयति । **एवमिति** ॥ वृथैवेत्युक्तमेव विशदयति ।

यदीति । भेदपरम्परा । ध्याता सतीति शेषः । यदि तयोरभिन्नतां कुर्यात् तर्हि कांस्यकारानुसरणं वृथैवेति भावः । अन्यथा ध्यातभेद-परंपरयाऽभेदाभावे । ते मर्यादा प्रक्रिया लोकविरुद्धतया वृथेति भावः ॥ १३१ ॥

एवं भेदोपास्तितश्च भेदापाये कृते सति । तदेव वस्त्वभिन्नं स्यादिति चात्यन्तदुर्घटम् ॥ १२८ ॥
तर्हि भिन्नकटाहस्य पुनः सन्धित्सया जनः । कांस्यकारानुसरणं वृथैव कुरुते भुवि ॥ १२९ ॥
यदि तद्भिन्नशकलद्वन्द्वभेदपरम्परा । तयोरभिन्नतां कुर्यान्मर्यादा तेऽन्यथा वृथा ॥ १३० ॥
वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः । चतुर्थः सुधियां कण्ठालङ्कारं कुरुतेतराम् ॥ १३१ ॥

श्रीः ॥ इति श्रीमद्वादिराजपूज्यचरणविरचितायां न्यायरत्नावल्यां चतुर्थः सरः ॥ श्रीः

॥ इति भाविसमीरश्रीमद्वादिराजपूज्यचरणविरचितन्यायरत्नावल्याः व्याख्यायां प्रकाशसंग्रहाख्यायां चतुर्थः सरः ॥

॥ चतुर्थसरः समाप्तः ॥



ॐ ॥ श्रीः ॥ क्व सूक्तिरत्नपाला ते वाणी काचमणिः क्व मे । तथापि योजयंस्तस्या तामद्य त्रिजगद्गुरो ॥ १ ॥ यास्यामि हास्यपदवीं नविदूये तथाप्यहम् । सर्वं च बालचरितं रमणीयं यतो विदुः ॥ २ ॥ दास्ये गुरुवरदास्ये स्वात्मानं तावकं तवैवाद्य । कारय विष्टिगृहीतं यद्वा तद्वाथ सम्यग्वा ॥ ३ ॥ पुनरपि सिंहावलोकनन्यायेन लोकदृष्टान्तपुरःसरं जीवब्रह्मणोरेकतां दूषयति । **य इति** ॥ महापटमध्यादेकतन्तुनिष्कासने पृथक् स्थितत्वेन भासमानोऽपि स तन्तुः तत्पटोपादानत्वात् प्रयत्नेन तस्य तन्तोस्तत्रैव योजने तयोरेकता स्यात् । उपादानोपादेया-

॥ श्रीमद्वादिराजगुरुभ्यो नमः ॥ श्रीवेदव्यासाय नमः ॥

यः पटादुद्धृतस्तन्तुस्तस्य तत्रैकता पुनः । भवेत्केनाप्युपायेन यस्तन्तुर्यत्पटात्पुरा ॥ १ ॥
अनुद्धृतः पृथक् चास्ते कुविन्दगृह एव हि । उपायशतकेनापि तस्य तन्तोस्तदेकता ॥ २ ॥
क्रियते केन वा लोके तस्य सूचिकया बलात् । प्रवेशो कारितेऽप्यस्मिन् योगः स्यान्नत्वभिन्नता ॥ ३ ॥
मिलितैस्तन्तुभिर्नूनं क्रियेतापि पटोऽपरः । पृथक्स्थितश्च यस्तन्तुः पृथगस्ति च यः पटः ॥ ४ ॥

भेदस्य सर्वसम्मतत्वात् । यश्च तन्तुः यत्पटादनुद्धृतः कुविन्दगृहे वा आपणे वा यत्र क्वचित्पृथगस्ति तस्य तन्तोस्तत्पटैकता नेत्यपि सर्वसम्मतम् । सूचिकाग्रेण बलाद्योजितः स तन्तुः तत्पटसंख्येव भवति नत्वभिन्नः । एवं पृथक् स्थितैर्बहुभिस्तन्तुभिः योजने महापटो वाऽपरः स्यान्न तु स एव पटः इति समुदायार्थः । **पृथगिति** ॥ उक्तरीत्या तत्तन्तुपटयोरैक्यं कर्तुं न शक्यत इति भावः । एवं दृष्टांतमभिधाय दार्ष्टान्तिकमाह ।

एवमिति ॥ **भेदानादित्ववादिन इति** ॥ मते इति शेषः । महापटमध्यादेकैकतन्तुरिव जीवा ब्रह्मण उद्धृता नेति दर्शयितुं भेदानादित्ववादिन इत्युक्तम् । अन्यथा पूर्वं जीवस्याभावाद्भेदानादिता न स्यादिति । तन्तवः पटमिव जीवा ब्रह्माख्यं वस्त्वारभन्ते चेत्तन्तुवदेव तदेकतामर्हेयुः । ब्रह्मारम्भाभावेऽप्यैक्योक्तावदृष्टकल्पनेति भावः । अत्रोभयसम्मतदृष्टान्तान्तरमप्याह । **एकीभूयेति** ॥ पटादुद्धृततन्तोः योजनेन

तयोरैक्यं कल्पशतैरपि कर्तुं न शक्यते । एवं च ब्रह्मणा साकं पृथक्पृथगनादितः ॥ ५ ॥
ये जीवाः सन्त्यनन्ताश्च भेदानादित्ववादिनः । तेषां च तस्य चैकत्वं ज्ञानसूचिकयापि न ॥ ६ ॥
निशिताग्रापि सा तस्मिन्प्रवेशं कारयेत्परम् । ब्रह्मैवाभिन्नवस्त्वेकं कुर्युश्चेज्जीवराशयः ॥ ७ ॥
अर्हेयुरेकतां नोपेक्ष्यादृष्टस्य कल्पना । एकीभूय पुरा शेते रूपावयवयकर्मभिः ॥ ८ ॥
या मूर्तिः पद्मनाभस्य कार्यार्थे साऽमरैस्तुता । एकीभूतस्वरूपात्स्वादुत्थाप्यैकतमां तनुम् ॥ ९ ॥
कार्याणि कृत्वा तांश्चैव पुनरेकीकरोति च । दृष्टानुसारीसर्वेशोप्यर्वाचीनस्य का कथा ॥ १० ॥
अतस्तत्प्रक्रिया सर्वा विक्रियेति मतिर्मम । अनादिकालमारभ्य श्रवणाद्यैर्न मुक्तता ॥ ११ ॥

पुनः पटैकीभावत्कार्यार्थिभिरमरैः स्तुतः ईशः स्वस्वरूपादेकां कामपि मूर्तिमुत्थाप्य पुनरेकीभवतीति । सर्वेशोपीत्थं लोकमनुकरोति चेदन्येषां का कथेति भावः ॥ १० ॥ अतः लोकविरुद्धत्वात् । अस्माकं मुक्तिसम्पत्तये (भगवत्प्रसाद) हरीच्छाकालादिनियतसाधनवत्परेषामभावादियताकालेन

न जाता मुक्तिरुत्तरत्रापि न भवेदित्याह । **अनादीति** ॥ तैः श्रवणाद्यैः । असंख्यब्रह्मणां दिने पीयता कालेन श्रवणादिकं न जातमिदानीमेव भाव्यमिति यदि कश्चिद्ब्रूयात्तदाप्याह । **यथापूर्वमिति** ॥ 'श्राता यथा पूर्वमकल्पय'दितिश्रुतेस्तथा वक्तुं न शक्यत इति भावः । **वक्ष्यति** ॥ किमवादीदित्यपि योज्यम् । किमित्याक्षेपः । यदि प्रतियुगं भिन्नभिन्नमेव श्रूयेत तदा इदानीं श्रूयमाणस्येयता कालेनाश्रुतत्वान्न-मुक्तिरिति संभाव्येतापि तन्नेति भाव । वृक्षस्य श्रवणादिरूपस्य । **नाभूदिति** ॥ इदानीमपि जगतः दृश्यमानत्वेन द्रष्टृणां जीवानां च

यदि तर्हि कथं मुक्तिर्भाविभिस्तैर्भविष्यति । शतायुषामसंख्यानां ब्रह्मणां हि दिने दिने ॥ १२ ॥
असंख्यश्रवणाद्यं च यथा पूर्वं श्रुतेरभूत् । शतातीतयुगे वक्ति किं वक्ष्यति युगान्तरे ॥ १३ ॥
अद्याप्यफलवृक्षस्य किं स्यात्कालान्तरे फलम् । परान्तकालेपि मुक्तिर्नाभूत्किल भवन्मते ॥ १४ ॥
परान्तकालादपरो मुक्तिकालोऽस्तिकः श्रुतौ । यस्तु ब्रह्मलये न स्यात्स मोक्षः स्यात्कदा वद ॥ १५ ॥
अस्मादप्यधिको यत्र मुक्तिः क्वासौ लयः श्रुतः । यदि शब्दश्रवणतोप्यर्थेप्यस्त्यपरोक्षधीः ॥ १६ ॥

सत्वेन त्वदादेर्मुक्तिर्नाभूदिति गम्यते । मुक्तिकालश्च ब्रह्मणः परान्तकाल एव । 'परान्तकाले परिमुच्यन्ति सर्वे' इति श्रुतेः । तथा च ब्रह्मलये परान्तकालेपि न ज्ञातः मोक्षः कदा स्यादिति भावः ॥ १५ ॥ अन्यस्तु मुक्तिकालः अश्रुतत्वादप्रामाणिक इति भावः । दशमस्त्व-मासीत्यादिदृष्टांतेन शब्दादेव प्रत्यक्षं भवतीति पराभ्युपगतं प्रमेयांतरमपि निरस्यति । **यदीत्यादिना** ॥ अपिर्भिन्नक्रमः । शब्दादर्थे

परोक्षज्ञानं सर्वसम्मतम् । अपरोक्षधीरपि यद्यस्तीति योजना ॥ १६ ॥ आस्वादयेत् । रसनेन्द्रियेण साक्षात्कुर्यात् । काशीं गत्वा तां दृष्ट्वा चागतं पुरुषं यथा पूजयन्ति । तथा काशीति शब्दश्रोतारमपि कुतो न पूजयन्ति । तच्छब्देन तस्यापि तत्साक्षात्कारसम्भवादिति भावः ॥ १९ ॥ **कारयेदिति** ॥ सम्पादयेदित्यर्थः ॥ २० ॥ऐक्यवादे दोषान्तरमाह । **स्वयमेवेति** ॥ **कण्ठशोषणमिति**॥ व्याघ्रब्रह्मणैकीभावस्य यत्र क्वच-

गुडस्य स्वादुतां शृण्वन्कुतो नास्वादयेद्रसम् । काशीद्रष्टरि यां पूजां कुरुते सकलो जनः ॥ १७ ॥
तच्छब्दश्रोतरि तथा कुतः पूजां न कुर्वते । यद्युन्मीलितनेत्राणां घटाद्यर्थस्य दर्शनम् ॥ १८ ॥
तथा निमीलिताक्षाणां तच्छब्दश्रवणे सति । दर्शनं तादृगस्तीति कोऽनुन्मत्तो वदेद्वद ॥ १९ ॥
चक्षूरोगी कुतो वैद्यं कारयेद्बहुवित्ततः । शब्दादेवाखिलं दृष्ट्वा तुष्टो रक्षेद्धि तद्धनम् ॥ २० ॥
स्वयमेव यदि ब्रह्म स्वैक्यव्यक्तिश्च मुक्तता । तर्ह्यर्चिरादिमार्गाणां चर्चा स्यात्कण्ठशोषणम् ॥ २१ ॥
अनादिकालमारभ्य भवेस्मिन्नेव मज्जतः । उन्मज्जनाय यच्छास्त्रं तद्विकल्पासहं तव ॥ २२ ॥
त्वद्वाक्यमूलसूत्राणां लुप्तवेदोद्धृतेश्च यः । पुराणानां च सर्वेषां कर्ता सत्यवतीसुतः ॥ २३ ॥

नस्थितावपि संभवेन मार्गाद्यनुपयोगादिति भावः । एकजीववादे दोषांतरं वक्तुं पुनरप्यारभते । **अनादीत्यादिना** ॥ **कुतः कुर्यादिति** ॥ शास्त्रस्य परार्थत्वात्तस्याभावात् । असन्तं परमज्ञत्वा कृतवानित्यपि नेत्याह । **सर्वविदिति** ॥ **उन्मज्जेदिति** ॥ **स्वयं**

सर्वज्ञः सन्नेव कथं संसरतीति भावः । **कथमिति** ॥ स्वकृतग्रन्थश्रवणस्य स्वेनैव क्रियमाणस्य लोकेऽदर्शनात् । सर्वज्ञतया सन्देहाभावा-
त्वेति भावः । न च तस्य श्रवणं नास्त्येवेति वाच्यम् । तथा सति साधनाभावेन तस्य मुक्तिर्न स्यात् । श्रोतुरन्यस्याभावेन शास्त्रं च निरर्थकं

अनन्तशास्त्रप्रभवः सर्वविद्याप्रवर्तकः । सोयं तवैकजीवश्चेत्तर्हि शास्त्रमहार्णवम् ॥ २४ ॥
स्वतोन्यच्चिदभावज्ञः कुतः कुर्यात्समर्ववित् । उन्मज्जेच निमज्जेच कथं दुःखमहार्णवे ॥ २५ ॥
कथं च स्वकृतग्रन्थश्रवणं तस्य शोभते । अतो मुक्तिश्च नास्यस्याच्छास्त्रं च स्यान्निरर्थकम् ॥ २६ ॥
यदि सर्वज्ञता न स्यात्तर्हि शास्त्रमहार्णवम् । कथं कुर्यादल्पमतेर्नहि कार्यमिदं भवेत् ॥ २७ ॥
स्वग्रन्थमूलशास्त्रस्य कर्तुरन्यज्ञता यदि । तर्ह्यभूत्तव शास्त्रस्य मर्यादान्धपरम्परा ॥ २८ ॥
अस्याज्ञतां च कश्छेत्तुं गुरुरस्ति जगत्त्रये । यत्सूत्राज्जगतां ज्ञानं सोज्ञानी किल सूत्रकृत् ॥ २९ ॥
किं चास्याज्ञानविच्छित्त्यै शास्त्रं ज्ञानप्रदं कथम् । स्वज्ञानजातशास्त्रार्थे नाज्ञानं स्वस्य युज्यते ॥ ३० ॥
ज्ञानार्थं श्रवणं व्यर्थं व्याकृत्वाताम्र च कः पुमान् । श्रोतव्यमन्यच्छास्त्रं नेत्याभीन्मुक्तेर्हि सङ्कटम् ॥ ३१ ॥

स्यादिति भावः ॥ २६ ॥ सर्वज्ञत्वमेवास्य नेत्यत आह । **यदीति** ॥ इदं शास्त्रकरणरूपं । अल्पज्ञत्वे प्राप्तं दोषांतरमाह । **स्वेति** ॥ २८ ॥
अस्य मूलशास्त्रकर्तुं । कथमित्युक्तमेव विशदयति । **स्वज्ञानेति** ॥ अर्थं बुध्वा वाक्यरचनेति न्यायात् । **व्यर्थमिति** ॥ तन्निवर्त्तस्यार्था-

ज्ञानस्य कर्तर्यसम्भवात् । **क इति** ॥ एकजीववादिमते जीवान्तरस्याभावात् । स्वकृतं शास्त्रं ज्ञातार्थत्वान्मा शृणोतु शास्त्रान्तरं तु शृणोतीत्यत आह । **श्रोतव्यमिति** ॥ **सङ्कटमिति** ॥ साधनाभावप्रयुक्तम् ॥ ३१ ॥ एकजीवस्य शास्त्रकर्तुरन्यत्वे शास्त्रकर्तृत्वेनाभ्युपगतोऽयं शास्त्रं कुतो न कुर्यादित्यत आह । **जड इति** ॥ अन्याज्ञानकल्पितत्वादिति भावः । एकजीवस्यान्यत्वपक्षे दोषांतरमप्याह । **अस्मिन्निति** ॥

अतोऽपि मुक्तिर्नास्य स्यादेकजीवस्य ते मते । यदि चायं नैकजीवस्तर्हि शास्त्रमहार्णवम् ॥ ३२ ॥
कथं कुर्यात्स्तम्भकुम्भकुड्यकाष्ठसमो जडः । अस्मिन्पक्षे च शास्त्रस्यैवाभावात्कस्य मुक्तता ॥ ३३ ॥
यदि दृष्टस्यास्य शास्त्रस्यापह्नारो न युज्यते । तदोपाहर कर्तारमस्य कंचन चेतनम् ॥ ३४ ॥
त्वद्रीत्यैवैकजीवोऽस्य कर्ता नाभूत्ततोऽपरः । कर्तास्य चेतनोऽवश्यं वक्तव्यश्चेदृतं मतम् ॥ ३५ ॥
कल्पकं निर्गुणं ब्रह्म चिद्रूपं सम्मतं तव । कल्प्यस्तवैको जीवश्च चिद्रूपोऽस्ति तवै(थै)व हि ॥ ३६ ॥
एवं च सर्वशास्त्राणां कर्त्री सर्वज्ञचिद्यदि । या च त्रिस्कन्धचैतन्यमासीद्द्विस्कन्धतां गता ॥ ३७ ॥

उपाहर । सम्पादय । **गतमिति** ॥ त्वद्रीत्यैव चेतनद्वयप्राप्तेरिति भावः ॥ ३५ ॥ तथाप्यङ्गीकारे प्राप्तमनिष्टान्तरमप्याह । **कल्पकमिति** ॥ अत्र तथैव हीति पाठः । यथा निर्गुणं कल्पकं ब्रह्म तव सम्मतं तथैव चिद्रूपः कल्प्यजीवोऽस्तीत्यपि सम्मतमित्यर्थः ॥ तवैवेति पाठे कल्प्यो जीवस्तव सम्मतः । स च न जडः किन्तु चिद्रूपोऽस्तीत्यपि तवैव सम्मत इत्यर्थ इत्युपपाद्यम् । शास्त्रकर्त्री सर्वज्ञचिदुक्तरीत्या बलात्

स्वयाङ्गीकृता । मूलभूतं निर्गुणं ब्रह्म स्वयमेवास्ति कल्प्य एको जीवोपि तथा । अन्यथा स्वकृतशास्त्रस्य स्वेनैव श्रवणासंभवेन वैयर्थ्यापातात् तदभावाय एकजीवोप्यावश्यकः । तथा च एकं ब्रह्म एको जीव इति द्विस्कन्धतां गता चित् या सेदानीं शास्त्रकर्तृचिता समं त्रिस्कन्धतां प्रापेति भावः । चितां त्रित्वमप्यास्तामित्यत आह । अत इति ॥ शास्त्रकर्त्रेकचैतन्यस्वीकारन्यायेन । युगे युगे इति बहुचैतन्योपपादकं प्रवचन-पठनभाष्यकरणादेरितरचेतनकार्यत्वादिति भावः । ततश्च न केवलं तत्स्कन्धात् द्वित्वं त्रित्वं वा प्राप्ताच्चेतनस्कन्धादुक्तरीत्या बहवश्चेतनाः

अतः स्वकृतशास्त्राणामध्येतारो मुनीश्वराः । प्रवक्तारश्च भाष्यादेः कर्तारश्च युगे युगे ॥ ३८ ॥
बहवश्चेतनाः सिद्धास्तत्स्कन्धादेव केवलम् । नच्छिन्नास्तव मूर्धा च छिन्नोभून्नात्र संशयः ॥ ३९ ॥
एकजीवमते यस्मादुक्तेर्मुक्तिरभूत्परम् । समस्तशास्त्रकर्तुश्च वक्तुश्च मुनिमण्डले ॥ ४० ॥
यश्च सूत्रकृतोः जाड्यं वक्तव्यस्योक्ति क संसदि । बहुजीवमते चापि मुक्तिं युक्तिर्निकृन्तति ॥ ४१ ॥

छिन्नाः किंतु तव मूर्धापि छिन्न इत्युपहासः । उक्तरीत्या विचारणे उत्तराभावादिति भावः ॥ ३९ ॥ विचारणेन निर्गलितमर्थमाह । **एकेति** ॥ **तस्मादिति** ॥ शास्त्रस्य परार्थत्वात् । परस्य चाभावात् । स्वकृतग्रन्थश्रवणादेः स्वस्मिन्नदर्शनात् । प्रयोजनान्तरस्यानुक्तत्वात् । उक्तेर्मुक्तिः । शास्त्ररूपाया उक्तेरेवाभावः । परं केवलं । न तु जीवस्य मुक्तिः । श्रवणादिसाधनाभावादिति भावः । क संसदि । कस्यां सभायां वक्तीत्यावृत्या योजना । ईदृग्गुरुनिन्दकं वाक्यं श्रोतुरभावान्न सभायां वक्तव्यमित्यर्थः । युक्तिः कुतो निकृन्ततीत्यत आह । **येति** ॥ आत्म-

ज्ञानोदये । आत्मसाक्षात्कारे । ब्रह्मचित्त्वं ब्रह्मचिदभेदं । प्राप्नोतीति शेषः । सा जीवचित् । पुनः अभेदप्राप्त्यनन्तरम् ॥ ४२ ॥ ब्रह्मचिच्च सर्वदा नानाजीवात्मना सुखदुःखादिकमनुभवतीतीयमपि जीवचित् मुक्तत्वेनाभ्युपगता मुक्ता न स्यादिति । इदं च दूषणमेकजीववादे नास्ति । यतः एकस्य मुक्तौ सकलनिवृत्तेः जीवांतरस्यैवाभावेन जीवांतरगतदुःखाद्यापादनासंभवादित्यत्रैवोत्कीर्तनम् । दुःखादिभोगेपि मुक्तता कुतो नेत्यत आह । स्वस्येति ॥ अतः उक्तवर्त्मना मुक्तौ ब्रह्मान्यत्वाभावात् । ब्रह्मणश्च नानाजीवात्मना दुःखादिभ्रान्तिसद्भावात् । ततोपि किमित्यत

या जीवचिद्ब्रह्मचित्त्वमात्मज्ञानोदये सति । सा पुनर्जीवचिद्ब्रह्म चितोऽन्या नास्ति ते मते ॥ ४२ ॥
ब्रह्मचिच्च सुखं दुःखं नानाजीवात्मना सदा । भुङ्क्ते तस्मान्न सा मुक्ता ततोऽन्या चोक्तवर्त्मना ॥ ४३ ॥
नास्त्येवातः स्वस्य दुःखभ्रान्त्य (न्ति) भावे न मुक्तता । यस्य पादे वेदनाऽसौ कराभ्यां ताडयेदुरः ॥ ४४ ॥
मुंचत्यश्रु च नेत्राभ्यां तदेकांशेपि वेदना । सर्वांशवेदनैवाभूत्तस्मात्सर्वांशवेदना ॥ ४५ ॥

आह । भ्रान्त्यभावे न मुक्ततेति ॥ दुःखादिभ्रान्तेरेव संसाररूपत्वादिति भावः । अत्र भ्रान्तिभावे इति सुगमः पाठः । श्रूयमाणस्यैव पाठः प्रामाणिकत्वे भ्रान्त्यभावे सति यतोऽन्या मुक्तता नेत्यर्थः । यद्वा नास्त्येवेत्यस्यावृत्तिः तथा च दुःखभ्रान्त्यभावेन या मुक्तता नाम तन्निमित्तिका तदभिन्ना वा मुक्तता सा नास्त्येवेति योजना द्रष्टव्या । उपाधिगतभेदसद्भावान्न जीवगतदुःखाद्यनुसंधानं ब्रह्मण इति शङ्कामपाकरोति । **यस्येत्यादिना** ॥ पादावच्छिन्नांशे वेदनायामपि करावयवैरुरस्ताडनप्रलपनाश्रुमोचनादिव्यापारैः

एकांशवेदनायामपि सर्वांशवेदनाऽस्तीति यतो ज्ञायतेऽतो ब्रह्मणः स्वरूपाभेदे सर्ववेदनाऽनिवार्येति । प्रकृते एकांशवेदनात्वस्तीत्याह । **एकांश इति** ॥ **ध्रुवमिति** ॥ बहुजीववादे एकमुक्तावपीतरस्य संसारिणः सत्वादिति भावः । दुःखादेरेकांश सत्वेपि ब्रह्मणस्तज्ज्ञानं नास्तीति मन्दाशङ्कां निराकरोति । **सर्वज्ञमिति** ॥ **महाभ्रान्तमिति** ॥ अस्मदादीनामस्मदीयकतिपयदुःखादिभ्रान्तिरेव । ब्रह्मणस्तु सर्वगत-

एकांशः सुतरां दुःखानुभवं कुरुते ध्रुवम् । सर्वज्ञं हि तव ब्रह्म महाभ्रान्तं भवेद्बलात् ॥ ४६ ॥
न चेद्विश्वमभूत्सत्यं प्रमया वा भ्रमेण वा । वाच्यं सर्वानुसन्धानं तेनात्यन्तैकतां गतः ॥ ४७ ॥
मुक्तोपि तादृशो वाच्यो नो चेत्तस्यैक्यमेव न । अविद्यास्तमयात्तस्मिन्नंशे न भ्रान्तिरित्यपि ॥ ४८ ॥
विरुद्धं भाषसे तत्र यद्यविद्यानुपाधिभिः । कृतो भेदोऽस्ति तत्सत्वान्नांशान्तरसुखासुखे ॥ ४९ ॥
इति शङ्कावकाशोऽस्ति न चेदंशान्तरात्सुखात् । ब्रह्मणः संसृतिरिव स्यादेवास्याश्च संसृतिः ॥ ५० ॥

दुःखादिभ्रान्तिरित्यर्थः । नो चेत् । सर्वज्ञमपि ब्रह्म भ्रान्तं न चेत् । **सत्यमिति** ॥ ब्रह्मप्रमाविषयत्वादिति भावः । **ब्रह्मणः सर्वानुसंधानं प्रमया भ्रमेण वा वाच्यम्** । तृतीयप्रकाराभावात् । अतः विश्वसत्यत्वभिया भ्रान्त्यङ्गीकारे तदभिन्नस्त्वदीयमुक्तोऽपि महाभ्रान्त एव स्यात् । एवमनङ्गीकारे विरुद्धधर्मवत्वादैक्यमेव न स्यादिति भावः । शङ्कते **अविद्येति** ॥ तस्मिन्नंशे मुक्ते ॥ ४८ ॥ प्रतिज्ञातं विरुद्धभाषणमेवोपपादयति । **तत्रेति** ॥ अयमाशयः । स्वरूपैक्येपि परस्परानुसंधानं नास्तीति शङ्कापि तदा स्यात् । यद्यौपाधिकोपि भेदस्तयोः

स्यात् । न चैवं प्रकृते । मुक्तजीवस्य ब्रह्मणश्चौपाधिकभेदाभावाद्ब्रह्मणः संसृतिरिव तव मुक्तस्यापि सा स्यादिति । अंशान्तरात् । अंशान्तरगतात् । मुक्तस्याशरीरत्वेन नानुसंधानमित्यपि शङ्कां तन्मतरीत्यैव परिहरति । **परिच्छिन्नेत्यादिना** ॥ यथा तव ब्राह्मी चित् केवलेन देहाद्युपाधिरहितेन स्वसाक्षिणा परिच्छिन्नतत्तदंशैः तत्तदुपाधिभिरनुभूयमानमपि दुःखादिकमेकतावलात्स्वयमनुसंधत्ते । तथा तदभिन्नेयं तव मुक्ता चिच्च एकत्वबलादेव तत्सर्वमनुसंदध्यादिति । न च ब्रह्मण एवानुसंधानं नास्तीति वाच्यं । सर्वज्ञत्वव्याकोपादिति भावः ॥ ५३ ॥ एवं

परिच्छिन्नांशगं दुःखं तत्तद्देहे तदिन्द्रियैः । तैस्तैरेवानुभूतं च यथैक्यस्यानुभावतः ॥ ५१ ॥
स्वीयत्वेनानुसन्धत्ते देहान्तरविवर्जिता । ब्राह्मी चिच्चाखिलं स्वेन साक्षिणा केवलेन हि ॥ ५२ ॥
तथात्यन्तैकतां प्राप्ता मुक्तचिच्चैकतावलात् । तत्सर्वमनुसन्दध्यान्नो चेदैक्यं प्रकुप्यति ॥ ५३ ॥
किमुत ब्रह्मचिन्निष्ठसंसारेणान्ध संसृतिः । यथा स्वप्ने सुखं साक्षी देहाभावमपीक्षते ॥ ५४ ॥
तथा स्वांशगतं दुःखं चिदेवांशी निरीक्षताम् । सर्वज्ञं किल ते ब्रह्म स्वानंशांस्तरभिन्नताम् ॥ ५५ ॥

मुक्तचितः दुःखानुसन्धानप्राप्तौ ब्रह्मचिन्निष्ठं संसारित्वमपि तस्याः कैमुतिकन्यायसिद्धमित्याह । **किमिति** ॥ देहाभावान्मुक्तस्यानुसंधानं कथमिति शङ्कां सदृष्टान्तमपाकरोति । **यथेति** ॥ तन्मते सुषुप्तिदशायां देहादिलयांगीकारादिति भावः । ब्रह्मण एव दुःखानुसन्धानं नास्तीतः कथं तदभिन्नमुक्तचितस्तदित्यत आह । **सर्वज्ञमिति** ॥ न चेत् । अनुसन्धानं न चेत् । ब्रह्मण एव संसार [illegible] । कैमुत्यनापि

दुःखाद्यनुसंधानं ब्रह्मण आपादयति । **ऐक्येति** ॥ वस्तुतः देहैक्याभावेपि तद्भ्रान्तिमात्रेण जीवस्य देहधर्माध्यासः अन्योन्यस्मिन्नन्योन्यधर्माश्चाध्यस्येति वदता त्वयांगीकृतः । वस्तुतस्त्वैक्येऽनुसन्धानमस्तीति किमु वाच्यमिति भावः । **शोच्यमिति** ॥ मुक्तस्यामुक्तत्वप्राप्तेरिति भावः ॥ ५६ ॥ सति स्वरूपैक्ये औपाधिकभेदो नानुसन्धानविरोधीति सदृष्टांतमाह । **यथेत्यादिना** ॥ सौभर्यादियोगी यथा देहोपाधिकृतभेदे सत्यपि तत्तदंशगतसुखदुःखादिकमेकताबलात्स्वसाक्षिणाऽनुसंधत्ते तथौपाधिकभेदे सत्यपि ब्रह्म अनुसंदध्यादेव दुःखादिकं ।

दुःखं च तद्गतं पश्येन्न चेत्तत्संसरेत्कथम् । ऐक्यभ्रमाद्देहधर्माध्यासोऽस्ति किल देहिनः ॥ ५६ ॥
ऐक्ये सत्यनुसन्धानं किं वाच्यं शोच्यमेव तत् । यथा कायव्यूहसौख्यं तत्तद्देहे तदिन्द्रियैः ॥ ५७ ॥
तैरंशैरनुभूतं च योगी देहांतरे स्थितः । स्वीयत्वेनाऽनुसंधत्ते साक्षिणैक्यबलात्परम् ॥ ५८ ॥
स्वाप्नदेहाख्योपाधिना कृतभेदेन भेद्यपि । किं वाच्यमनुसन्धानं भेदमात्रोज्झितस्य तु ॥ ५९ ॥
देहोऽन्यो विद्यमानोऽपि नास्योपकुरुते तदा । किंत्वौपाधिकभेदस्य हेतुत्वादपकार्यपि ॥ ६० ॥

एवं सति ब्रह्मणोपाधिकभेदेनापि शून्या मुक्तचित् ब्रह्मानुसंहितं दुःखादिकमनुसन्धत्त इति किं वाच्यमिति भावः । उपाधिकृतभेदस्यात्यल्पतोजकताप्रदर्शनायोपाधिदेहे स्वाप्नत्वकीर्तनम् । भ्रान्तिकल्पितत्वेन स्वाप्नतुल्यत्वादिति भावः । पादाद्यंशे विश्लिष्टोपाधिर्नास्ति । अत्र योगिनि सोप्यस्तीति विशेषः । अत एवैतदृष्टान्तकथनम् ॥ ५९ ॥ उक्तं सङ्कलय्याह । **देह इति** ॥ अस्य योगिनः । नोपकुरुतेऽनुसन्धानं न

साधयति । अतो देहस्याबाधकत्वादसाधकत्वाच्च ॥ ६२ ॥ तर्हि देहस्य वैयर्थ्यमित्यत आह । देह इति ॥ तत् । सुषुप्ताविवानुसंधानेऽप्रयोजकत्वात् । अपिचांशयारब्धकर्मजन्यं फलमंशगतमप्यंशी योगी स्वयमेवानुसंधत्ते । नो चेत् । अंशिनोऽनुसंधानाभावे । अंशस्याकृताभ्यागमः अंशिनः कृतहानिरिति विवेकः । उक्तं निगमयति । यदिति ॥ ब्रह्मणोंऽशकः । जीवः । योग्यंशाः सौभरिमुनेः पंचाशत्संख्या-

ऐक्यस्य बलतस्तृष्णीमासीन्नापचकार च । अतो मुक्तचितो देहस्याभावोपि न बाधकः ॥ ६१ ॥
देहांतरोत्पन्नदुःखभोगेऽसौ साधकोऽपि न । साक्ष्येव ह्यनुसन्धाता सर्वत्र सुखदुःखयोः ॥ ६२ ॥
देहस्तज्जन्मनेऽर्थोत्र तच्च देहांतरादभूत् । स्वांशभोगं च योग्येव भुंक्ते स्वारब्धकर्मणः ॥ ६३ ॥
फलं स्वस्य न चेत्स्यातां कृतहान्यकृतागमौ । तस्मादंशगतं दुःखमंशिनोपि भवेद्ध्रुवम् ॥ ६४ ॥
नचेत्पार्थसुखायेन्द्रः कुतः कृष्णमयाचत । यद्व्यावहारिके भेदे सत्यप्यैक्यानुभावतः ॥ ६५ ॥
योगी समनुसन्धत्ते तद्वह्म ब्रह्मणोंशकः । योग्यंशाश्च न्यायसाम्यात्सर्वे स्युरनुसन्धिनः ॥ ६६ ॥
रज्जुभ्रमेपि यत्सर्पः सर्पकार्यं करोति तत् । सत्यैक्यस्य पुरस्तात्ते मिथ्याभेदोऽप्रयोजकः ॥ ६७ ॥

कांशाः । अनुसंधिनः । अनुसन्धावन्तः । अनुसन्धाचानुसन्धानमेव ॥ ६६ ॥ ऐक्यभ्रमोपि कार्यकारी यदा दृष्टस्तदा स्वाभाविकैक्यं कार्यं करोतीति किमु वाच्यमित्याह । रज्जुभ्रम इति ॥ रज्जसर्पयोरनारोपितारोपितयोर्विद्यमानोऽपि भेदः यदा कार्यप्रतिबन्धको नास ।

तदा मिथ्याभेदोऽनुसंधानप्रतिबंधको नेति किमु वाच्यमिति भावः ॥ ६७ ॥ मिथ्याभेदस्य तुष्यतुन्यायेन प्रयोजकत्वमभ्युपेत्यापि विकल्पासहतया दूषयति । **व्यावहारिकेति** ॥ तव मिथ्याभेदः ब्रह्मणि दुःखाद्यनुसन्धानरूपज्ञानं नाशयति न वा । द्वितीये उक्तदोषानुद्धारः । प्रथमे घटादिवज्जडता स्यादिति । **कथमिति** ॥ अनुसंधानस्यापि स्वरूपरूपत्वादिति भावः । दृष्टांतान्तरस्य पूर्वं प्रदर्शि-

व्यावहारिकभेदोऽपि यदि ज्ञानं विनाशयेत् । तर्हि जीवं जडीकुर्याद्घटादिजडवस्तुवत् ॥ ६८ ॥
यदि ज्ञानात्मकब्रह्मरूपे ज्ञानं न मोचयेत् । ज्ञानात्मकानुसन्धानं कथं तर्हि बहिः क्षिपेत् ॥ ६९ ॥
विश्लिष्टेपि स्वके पूर्वदेह एव स्थितो मुनिः । विश्लिष्टनानादेहस्थस्वांशसौख्येन यत्सुखी ॥ ७० ॥
तस्मादुपाधिसंश्लेषविश्लेषौचाप्रयोजकौ । गर्भस्थोपाधिसुश्लेषात्किं वा फलमभूच्छिशोः ॥ ७१ ॥
प्राग्भवांशस्य विश्लेषात्किं वा तस्य फलं गतम् । अतोऽल्पदुःखजीवस्य बहुदुःखोपभुक्तये ॥ ७२ ॥
ऐक्यज्ञानमभूद्धेतुर्न तु हातुं भवार्णवम् । मुक्तौ चोभयतः पाशारज्जुस्तत्त्वां न मुंचति ॥ ७३ ॥

तस्य फलमाह । **विश्लिष्टेपीति** ॥ उपाधिसंश्लेषविश्लेषयोरप्रयोजकत्वे स्थलान्तरमपि दर्शयति । **गर्भेति** ॥ तस्य शिशोः । अत औपाधिकभेदस्याप्रयोजकत्वात् । **अभूदिति** ॥ पूर्वं स्वमात्रगतदुःखानुभव्यपि जीवः मुक्तौ सर्वगतदुःखमेकत्वबलादनुभवेदिति तवैक्यज्ञानं संसारमोचकं न किन्तु बन्धनार्थप्रदमेवासीदिति भावः । उभयतःपाशारज्वा परबन्धनाय प्रतिजानीते । **मुक्ताविति** ॥ मुक्तावपि बन्धनं

त्वां न मुञ्चतीति स्वारस्यं ॥ ७३ ॥ तामेवोभयतःपाशारज्जुं दर्शयति । **एकेत्यादिना** ॥ मुक्तौ चेतनो यद्येक एव स्यात्तर्हि मुक्तेर्मुक्तिः 'एकाकी न रमत' इति श्रुत्युक्तरीत्याऽरतिप्राप्तेः । बहुजीव सद्भावेपि तवमतेऽस्य मुक्तत्वेनाभ्युपगतस्य या मुक्तिस्तस्या मुक्तिरेव । यतः मुक्तौ सर्वैक्यमेव भवान्वक्ति । ऐक्यरूपैव मुक्तिस्त्वाभिलषितेति भावः । तदेव दर्शयति । **यदिति** ॥ श्रुतिः बृहदारण्यकगता । **न सुखवेदनेति** ॥ सुखस्य स्वरूपत्वेन स्वरूपस्य चावेद्यत्वात् सुखज्ञानं नेति भावः । **चित्तवेदनेति** ॥ सुखानुभवाभावादेवेति भावः । सुखस्य ज्ञेयत्वाभावेपि ज्ञान-

एकजीवमते मुक्तिः साधनासम्भवाद्वृथा । बहुजीवमते मुक्तिः साध्यस्यासम्भवाद्वृथा ॥ ७४ ॥
यद्येकश्चेतनो मुक्तौ मुक्तेर्मुक्तिरभूत्तदा । यद्यन्ये चेतनाश्चास्य मुक्तेर्मुक्तिरभूत्तव ॥ ७५ ॥
यदेकाकी न रमत इति स्पष्टं श्रुतिर्जगौ । यतश्चैकाकित्वमेव मुक्तिं वक्ति सदा भवान् ॥ ७६ ॥
स्वावेद्यत्वं यदि तदा मुक्तौ न सुखवेदना । स्वावेद्यत्वं च मुक्तौ चेद्भवेत्ते चित्तवेदना ॥ ७७ ॥
सुखस्य ज्ञानरूपत्वे न ते स्यान्मनसः फलम् । सुखज्ञानस्वरूपत्वमात्रान्न मनसः फलम् ॥ ७८ ॥

स्वरूपत्वान्न दोष इति परामिसन्धिं दूषयितुमनुवदति । **सुखस्येति** ॥ न मनसः फलं । नेष्टसिद्धिः । तदेवाह । **सुखेति** ॥ **नेति** ॥ न हि धनत्वं प्रभुत्वप्रयोजकं किन्तु धनित्वम् । तत्रापि गृहे गुप्ततया सदपि धनं न सुखायेति तज्ज्ञानं यथावश्यकं तथा सुखरूपत्वं नोपयोगि । किन्तु सुखित्वं तज्ज्ञानं चावश्यकमिति सुखस्य ज्ञानस्वरूपत्वेपि प्रयोजनं न किमपीति भावः । अत्र तदभ्युपगतत्वेन प्राधान्या-

वेद्यत्वकल्पः दूषितः । वेद्यत्वकल्पेऽप्यसिद्धान्तो बोध्यः । एवं तरतमभावापन्नयत्नवतां मुक्तावेकविधत्वे कृतहान्यादिरूपं दोषं स्वयं वक्ष्यति । तत्राप्यैकविध्याभावेऽप्यसिद्धांतो बोध्यः । ननु 'तर्हि परमं साम्यमुपैती'ति मुक्तौ समत्वप्रतिपादकवाक्यानां का गतिरित्यत आह । **ऋषिदिति** ॥ पुनर्जन्मादिवर्जनम् । अर्थ इति पूर्वेणान्वयः ॥ ८० ॥ स्वयं सर्वज्ञोऽपि ग्रन्थकारः मध्ये मध्येऽसङ्गततयेव प्रतीयमानायाः दोषाणां विक्षिप्योक्तेः लोकरीत्या समाधिमाह । **यस्मादिति** ॥ शश्वद्विस्मरणशीलानां मनुष्याणां यदा यदा यस्य यस्य स्मरणं भवति तदा

यद्यल्पयत्नवन्तोऽपि मुक्तौ स्युः फलतः समाः । उच्चानां कृतहानिः स्यान्नीचानामकृतागमः ॥ ७९ ॥
क्वचिच्च फलसाम्योक्तेरर्थो दुःखातिदूरता । स्वयोग्यसुखसम्प्राप्तिः पुनर्जन्मादिवर्जनम् ॥ ८० ॥
यस्माद्विस्मृतिशीलानामस्माकं च हरीच्छया । अस्मिन्मायिमते दोषा दृश्यन्ते स्म पदेपदे ॥ ८१ ॥
तस्मादनन्तदोषौघदुःखताऽस्यैव युज्यते । तथापि ग्रन्थविस्तारभयादेवोपरम्यते ॥ ८२ ॥
बहुनात्र किमुक्तेन स्पष्टं भागवते स्थितम् । कृष्णोद्धवाभ्यां कथितं श्लोकं श्लोकार्धमेव वा ॥ ८३ ॥

तदा तस्य तस्योक्तिर्दृष्टा एवं मानुषं विडम्बयता मयापि स दोषः तत्र तत्र प्रकटीक्रियत इति नासङ्गतिराशङ्कनीयेति भावः ॥ ८१ ॥ तस्मात् । इयता प्रदर्शितरीत्या । अस्य मायिनः । मुक्तस्यापि अनन्तदोषदुष्टदुःखस्वरूपता युक्तैव लिंगदेहभङ्गेऽप्यस्य तमसि दुःखस्यैवाविर्भावादिति भावः ॥ ॥ ८३ ॥ किं तद्भागवतवाक्यमित्यत आह । **नित्येति** ॥ इत्युद्धवस्य प्रश्नविषयं वाक्यम् । कृष्णस्य तदुत्तराध्यायादिगतमेवोत्तरवाक्यमाह । **अथेति** ॥

एकादशस्कन्धगतम् । अत्र जीवपरयोरेकदेहस्थितयोरप्येकस्यैव बन्धो नेतरस्येत्येतत्कथमिति शङ्कानिरासाय वैलक्षण्यं कथयति । यतः एकधर्मिणो-रेकदेहे स्थितयोरप्यनयोर्विरुद्धधर्मिणोः स्वातन्त्र्यास्वातन्त्र्यादिरूपविरुद्धधर्मवतोरत एव यद्वैलक्षण्यं तद्वदामीति स्पष्टं प्रतीयते । एतेन जीव-

विचारय मनः कृष्णे प्रचारय न मत्सरम् । कुरु न्यक्कुरु सन्देहं पुरस्कुरु हरेर्मतम् ॥ ८४ ॥
नित्यबद्धो नित्यमुक्त एक एवेति मे मतिः । इत्युद्धवेन जीवस्य ब्रह्मैक्ये शङ्कितेसति ॥ ८५ ॥
अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते । विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ॥ ८६ ॥
इति कृष्णः समाधाता गुरुस्त्रिजगतां गुरुः । सयुक्तिकं भेदमेव समाधत्ते यतः प्रभुः ॥ ८७ ॥
ततोयं माध्वराद्धान्तो रम्यो युक्तिशतैर्युतः । श्रुतेः स्मृतेश्चानुकूलः सिद्धान्तोऽभूच्च संशयः ॥ ८८ ॥
जीवेशयोरैक्यपक्षः पूर्वपक्षोऽभवद्भ्रमम् । अतोऽपि त्वन्मतं हेयमिति सर्वं समञ्जसम् ॥ ८९ ॥
अस्तु वस्त्वखिलं सत्यमस्तु सर्वोत्तमो हरिः । अस्तु मय्यस्ति समस्तस्य मास्तु विश्वस्य विप्लवः ॥ ९० ॥
पान्तु पुण्यानि सततं त्रान्तु तत्त्वानि तत्त्वतः । यान्तु पापानि विलयं त्रान्तु देवाः सदा सवाः ॥ ९१ ॥

परैक्यं पूर्वपक्षः । भेदः सिद्धान्त इत्यपि सिद्धमाभीयिति । अतोपि न केवलमुपादेयांशत्वं पूर्वपक्षत्वाच्च । सर्वमिथ्यात्वस्य प्रामाणिकत्वे सर्वमिदं न स्यादिति ॥ ८९ ॥ अनुत्तरतया तूष्णीं स्थितं परं कृपया तत्त्वं बोधयति । अस्मित्यादिना ॥ अन्तेपि स्वाभीष्टदेवता नमति ।

नम इति ॥ स्वमूलगुरुं नमति । **नम इति** ॥ ९३ ॥ सरस्वतीं वाङ्मनसाभिमानितया प्रार्थयते । **सङ्गीतेति** ॥ सम्यग्गीतो मंगलो रवो यस्याः । सङ्गीतवन्मङ्गलः कर्णमधुरो रवो यस्या इति वा । तुरङ्गमवदश्ववदतिजवोपेतः तुङ्गः उच्चः अपांगो यस्याः । इयं गीरभिमानिनी सरस्वती गीर्शब्दप्रतिपाद्या वा । स्वगुरून्प्रणमति । **गुरव इति** ॥ श्रितानां भक्तानां देवेन्द्रतरवः कल्पवृक्षसदृशाः । श्रितः

नमोऽस्तु कञ्जनेत्राय मंजुगात्राय तेंऽजसा । नमोस्तु रम्यग्रीवाय हयग्रीवाय सर्वदा ॥ ९२ ॥
नमोऽस्तु मध्वमुनये सदा सच्छास्त्रयोनये । तदीयवाण्यै दुर्वादिकृपाण्यै च नमो नमः ॥ ९३ ॥
सङ्गीतमङ्गलरवा तुङ्गापाङ्गतुरङ्गमा । गङ्गाजनकपादाब्जभृङ्गी माङ्गीरवत्विषम् ॥ ९४ ॥
गुरवः श्रितदेवेन्द्रतरवः सत्वभीरवः । घ्नन्तु पापानि सततं सन्तु सन्तोषदाश्च मे ॥ ९५ ॥
ग्रन्थेऽस्मिन्पवनः कर्ता तत्पत्नी शारदाम्बिका । वाग्वैखरीप्रदा युक्तिसंचारगुणदा च मे ॥ ९६ ॥
नायकः सर्वजगतां नायकोऽत्र रमापतिः । नायकी तत्पदाम्भोजसेवोत्सुकरता रमा ॥ ९७ ॥
भवतां जन्म सफलं भवतां भवतामिह । ममापि जन्म सफलं यैरित्थं कीर्त्यते हरिः ॥ ९८ ॥

आश्रितः देवः क्रीडादिगुणविशिष्टो विष्णुः कल्पवृक्षसदृशो यैस्त इति वा अद्य इन्द्रतरुः कल्पवृक्षः । सत्वभीरवः सत्वेऽन्तःकरणे भीरवः धर्मभीरवः ॥ ९६ ॥ भवतां पूज्यानां । भवतां युष्माकं । भवतां सताम् । जन्म सफलं । भवतामिति क्रियापदं वा । 'चन्द्रादयस्तु

मन्यन्ते सर्वस्मादुभयं पदमिति वचनात् । कुत इत्थं आह । कीर्त्यत इति ॥ इत्थं पूर्वश्लोकोक्तरीत्या समग्रग्रन्थप्रतिपाद्यगुणविशिष्टतया वा ॥ ९८ ॥ अध्येतॄणामैहिकमपि फलमाह । वादिराजेनेति ॥ ९९ ॥ अमलः शब्दतोऽर्थतश्च दोषशून्यः ॥ १०० ॥ श्री ॥ सूक्तिरत्नाकरे रम्ये विहरन् बालभावतः । आमस्तकं निपीयाम्बु निमज्योन्मज्य देशिक । १ ॥ श्रान्तस्त्वत्पादमूलेहं पतितः कृपयोद्धर । क्व यास्ये कं वदिष्यामि न करोषि कृपां यदि ॥ २ ॥ न पाण्डित्यान्नाभिमानान्न मात्सर्याच्च कुत्रचित् । गुरो त्वदुक्तिसद्रत्नमोहात्त्यागेप्यशक्तितः ॥ ३ ॥ यथा

वादिराजेन रचितां न्यायरत्नावलीमिमाम् । संगृह्णतः सभामध्ये वाग्दारिद्र्यं न विद्यते ॥ ९९ ॥
वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः । पंचमः सुधियां कण्ठालङ्कारं कुरुतेतराम् ॥ १०० ॥
॥ इति भाविसमीर श्रीमद्वादिराजपूज्यचरणविरचितन्यायरत्नावल्यां पंचमः सरः समाप्तः ॥
॥ ग्रन्थश्चायं सम्पूर्णः ॥ श्री हयवदनार्पणमस्तु ॥

वृद्धस्य सुन्दर्यां विकारो मामकस्तथा । सन्तः क्षमन्तां धार्ष्ट्यं मे क्षमाभृता हि साधवः ॥ ४ ॥ गुरुवर कृतपेटीगामिरत्नप्रमाणं य इह नयनगामी बाह्यगोऽणुः प्रकाशः । उपचयकृतिमेनां मत्कृतामस्य दृष्ट्वा निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ ५ ॥ नाहं शैवगवीषु जागरमतिर्न न्यायचातुर्यवानाम्नायस्मृतिलोडनेऽपि निशिता प्रज्ञा न वैयासिके । किन्तु श्रीमदनन्तसन्ततकृपासन्तानसंपूरिता वाणी मे जयतात्प्रसन्नहृदये या कापि विद्वज्जनाम् ॥ ६ ॥ अत्र श्रीमतोऽनन्तस्य तन्नामकपितुः । देवेंद्रवन्द्यानन्तपद्मनाभस्य वा । श्रीमतामादि-

गुरूणां विद्यागुरूणां वा अनन्ता या सन्ततकृपेति वार्थः ॥ प्रतीचीत्रिशतग्रामवास्यनन्तसुतः सुधीः । नारायणोऽकृत न्यायरत्नावल्यां द्युतिसङ्ग्रहम् ॥ ७ ॥

॥ इति श्रीमद्वादिराजपूज्यचरणविरचित न्यायरत्नावल्याः षडमुद्भूरुनारायणाचार्यकृतः प्रकाशसंग्रहः सम्पूर्णः ॥

॥ शुभमस्तु ॥

इदं पुस्तकं श्री सोदामठीय श्रीमद्राविमसी•वादिराजतीर्थ श्रीमच्चरणपीठाधिरूढैः **विश्वेन्द्रतीर्थ श्रीमच्चरणैः** रजतपीठपुरस्थिते प्रभाकरमुद्रणालये मुद्रापयित्वा प्रकाशितं । अस्य सर्वोऽपि मुद्रणाधिकारः तैरेव स्वायत्तीकृत इति ॥

॥ इति न्यायरत्नावली समाप्ता ॥